श्रेष्ठि देवचन्द लालभाई पुस्तकोद्धार फण्ड-सुरत

श्री श्रुतस्थविर संदृब्धानि श्रीमन्ति—

# उत्तराध्ययनानि

## [ संस्कृत छाया सहित ]

श्री उत्तराध्ययनसूत्र

प्रेरका:

पू. आगमोद्धारक आचार्य श्री आनन्दसागरसूरीश्वराणां
लघुवयस्क शिष्यरत्न श्री सूर्योदयसागरसूरीश्वरा:

: सम्पादकौ :

पू. आगमोद्धारकसूरि शिष्य आचार्य श्री सूर्योदयसागरसूरि
तथा
पू. शासनकंटकोद्धारक आ. श्री हंससागरसूरीश शिष्य शिशु श्री नरेन्द्रसागरसूरीश्वरौ

: प्रकाशक :

श्री देवचन्द लालभाई पुस्तकोद्धार फण्ड
सु...र...त

मूल्य :

श्रेष्ठि देवचन्द लालभाई पुस्तकोद्धार फण्ड-सुरत

श्री श्रुतस्थविर संदृब्धानि श्रीमन्ति—

# उत्तराध्ययनानि

## [ संस्कृत छाया सहित ]

श्री उत्तराध्ययनसूत्र

प्रेरकाः

पू. आगमोद्धारक आचार्य श्री आनन्दसागरसूरीश्वराणां
लघुवयस्क शिष्यरत्न श्री सूर्योदयसागरसूरीश्वराः

: सम्पादकौ :

पू. आगमोद्धारकसूरि शिष्य आचार्य श्री सूर्योदय[illegible]

तथा

पू. शासनकंटकोद्धारक आ. श्री हंससागरसूरीश शिष्य शिशु श्री नरेन्द्रसागरसूरीश्वरौ

: प्रकाशक :

श्री देवचन्द लालभाई पुस्तकोद्धार फण्ड
सु...र...त

मूल्य :

: प्रकाशक :
श्री देवचन्द लालभाई जैन
पुस्तकोद्धार फण्ड
सुरत

[ वीर सं. २५१८ ]

: प्राप्तिस्थान :
श्री देवचन्द लालभाई जैन
पुस्तकोद्धार फण्ड
गोपीपुरा, सुरत

[ वि. सं. २०४८ ]

[ सने-१९९२ ]

[ आगमोद्धारक सं. ४३ ]

[ मूल्य :

: मुद्रक :
श्री प्रवीणचन्द्र बी. शेठ
विशाल प्रिन्टरी,
सोनगढ-३६४२५०

# ગ્રં....થ....પ્ર....સ્તા....વ....ના

શ્રી ઉત્તરાધ્યયન સૂત્ર, ૩૬ અધ્યયનમય છે. પૂ. સ્થવિરમહર્ષિઓએ પ્રભુ મહાવીરદેવની અંતિમ ૧૬ પ્રહરની=સતત બે દિવસની દેશનામાં છેલ્લે જે ૩૬ અપૃષ્ટ વ્યાકરણોને જણાવ્યા તેનું આ ૩૬ અધ્યયનરૂપે સંકલન કરેલ કહેવાય છે. અને આ કારણથી જ દીવાળીના અંતિમ બે દિવસોમાં આ સૂત્રનો બહુધા સ્વાધ્યાય કરાય છે. પૂ. સાધુભગવંતો તથા સાધ્વીજીઓ આ અધ્યયનોનું વાંચન કરે છે તેમજ સભામાં ગૃહસ્થોની પાસે તેનો સારાંશ પણ કહેવાય છે.

આ રીતે આ ઉત્તરાધ્યયન સૂત્ર, સર્વ ગચ્છોમાં સ્વાધ્યાય પાઠરૂપે અતિપ્રચલિત છે સાધુ, સાધ્વીજી આદિ વાચનારની સંખ્યા વધી અને મોટા ટાઈપવાળું ઉત્તરાધ્યયન સૂત્ર મળવું દુર્લભ થયું.' ત્યારે પૂ. આગમોધ્ધારક આચાર્યદેવેશ શ્રી આનંદસાગરસૂરીશ્વરજીમ. શ્રીના શિષ્યરત્ન પૂ. આ. શ્રી સૂર્યોદયસાગર સૂરિજીમહારાજને એક સુવર્ણપળે છાયા વિચાર ઉદ્ભવ્યો કે ' ઉત્તરાધ્યયનસૂત્ર મૂળરૂપે મોટાટાઈપમાં અને નીચે તેની જ સંસ્કૃત છાયા સાથે છપાવવામાં આવે તો સ્વાધ્યાયમાં સહુને સુગમતા રહે.'

આ વિચારને તેઓશ્રીએ–' શ્રી દેવચન્દ લાલભાઈ પુસ્તકોદ્ધાર ફંડ' ના કાર્યવાહક શ્રીયુત્ મોતીચંદ મગનલાલ ચોકશી મુંબઈવાળાને જણાવી. સોનામાં સુગંધ મળે તેમ તેઓએ પણ તુર્તજ તે વાત વધાવી લીધી ! તેથી આ અંગે સંપાદનકાર્ય કરવાનો ઉત્સાહ જાગતાં પ્રતો-પુસ્તકો ભેગાં કરી સંશોધન કરવાપૂર્વક કાર્યની શરૂઆત કરી.' સારા કાર્યમાં સો વિધન' એ ઉકત્યનુસાર કેટલાક કારણોને લઈ ને વિલંબ થવા પામ્યો છતાં આ ગ્રંથનું સંપાદનકાર્ય પૂર્ણતાની ટોચે પહોંચવા પામેલ છે !

પૂજ્ય આ- શ્રી સૂર્યોદયસાગર સૂરિજીમ શ્રીની સાથે આત્મીયતાનો ગાઢ સબંધ હોવાથી તેઓએ મને સ્નેહથી પ્રૂફસંશોધન અશુદ્ધિસંમાર્જનનું કાર્ય સુપ્રત કર્યું તે અહો ભાગ્ય માનું છું. પૂ. પરમોપકારી શાસનકંટકોદ્ધારક આચાર્ય ગુરૂદેવશ્રી હંસસાગરસૂરીશ્વરજી મ. શ્રીની અનન્યકૃપાએ કરીને નિર્વિઘ્ને કામસમાપ્તિ કરવાપૂર્વક અનેક પ્રવૃતિઓમા અટવાયેલ હોવા છતાં તે, આત્મીયમિત્ર પૂ. આ. શ્રી સૂર્યોદયસાગરસૂરિજીમ. ને યતકિંચિત્ સંતોષ આપી શકયો તે બદલ કૃતાર્થતા અનુભવું છું.

ટાઈપો તદ્દન નવા હોવા છતાં કારીગરોની અપૂર્ણ કાળજીના કારણે કાંઈક ન્યૂનતા જરૂર રહેવા પામી છે, અશુદ્ધિઓ પણ રહેવા પામી છે તે માટે ક્ષમા યાચું છું. ઉચ્ચારમાં કોઈ ફેર પડતો ન હોય તેવી અશુદ્ધિઓને જતી કરી મહત્વની અશુદ્ધિઓને જ શુદ્ધિપત્રકમાં શુદ્ધ કરવામાં આવી છે. બાકીની અશુદ્ધિઓને વિદ્વાચકવરોએ જ શુદ્ધિ કરી લેવી

લાંબાકાળ સુધી ટકી રહે એ આશયથી ટકાઉ કાગળો વાપરેલ છે તેમજ સહુ કોઈને વાંચવામાં સુલભ થાય તે માટે ઓપન કલોથ બાઈન્ડીંગ પણ રાખવામાં આવ્યું છે. શ્રી વીરવાણી પર્યુપાસક એવો શ્રીસંઘ આ ગ્રંથનો સુંદર ઉપયોગ કરે, પૂ. શ્રમણ-શ્રમણીવર્ગ વીરભગવંતની આ અંતિમ વાણીનું સંઘોને પાન કરાવી કૃતાર્થ બને અને બીજાઓને બનાવે. જેથી અમારા કાર્ય અને તે અંગેના પરિશ્રમની સાર્થકતા થાય એવી અંતરેચ્છા.

લી.

પાલીતાણા-ગિરિરાજસોસાયટી
જૈનજ્ઞાનશાળા. ૨૦૪૭ શ્રા શુ. ૧૧

પૂ. 'શાસનકંટકોદ્ધારક' સૂરિશિશુ.
આ૦ નરેન્દ્રસાગર

## ॥ उत्तराध्ययनसूत्र शुद्धिपत्रकम् ॥

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १ | १४ | च इत्ताणं च | चइत्ताणं |
| २ | १६ | दक्षु. | दट्ठु. |
| ४ | ११ | ०रष्ठं | ०रट्ठं |
| ४ | १४ | चिछे | चिट्ठे |
| ६ | १९ | दूघह | ०दूघ० |
| ८ | ८ | पुछो | पुट्ठो |
| ८ | ८ | विणिण्णज्जा | विइण्णेज्जा |
| ८ | २५ | मसाक | ०मशक |
| १२ | ८ | ०णज्जा | ण्णेज्जा० |
| १२ | २१ | लब्बी | लब्बा० |
| १४ | २२ | ०प्रेक्ष्यी० | ०प्रेक्ष्या० |
| १५ | २० | अपध्यान्यु | अच पश्चाद्० |
| १८ | १८ | ०रशी० | ० :शी० |
| २३ | ९ | ०क्कोण | ०क्कूण |
| २३ | २४ | अबक्षे | अक्षे |
| २४ | ४ | पत्तें | पत्ते |
| २६ | १५ | भक्षन्त्या | क्षान्त्या |
| २७ | ८ | मेर्ति | मिर्ति |
| २७ | १९ | ०कक्ष्य | ०क्ष्य |
| २८ | २० | आर्यं | आचारिकं |
| २९ | १८ | ०न्निधिं | सन्निधिं |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ३० | २४ | कहणु | कहन्नु. |
| ३२ | १५ | सिखखा | सिक्खा |
| ३२ | २४ | शिषक्षा | शिक्षा |
| ३३ | १९ | समुमु० | समु० |
| ३५ | १३ | बोच्चत्थे | विवज्जत्थे |
| ३६ | १३ | वक्कसं | बुक्कसं |
| ३६ | ६ | ०मायरि० | ०मारि० |
| ३८ | ८ | द्धौ | द्धौ |
| ५१ | ७ | ०रावि | ०रवि |
| ५१ | १३ | ०रावि | ०रवि |
| ५१ | २३ | ०सेव० | ०चेव० |
| ५१ | २४ | ,, | ,, |
| ५५ | १८ | ०गाद्धि० | गात्थि० |
| ५७ | ७ | सख० | संख० |
| ५८ | ५ | चाह० | चाउ० |
| ६० | १६ | ष– | च– |
| ६२ | ११ | ०ईदिय० | ०इंदिय० |
| ६३ | २३ | ०पात० | ०वार० |
| ६७ | २१ | ०रश० | ०रस० |
| ७१ | ८ | परिम्म | परम्मि |
| ७४ | २० | जिन्नेद | जिनेन्द्र |
| ७४ | २१ | ०विंरा० | ०विहारा० |
| ७४ | २२ | ०प्टा० | ०ष्ट० |
| ७५ | १३ | तमं तमेंणं | तमंतमे णं |
| ८१ | ७ | फम्दण्ति | फंदंति |
| ८१ | ७ | ०ज्जा मा० | ज्जमा० |
| ८८ | २१ | ०चचा० | ०चा० |

| पृष्ठ | पंक्ति | अशुद्धि | शुद्धि |
|---|---|---|---|
| ८९ | २० | कांवा वाक्षा | वा कांक्षा वा |
| ९१ | १३ | ०वन्न० | पन्न० |
| ११४ | ३ | विन्ति० | विन्त० |
| ११५ | १० | ०प्पणो | ०प्पणा |
| ११५ | १३ | ण हु सी | णहुसी |
| ११५ | १९ | ०त्मनः | ०त्मना |
| ११५ | २० | न भवसि | नैवासि |
| ११७ | ७ | तं | सो |
| ११७ | १७ | चरिष्य | चरेः |
| ११७ | १८ | तमब्द्री ष्टम० | सो ब्रूते अ |
| ११८ | २० | ०कृदुः | ०कद्दुः |
| ११८ | १६ | गुणं | गुणाः |
| ,, | ,, | शीताड० | शीता अ० |
| १२० | १६ | ०णीतप्तः | ०भितप्तः |
| ,, | १८ | उन्क० | उत्क० |
| १२४ | २१ | ०बाह्ययेये | ०बाह्ये |
| १२५ | १४ | भतेण | भत्तेण |
| १३० | ७ | ०वियरं० | ०विवरं० |
| ,, | ११ | ०च्छया | ०च्छगा |
| ,, | १९ | ०माइगं | ०माङगं |
| १३३ | ११ | मासाए | भासाए |
| ,, | २२ | तथैणा यम् | तथैषणायाम् |
| १३४ | २० | ०भवश्नर० | ०भवद्वार |
| १३५ | ५ | उत्तमट्ठ | उत्तिमट्ठे |
| १३५ | २१ | ०गुणान्ति० | ०गुणान्वि० |
| १३६ | १७ | ०याश्र | ०याश्व |
| १३७ | ९ | ०दइड | ०दण्ड |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १३८ | १९ | पिहुइन्डं | पिहुंडं |
| १३८ | २२ | ०शिक्षिते अशिक्षित नीति | शिक्षितो नीति० |
| १४० | ७ | यिमप्पियं | पियमप्पियं |
| १४० | ९ | इजे | जे |
| १४० | १३ | ०फास | फासा |
| १४० | १७ | ०हिन्द्रयः | ०तेन्द्रियः |
| १४० | १७ | ०द्रष्ट्रे | ०द्राष्ट्रे |
| १४१ | १२ | वडत० | बंडत० |
| १४१ | २२ | मिश्री० | मिश्री० |
| १४१ | २३ | स्पृशेरी० | स्पृशोत्परी० |
| १४२ | २४ | र्मसं० | धर्मसं० |
| १४१ | २५ | समुद्रु० | समुद्र० |
| १४२ | २१ | धरो, कालक० | धरो, गौतम कालक० |
| १४४ | १७ | सुदुः खितात् | सुदुःखितात् |
| १४४ | १८ | रथि० | सारथि० |
| १४५ | २१ | त्रेण | रत्रेण |
| १४६ | २१ | संन्ति | सन्ति |
| १४७ | १३ | पवेयं | पवेइयं |
| ,, | २१ | ष्ट्रोदं | ष्ट्रेदं |
| १४८ | १६ | भजत्व | भजस्व |
| १४९ | १४ | सिद्धि | सिद्धि |
| ,, | १७ | हटोड | हडोड |
| ,, | १९ | ०एयस्स | ०एण्यस्य |
| ,, | २१ | द्वावपि | द्वावपि |
| १५० | ८ | सोत्तमे | सुत्तमुत्ति |
| १५१ | २० | संग | सङ्ग |
| ,, | २३ | ० बान | ० बान् |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १५२ | १८ | व्यहार्ष्टां | व्यहार्ष्टां |
| १५२ | २० | ० ऽयं वा | ० ऽयं धर्मो वा |
| ,, | २२ | पार्श्वेन | पार्श्वेन |
| १५३ | १७ | उभो | उभौ |
| १५४ | २१ | विषेष | विशेषे |
| ,, | २१ | मर्मं | धर्मं |
| १५५ | २० | थोऽयं | योऽयं |
| १५६ | १६ | ० मिप्सि० | मीप्सि० |
| ,, | १९ | च्छिनो | च्छिन्नो |
| ,, | १९ | पिडयम् | योऽयम् |
| ,, | २२ | शत्रत् | शत्रून् |
| १५७ | १८ | ०त्रुकृषा० | ०त्रुः कृषा० |
| १६५ | २० | ०पिति० | विति० |
| ,, | २१ | ०स्तुतो | ०स्तुतौ |
| १६६ | २० | ईर्यां | ईर्यां |
| १६७ | २० | ०यांयां | ०यायां |
| १६८ | ४ | पउजेज | पउंजिज |
| १७० | १३ | ०घमानो | घतमानो |
| १७१ | ९ | तस्य | तत्थ |
| १७१ | १७ | महयशा | महायशा |
| १७१ | २३ | याव० | याव० |
| १७९ | २० | ०स्थाने | स्थाने |
| १७९ | २१ | ०कास्श्च | कारश्च |
| १८० | १७ | समुत्थिते | समुपस्थिते |
| १८० | १८ | किं | किं |
| १८१ | ११ | च उरो | चउरो |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १८१ | १३ | पोरिसि | पोरिसिं |
| १८२ | ४ | सज्ञाय | सज्झायं |
| १८२ | २० | अङ्गलि० | अङ्गुलि० |
| १८४ | १८ | वेदनोपशमनाये | वेदनाच्छेदनार्थं |
| १८८ | ३ | ०मिहं | ०मिहं |
| १८८ | ६ | अङ्गलि० | अङ्गुलि० |
| १८९ | १७ | यादृया | यादृशं |
| १९३ | १७ | ०वाश्च | वाश्च |
| १९८ | ३ | मुञ्चति | मुञ्चंति |
| २०१ | १६ | ०स्येकक: | स्त्येकक: |
| २०३ | ९ | अणत० | अणंते० |
| २०६ | १८ | ०प्रच्छ० | पृच्छ० |
| २१० | १९ | ०यत्र० | ०यम० |
| २१० | २० | ०ऽपरि० | ०ऽपलि |
| २१३ | १९ | ०ननुपुनअ० | ०अपुनरा० |
| २१४ | ७ | भापु० | भावु० |
| २१४ | १६ | मुक्त्यान्य० | मुक्त्या अ- |
| २१६ | १७ | एकाप्रयं | एकाग्र्यं |
| २१८ | ८ | णिग्गटेणं | णिग्गटेणं |
| २२३ | ८ | जिइंदिओ | जिइंदियो |
| २२५ | १८ | पर्यायैः | पर्यायैः (च) |
| २२८ | २२ | भकारोऽ | मकारोऽ |
| २३० | ५ | अहु | बहु |
| २३३ | ३ | ०सुयसं० | ०सुयपसं० |
| २३४ | ३ | प्रमास्स्था० | प्रमादस्था० |
| २३४ | १९ | ०द्धिवे० | ०द्विवे० |
| २३५ | ४ | मोहां० | मोहा० |

| पृष्ठ | पंक्ति | अशुद्धि | शुद्धि |
|---|---|---|---|
| २३० | १५ | ०तृप्रस्य | ०तृप्तस्य |
| २३९ | १८ | ०कितचित | ०स्किंचित् |
| ,, | १८ | ण | न |
| २४५ | ११ | फांसं | फासं |
| ,, | १८ | कायस्य | कायस्य |
| २५१ | ८ | ०वत्री | ०वत्ति० |
| २५२ | ७ | तहेवं | तहेव |
| २५२ | २१ | ०ली० | ला० |
| २५४ | १४ | गंण्ठि० | गंठि० |
| २५८ | २१ | ०पिप्पलया | पिप्पलया |
| २६० | २४ | ०यार्य० | ०पर्य० |
| २६० | २४ | तद्वपन् | ०तद्वान् |
| २६४ | २४ | ०र्तहू | ०हूर्त |
| २६६ | ९ | दोग इ | दोग्गाई |
| ,, | १३ | जीवस | जीवस्स |
| २७० | ९ | सैज्जा | सेज्जा |
| २७० | १० | ०माभ० | लाभ० |
| २७० | १२ | ०मुंजि | ०भुंजि |
| २७१ | १४ | ०ऽना व: | ०ऽनाश्रव: |
| २७२ | १५ | द हा | दसहा |
| २७५ | २१ | न्नीलो | नीलो |
| २८० | १६ | नपुंस्त० | नपुंस० |
| २८१ | १९ | ताश्च | ता च्च |
| २८२ | ८ | पुहु ण | पुहुत्तेण |
| २८७ | १० | सिङ्ग० | सिङ्ग० |
| २९४ | २० | ०नीता | ०सिता |
| २९५ | १६ | ०यूत्क | ०युरुत्क |

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २९६ | २० | षढेव | षडेव |
| २९७ | १२ | सतहा | सत्तहा |
| ३०२ | १९ | पल्लो० | पल्यो० |
| ३०४ | १७ | फार्मं० | कर्मं० |
| ३१० | ५ | जंह० | बह० |

अर्हम्

पूर्वोध्धृत श्री जिनभाषित श्रुतस्थविरसंदृब्धानि

# श्री उत्तराध्ययन सूत्राणि.

## अथ विनयश्रुताख्यं प्रथममध्ययनम्

संजोगाविप्पमुक्कस्स, अणगारस्स भिक्खुणो ।
विणयं पाउकरिस्सामि, आणुपुव्विं सुणेह मे ॥१॥

आणाणिदेसकरे, गुरूणमुववायकारए ।
इंगियागारसंपन्ने, से विणीएत्ति वुच्चई ॥२॥

आणाणिद्देसयरे, गुरूणमणुववायकारए ।
पडिणीए असंबुद्धे, अविणीएत्ति वुच्चई ॥३॥

जहा सुणी पूइकण्णी, निक्कसिज्जइ सव्वसो;
एवं दुस्सीलपडिणीए, मुहरी णिक्कसिज्जइ ॥४॥

कणकुंडगं चइत्ता णं, विट्ठं भुंजइ सूयरो;
एवं सीलं च इत्ताणं च,दुस्सीले रमई मिए ॥५॥

---

॥ ॐ नमः पार्श्वनाथाय ॥ संयोगाद्विप्रमुक्तस्यानगारस्य भिक्षोः। विनयं प्रादुःकरिष्याम्यानुपूर्व्या श्रणुत मे ॥१॥ आज्ञा निर्देशकरोगुरुणामुपपातकारकः। इङ्गिताकारसंपन्नः स विनयवानित्युच्यते ॥२॥ आज्ञाऽनिर्देशकरो गुरुणामनुपपातकारकः। प्रत्यनीकोऽसंबुद्धोऽविनीत इत्युच्यते ॥३॥ यथा शुनी पूतिकर्णी, निष्काश्यते सर्वतः। एवं दुःशीलः प्रत्यनीको मुखरी निष्काश्यते ॥४॥ कण–कुण्डकं हित्वा, विष्टां भुङ्क्ते सूकरः। एवं शीलं हित्वा दुःशीले रमते मृगः ॥५॥ श्रुत्वाऽभावं शूकरस्य न-

सुणियाभावं साणस्स, सूयरस्स णरस्स य;
विणए ठवेज्ज अप्पाण—मिच्छन्तो हियमप्पणो ॥६॥

तम्हा विणयमेसिज्जा, सीलं पडिलभे जओ ।
बुद्धपुत्त निआगट्ठी, ण णिक्कसिज्जइ कण्हुई ॥७॥

णिसंते सियाऽमुहरी, बुद्धाणमन्तिए सया ।
अत्थजुत्ताणि सिक्खिज्झा, णिरत्थाणिउ वज्जए ॥८॥

अणुसासिओ ण कुप्पिज्झा, खंतिं सेविज्झ पंडिए;
खुड्डेहिं सह संसग्गिं, हासं कीडं च वज्जए ॥९॥

मा य चंडालियं कासी, बहुयं माय आलवे ।
कालेण य अहिज्जित्ता, तओ झाइज्ज एगगो ॥१०॥

आहच्च चंडालियं कट्टु, ण णिण्हविज्ज कयाइ वि ।
कडं कडत्ति भासेज्जा, अकडं णो कडत्तिय ॥११॥

मा गलियस्सेव कसं, वयणमिच्छे पुणो पुणो ।
कसं व दठ्ठुमाइण्णे, पावगं परिवज्जए ॥१२॥

---

रस्य च । विनये स्थापयेदात्मान मिच्छेन्नहितमात्मनः ॥६॥ तस्माद् विनयमेषयेत् शीलं प्रतिलभेत यतः । बुद्धपुत्रः नियागार्थी न निष्काश्यते कुतश्चित् ॥७॥ निःशान्तःस्याद (मुखरो) मुखरिः बुद्धानामन्तिके सदा । अर्थयुक्तानि शिक्षेत निरर्थकानि तु वर्जयेत् ॥८॥ अनुशिष्टो न कुप्येत् क्षान्ति सेवेत पण्डितः । बालैः सह संसर्गं हसनं क्रीडां च वर्जयेत् ॥९॥ मा च चाण्डालिकं कार्षीःबहुकं मा च आलपेत् । कालेन चाधीत्य ततो ध्यायेदेककः ॥१०॥ आहत्य चण्डालिकं कृत्वा न निह्नवीत कदाचिदपि । कृतं कृतमिति भाषेत कृतं न कृतमिति च ॥११॥ मा गल्यश्व इव कशं वचनमिच्छेत् पुनः पुनः । कशमिव दृष्ट्वाऽऽकीर्णः पापकं परिवर्जयेत् ॥१२॥ अनाश्रवाः स्थूलवचसः कुशीलाः मृदुमपि चण्डं प्रकुर्वन्ति शिष्याः ।

अणासवा थूलवया, कुसीला मिउंपि चंडं पकरिन्ति सीसा ।
चित्ताणुया लहु दक्खोववेया, पसायए ते हु दुरासयं पि ॥१३॥

ना पुट्ठो वागरे किंचि, पुट्ठो वा णालियं वए ।
कोहं असच्चं कुव्वेज्जा, धारेज्जा पियमप्पियं ॥१४॥

अप्पा चेव दमेयव्वो, अप्पा हु खलु दुद्दमो ।
अप्पा दन्तो सुही होइ, अस्सि लोए परत्थ य ॥१५॥

वरं मे अप्पा दन्तो, संजमेण तवेण य ।
माहं परेहि दम्मन्तो, बन्धणेहि वहेहि य ॥१६॥

पडिणीयं च बुद्धाणं, वाया अदुव कम्मुणा ।
आवी वा जइ वा रहस्से, णेव कुज्जा कयाइवि ॥१७॥

ण पक्खओ ण पुरओ, णेव किच्चाण पिट्ठओ ।
ण जुंजे ऊरुणा ऊरुं, सयणे णो पडिस्सुणे ॥१८॥

णेव पल्हत्थियं कुज्जा, पक्खपिंडंव संजए ।
पाए पसारिएवावि, ण चिट्ठे गुरुणन्तिए ॥१९॥

आयरिएहिं वाहित्तो, तुसिणीओ ण कयाइ वि ।
पसायपेही णियागट्ठी, उवचिट्ठे गुरुं सया ॥२०॥

---

चित्तानुगाः लघु दाक्ष्योपपेताः प्रसादयेयुः ते दुराशयमपि ॥१३॥ ना पृष्टो व्यागृणीयात् किञ्चित् पृष्टो वा नालीकं वदेत् । क्रोधमसत्यं कुर्वीत धारयेत् प्रियमप्रियं ॥१४॥ आत्मानमेव दमयेदात्मा खलु दुर्दमः । आत्मा दान्तः सुखी भवत्यस्मिन् लोके परत्र च ॥१५॥ वरं ममात्मा दान्तः संयमेन तपसा च । माऽहं परैः बन्धनैः दमितो वधैश्च ॥१६॥ प्रत्यनीकं च बुद्धानां वाचाऽथवा कर्मणा । आविर्वा यदि वा रहस्ये नैव कुर्यात् कदाचिदपि ॥१७॥ न पक्षतो न पुरतो नैव कृत्यानां पृष्ठतः । न युञ्ज्यादूरुणोरुं शयने न प्रतिशृणुयात् ॥१८॥ नैव पर्यस्तिकां कुर्यात् पक्षपिण्डं वा संयतः । पादौ प्रसारितौ वापि न तिष्ठेद् गुरूणामन्तिके ॥१९॥ आचार्यैर्व्याहृतः तूष्णीकः न कदाचिदपि । प्रसादार्थी नियागार्थी उपतिष्ठेत गुरुं सदा ॥२०॥

आलवन्ते लवन्ते वा, ण णिसीएज्ज कयाइ वि ।
चइऊणमासणं धीरो, जओ जत्तं पडिस्सुणे ॥२१॥

आसणगओ ण पुच्छेज्जा, णेव सेज्जागओ कया ।
आगम्मुक्कुडुओ सन्तो, पुच्छिज्जा पंजलीउडो ॥२२॥

एवं विणयजुत्तस्स, सुयं अत्थं च तदुभयं ।
पुच्छमाणस्स सीसस्स, वागरिज्ज जहासुयं ॥२३॥

मुसं परिहरे भिक्खू, ण य ओहारिणिं वए ।
भासादोसं परिहरे, मायं च वज्जए सया ॥२४॥

ण लविज्ज पुट्ठो सावज्जं, ण णिरष्ठ ण मम्मयं ;
अप्पणत्था परट्ठा वा, उभयस्सन्तरेग वा ॥२५॥

समरेसु अगारेसु, सन्धीसु य महापहे ।
एगो एगित्थिए सद्धिं, णेव चिठ्ठे ण संलवे ॥२६॥

जम्मे बुद्धाणुसासन्ति, सीएग फरुसेण वा ।
मम लाभुत्ति पेहाए, पयओ तं पडिस्सुणे ॥२७॥

---

आलपति लपति वान निषीदेत् कदाचिदपि । त्यक्त्वासनं धीरः यतो तत् प्रतिश्रणुयात् ॥२१॥ आसनगतो न पृच्छेत् नैवशय्यागतः कदाचिदपि । आगम्योत्कटुकः शान्तोः वा पृच्छेत् प्राञ्जालिपुटः ॥२२॥ एवं विनययुक्तस्य सूत्रमर्थं तदुभयम् । पृच्छतः शिष्यस्य व्यागृणीयाद्यथाश्रुतं ॥२३॥ मृषां परिहरेद्भिक्षुः नचावधारणीं वदेत् । भाषादोषं परिहरन्मायां च वर्जयेत् सदा ॥२४॥ न लपेत्पृष्टः सावद्यं न निरर्थं न मर्मगं । आत्मार्थं परार्थं वोभयस्यान्तरेण वा ॥२५॥ समरेष्वगारेषु संधिषु च महापथे एको एकस्त्रिया सार्धं नैव तिष्ठेत् न संलपेत् ॥२६॥ यन्मां बुद्धा अनुशासन्ति शीतेन परुषेग वा । मम लाभ इति प्रेक्षया वा प्रयतः तत् प्रतिशृणुयात् ॥२७॥ अनुशासनमौपायं दुष्कृतस्य च प्रेरणं । हितं

अणुसासणमोवायं दुक्कडस्स य चोयणं ।
हियं तं मण्णई पण्णो, वेसं होइ असाहुणो ॥२८॥
हियं विगयभया बुद्धा, फरुसंपि अणुसासणं ।
वेसं तं होइ मूढाणं, खन्तिसोहिकरं पयं ॥२९॥
आसणे उवचिट्ठेज्जा, अणुच्चे अकुक्कुए थिरे ।
अप्पुत्थाई निरुत्थाई, णिसीज्जा अप्पकुक्कुए ॥३०॥
कालेण णिक्खमे भिक्खु, कालेण य पडिक्कमे ।
अकालं च विवज्जित्ता, काले कालं समायरे ॥३१॥
परिवाडिए ण चिट्ठेज्जा, भिक्खू दत्तेसणं चरे ।
पडिरुवेण एसित्ता, मियं कालेण भक्खए ॥३२॥
णाइदूरमणासण्णे, णण्णेसिं चक्खुफासओ ।
एगो चिट्ठेज्ज भत्तट्ठ, लंघित्ता तं णइक्कमे ॥३३॥
णाइउच्चे व णीए वा णासण्णे णाइ दूरओ ।
फासुयं परकडं पिण्डं, पडिगाहेज्ज संजए ॥३४॥
अप्पपाणप्पबीयम्मि, पडिच्छण्णंमि संवुडे ।
समयं संजए भुंजे, जयं अपरिसाडियं ॥३५॥

---

तन्मन्यते प्राज्ञः द्वेष्यं भवत्यसाधोः ॥२८॥ हितं विगतभया बुद्धाः परुषमप्यनुशासनम् । द्वेष्यं तद् भवति मूढानां क्षान्तिशुद्धिकरं पदम् ॥२९॥ आसन उपतिष्ठेत् अनुच्चेऽकुक्कुचे स्थिरे । अल्पोत्थायी निरुत्थायी निषीदेदल्पकौत्कुचम् ॥३०॥ काले निष्क्रामेद् भिक्षुः कालेन च प्रतिक्रमेत् । अकालं विवर्जयित्वा काले कालं समाचरेत् ॥३१॥ परिपाटयां न तिष्ठेत् भिक्षुर्दत्तैषणां चरेत् । प्रतिरूपेणैषयित्वा मितं कालेन भक्षयेत् ॥३२॥ नातिदूरेऽनासन्ने नान्येषां चक्षुःस्पर्शतः । एकस्तिष्ठेद् भक्तार्थं उल्लङ्घ्य तं नातिक्रामेत् ॥३३॥ नात्युच्चे वा नीचे वा नासन्ने नातिदूरे । प्रासुकं परकृतं पिण्डं प्रतिगृह्णीयात् संयतः ॥३४॥ अल्पप्राणेऽल्पबीजे वा प्रतिच्छन्ने संवृते समकं संयतो भुञ्जीत यतमानोऽपरिसाटितम् ॥३५॥

सुक्कडित्ति सुपक्कित्ति, सुच्छिण्णे सुहडे ।
मडे सुणिट्ठिए सुलट्ठित्ति, सावज्जं वज्जए मुणी ॥३६॥

रमए पण्डिए सासं, हयं भद्दं व वाहए ।
बाल सम्मइ सासन्तो, गलियस्स व वाहए ॥३७॥

खड्डूआहिं चवेडाहिं, अक्कोसेहि वहेहि य ।
( खड्डुया मे चवेडा मे, अक्कोसा य वहा य मे )
कल्लाणमणुसासन्तो, पावदिट्ठित्ति मण्णई ॥३८॥

पुत्तो मे भाय णाइत्ति, साहु कल्लाण मण्णइ ।
पावदिट्ठि णु अप्पाणं, सासं दासि त्ति मण्णई ॥३९॥

ण कोवए आयरियं, अप्पाणंपि ण कोवए ।
बुद्धोवघाई ण सिया, ण सिया तोतगवेसए ॥४०॥

आयरियं कुवियं णच्चा, पत्तिएण पसायए ।
विण्णवेज्ज पञ्जलि उडो, वएज्ज ण पुणो त्ति य ॥४१॥

धम्मज्जियं च ववहारं, बुद्धेहायरियं सया ।
तमायरन्तो ववहारं, गरणं णाभिगच्छई ॥४२॥

---

सुकृतमिति सुपक्कमिति सुच्छिन्नं सुहृतं मृतम् । सुनिष्ठितं सुलष्टं सावद्यं वर्जयेन्मुनिः ॥३६॥ रमते पण्डितान् शासद्धयं भद्रमिव वाहकः । बालं श्राम्यति शासत् गल्यश्वमिव वाहकः ॥३७॥ खड्डुकाभिश्च पेटाभिराक्रोशैर्वधैश्च (खड्डुकामे चपेटा मे आक्रोशाश्च वधाश्च मे) कल्याण-मनुशासन्तं पापदृष्टिरिति मन्यते ॥३८॥ पुत्रो मे भ्राता ज्ञातिरिति साधुः कल्याणं मन्यते । पापदृष्टिस्त्वात्मानं शास्यमानं दासमिव मन्यते ॥३९॥ न कोपयेदाचार्यमात्मानमपि न कोपयेत् । बुद्धोपघाती न स्यात् न स्यात् तोत्रगवेषकः ॥४०॥ आचार्यं कुपितं ज्ञात्वा प्रातीतिकेन (प्रीत्या) प्रसादयेत् । विज्ञापयेत् प्राञ्जलिपुटः वदेन्न पुनरिति च ॥४१॥ धर्मार्जितं च व्यवहारं बुद्धैराचरितं सदा । तमाचरन् व्यवहारं गर्हां नाभिगच्छति ॥४२॥

मणोगयं वक्कगयं, जाणित्तायरियस्स उ।
त परिगिज्झ वायाए, कम्मुणा उववायए ॥४३॥
वित्ते अचोइए णिच्चं, खिप्पं हवइ सुचोइए।
जहोवदिट्टं सुकयं, किच्चाइ कुव्वई सया ॥४४॥
णच्चा णमइ मेहावी, लोए कित्ती से (च) जायए।
हवई किच्चाणं सरणं, भूयाणं जगई जहा ॥४५॥
पुज्जा जस्स पसीयन्ति, संबुद्धा पुव्वसंथुया।
पसाण्ण लंभइस्सन्ति, विउलं अट्ठियं सुयं ॥४६॥
स पुज्जसत्थे सुविणीयसंसए, मणोरुई चिट्ठइ कम्मसंपया।
तवोसमायारिसमाहिसंवुडे, महज्जुई पञ्चवयाई पालिया ॥४७॥
सदेवगन्धव्वमणुस्सपूइए; चइत्तुं देहं मलपङ्कपुव्वयं।
सिध्धे वा हवइ सासए, देवे वा अप्परए महड्ढिए ॥४८॥ त्तिबेमि

॥१॥ पढमं विणयसुयमज्झयणं सम्मत्तं ॥

---

मनोगतं वाक्यगतं ज्ञात्वाचार्यस्य तु। तत् परिगृह्य वाचा कर्मणोपपादयेत् ॥४३॥ वित्तोऽचोदितो नित्यं क्षिप्रं भवति सुचोदिते। यथोपदिष्टं सुकृतं कृत्यानि करोति सदा ॥४४॥ ज्ञात्वा नमति मेधावी लोके कीर्तिश्च जायते। कृत्यानां शरणं भवति भूतानां जगती यथा ॥४५॥ पूज्या यस्य प्रसीदन्ति संबुद्धाः पूर्वसंस्तुताः। प्रसन्ना लम्भयिष्यन्ति विपुलमार्थिकं श्रुतम् ॥४६॥ स पूज्यशास्त्रः सुविनीतसंशयः मनोरुचिस्तिष्ठति कर्मसंपदा तपःसमाचारीसमाधिसंवृतः महाद्युतिः पञ्चव्रतानि पालयित्वा ॥४७॥ स देवगन्धर्वमनुष्यपूजितः त्यक्त्वा देहं मलपङ्कपूर्वकम्। सिद्धो वा भवति शाश्वतो देवो वा अल्परजा (अल्परतः) महर्द्धिकः ॥४८॥ इति ब्रवीमि ॥

॥१॥ प्रथमविनयश्रुतमध्ययनं समाप्तम् ॥

॥ अथ परीषहाख्यं द्वितीयमध्ययनम् ॥

सुयं मे आउसं तेण भगवया एवमक्खायं, इह खलु बावीसं परीसहा समणेण भगवया महावीरेण पवेइया, जे भिक्खू सोच्चा णच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयन्तो पुट्ठो णो विणिण्णज्जा। कयरे खलु ते बावीसं परीसहा समणेण भगवया महावीरेण कासवेण पवेइया, जे भिक्खू सोच्चा णच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयन्तो पुट्ठो णो विणिहण्णेज्जा ? इमे खलु ते बावीसं परीसहा समणेण भगवया महावीरेण पवेइया, जे भिक्खू सोच्चा णच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयन्तो पुट्ठो णो विनिहण्णेज्जा। तंजहा दिगिंछापरीसहे १ पिवासापरीसहे २ सीयपरीसहे ३ उसिणपरीसहे ४ दंसमसयपरीसहे ५ अचेलपरीसहे ६ अरइपरीसहे ७ इत्थीपरीसहे ८ चरियापरीसहे ९ णिसीहियापरीसहे १० सिज्जापरीसहे ११ अक्कोसपरीसहे १२

---

श्रुतं मयाऽऽयुष्मता तेन भगवतैवमाख्यातम्, इह खलु द्वाविंशतिः परीषहाः श्रमणेन भगवता महावीरेण काश्यपेन प्रवेदिताः, यान् भिक्षुः श्रुत्वा ज्ञात्वा जित्वाऽभिभूय भिक्षाचर्यायां परिव्रजन् स्पृष्टः नैव विनिहन्येत। किं नामानः ते खलु द्वाविंशतिः परीषहाः श्रमणेन भगवता महावीरेण काश्यपेन प्रवेदिताः, यान् भिक्षुः श्रुत्वा ज्ञात्वा जित्वाभिभूय भिक्षाचर्यायां परिव्रजन् स्पृष्टः नैव विनिहन्येत? इमे खलु ते द्वाविंशतिः परीषहाः श्रमणेन भगवता महावीरेण काश्यपेन प्रवेदिताः, यान् भिक्षुः श्रुत्वा जित्वाऽभिभूय भिक्षाचर्यायां परिव्रजन् स्पृष्टः नैव विनिहन्यते। तद्यथा—क्षुधापरीषहः १ पिपासापरीषहः २ शीतपरीषहः ३ उष्णपरीषहः ४ दंशमशकपरीषहः ५ अचेलपरीषहः ६ अरतिपरीषहः ७ स्त्रीपरीषहः ८ चर्यापरीषहः ९ नैषेधिकीपरीषहः १० शय्यापरीषहः ११ आक्रोशपरीषहः १२ वधपरीषहः

वहपरीसहे १३ जायणापरीसहे १४ अलाभपरीसहे १५ रोगपरीसहे १६ तणफासपरीसहे १७ जल्लपरीसहे १८ सक्कारपुरक्कारपरीसहे १९ पण्णापरीसहे २० अण्णाणपरीसहे २१ सम्मत्तपरीसहे २२

परीसहाणं पविभत्ती, कासवेणं पवेइया।
तं भे उदाहरिस्सामि, आणुपुव्विं सुणेह मे ॥१॥
दिगिंछापरियावेण, तवस्सी भिक्खू थामवं।
ण छिन्दे ण छिन्दावए, ण पए ण पयावए ॥२॥
कालीपव्वङ्गसंकासे, किसे धमणिसंतए।
मायण्णे असणपाणस्स, अदीणमणसो चरे ॥३॥
(२) तओ पुट्ठो पिवासाए, दुगुंछीलद्धसंजए। (लज्जसंजए)
सीओदगं ण सेविज्जा, वियडस्सेसणं चरे ॥४॥
छिण्णावाएसु पन्थेसु, आउरेसु पिवासिए।
परिसुक्कमुहे दीणे, तं तितिक्खे परीसहं ॥५॥

---

१४ अलाभपरीषहः १५ रोगपरीषहः १६ तृणस्पर्शपरीषहः १७ मलपरीषहः १८ सत्कारपुरस्कारपरीषहः १९ प्रज्ञापरीषहः २० अज्ञानपरीषहः २१ सम्यक्त्वपरीषहः २२ परीषहाणां प्रविभक्तिः काश्यपेन प्रवेदिता। तान् भवतामुदाहरिष्याम्यानुपूर्व्या शृणुत मे ॥१॥ बुभुक्षापरितापेन तपस्वी भिक्षुःस्थामवान्। न छिन्द्यात् न छेदयेद्वा न पचेत् न पाचयेत् ॥२॥ कालीपर्वसङ्काशः कृशो धमनिसन्ततः। मात्रज्ञोऽशनपानस्यादीनमनाः चरेत् ॥३॥ ततः स्पृष्टः पिपासया जुगुप्सी लब्धसंयमः। शीतोदकं न सेवेत विकृतस्यैषणां चरेत् ॥४॥ छिन्नापातेषु पथिष्वातुरः सुपिपासितः। परिशुष्कमुखोऽदीनः तं तितिक्षेत परीषहम् ॥५॥ चरन्तं विरतं

(३) चरन्तं विरयं लूहं, सीयं फुसइ एगया।
(णाइवेलं विहण्णिज्जा, पावदिट्ठी विहण्णइ)
णाइवेलं मुणी गच्छे, सोच्चाणं जिणसासणं ॥६॥

ण मे णिवारणं अत्थि, छवित्ताणं ण विज्जई।
अहं तु अग्गिं सेवामि, इइ भिक्खू ण चिन्तए ॥७॥

(४) उसिणपरियावेणं, परिदाहेण तज्जिए।
घिंसु वा परियावेणं, सायं णो परिदेवए ॥८॥

उण्हाहितत्तो मेहावी, सिणाणं णो वि पत्थए।
गायं णो परिसिंचेज्जा, ण वीएज्जा य अप्पयं ॥९॥

(५) पुट्ठो य दंसमसएहिं; समरेव महामुणी।
णागो संगामसीसे वा, सूरो अभिहणे परं ॥१०॥

ण संतसे ण वारेज्जा, मणं पि ण पओसए।
उवेह ण हणे पाणे, भुंजन्ते मंससोणियं ॥११॥

(६) परिजुण्णेहिं वत्थेहिं, होक्खामि त्ति अचेलए।
अदुवा सचेलए होक्खं, इइ भिक्खू ण चिन्तए ॥१२॥

---

रूक्षं शीतं स्पृशत्येकदा। (नातिवेलां विहन्यात् पापदृष्टिर्विहन्ति) नातिवेलां मुनिर्गच्छेत् श्रुत्वा जिनशासनम् ॥६॥ न मे निवारणमस्ति छवित्राणं न विद्यते। अहं त्वग्निं सेवे इति भिक्षुर्न चिन्तयेत् ॥७॥ उष्णपरितापेन परिदाहेन तर्जितः। ग्रीष्मे वा परितापेन सातं नो परिदेवेत ॥८॥ उष्णाभितप्तो मेधावी स्नानं नाभिप्रार्थयेत्। गात्रं न परिषिञ्चेत न वीजयेच्चात्मानम् ॥९॥ स्पृष्टश्च दंशमशकैः समरे वा महामुनिः। नागः संग्रामशिरसि वा शूरोऽभिघ्नन् परम् ॥१०॥ न संत्रसेत् न निवारयेत् मनोऽपि न प्रदुष्येत्। उपेक्षेत न हन्यात् प्राणान् भुञ्जानान् मांसशोणितम् ॥११॥ परिजीर्णैर्वस्त्रैः भविष्याम्यचेलकः। अथवा सचेलको भविष्यामीति भिक्षुर्न चिन्तयेत् ॥१२॥

एगयाऽचेलए होइ, सचेले आवि एगया ।
एयं धम्मं हियं णच्चा, णाणी णो परिदेवए ॥१३॥

(७) गामाणुगामं रीयन्तं, अणगारं अकिंचणं ।
अरई अणुप्पवेसे, तं तितिक्खे परीसहं ॥१४॥

अरइं पिट्ठओ किच्चा, विरए आयरक्खिए ।
धम्मारामे णिरारम्भे उवसन्ते मुणी चरे ॥१५॥

(८) सङ्गो एस मणुस्साणं, जाओ लोगम्मि इत्थिओ ।
जस्स एया परिण्णाया, सुकडं तस्स सामण्णं ॥१६॥

एवमाणाय [एयमादाय] मेहावी, पङ्कभूआउ इत्थिओ ।
णो ताहिं विणिहण्णिज्जा, चरेज्जऽत्तगवेसए ॥१७॥

(९) एग एव चरे लाढे, अभिभूय परीसहे ।
गामे वा नगरेवावि, णिगमे वा रायहाणिए ॥१८॥

असमाणो चरे भिक्खू णेव कुज्जी परिग्गहं ।
असंसत्तो गिहत्थेहिं, अणिकेओ परिव्वए ॥१९॥

---

एकदाऽचेलको भवति सचेलश्चाप्येकदा। एतद् धर्महितं ज्ञात्वा ज्ञानी नो परिदेवयेत् ॥१३॥ ग्रामानुग्रामं रीयमाणमनगारमकिञ्चनम् । अरतिरनुप्रविशेत् तं तितिक्षेत परीषहम् ॥१४॥ अरतिं पृष्ठतःकृत्वा विरत आत्मरक्षितः (आयरक्षितः) धर्मारामे निरारम्भे उपशान्तो मुनिश्चरेत् ॥१५॥ सङ्ग एषो मनुष्याणां जातो लोके स्त्रीभिः । यस्यैताः परिज्ञाताः सुकृतं तस्य श्रामण्यम् ॥१६॥ एवमाज्ञाय (एवमादाय) मेधावी पङ्कभूता एव स्त्रियः। नैव ताभिर्विनिहन्यात् चरेदात्मगवेषकः ॥१७॥ एक एव चरेल्लाढोऽभिभूय परीषहान्। ग्रामे वा नगरे वापि निगमे वा राजधान्याम् ॥१८॥ असमानश्चरेद् भिक्षुः, नैव कुर्यात् परिग्रहम्। असंसक्तो गृहस्थैरनिकेतः परिव्रजेत् ॥१९॥

(१०) सुसाणे सुण्णगारे वा, रुक्खमूले व एगओ ।
अकुक्कुओ णिसीएज्जा, ण य वित्तासए परं ॥२०॥

तत्थ से चिट्ठमाणस्स, उवसग्गाऽभिधारए ।
सङ्काभीओ ण गच्छेज्जा, उट्ठित्ता अण्णमासणं ॥२१॥

(११) उच्चावयाहिं सेज्जाहिं, तवस्सी भिक्खू थामवं ।
णातिवेलं विहण्णज्जा, पावदिट्ठी विहण्णइ ॥२२॥

पइरिक्कं वसइं लध्धुं, कल्लाणं अदुव पावयं;
किमेगरायं करिस्सत्ति, एवं तत्थऽहियासए ॥२३॥

(१२) अक्कोसेज्ज परो भिक्खुं, ण तेसिं पडिसंजले;
सरिसो होइ बालाणं, तम्हा भिक्खू ण संजले ॥२४॥

सोच्चाणं फरुसा भासा, दारुणा गामकण्टया ।
तुसिणीओ उवेहेज्जा, ण ताओ मणसी करे ॥२५॥

(१३) हओ ण संजले भिक्खू, मणं पि ण पओसए ।
तितिक्खं परमं णच्चा, भिक्खू धम्मं विचिन्तए ॥२६॥

---

श्मशाने शून्यागारे वा वृक्षमूले चैककः । अकुकुचः निषीदेत् न च वित्रासयेत् परम् ॥२०॥ तत्र तस्य तिष्ठतः उपसर्गा अभिधारयेयुः । शङ्काभीतो न गच्छेदुत्थायान्यमासनम् ॥२१॥ उच्चावचाभिः तपस्वी भिक्षुः स्थामवान् । नातिवेलां विहन्यात् पापदृष्टिर्विहन्ति ॥२२॥ प्रतिरिक्तं वसतिं लब्ध्वा कल्याणमथवा पापकम् । किमेकरात्रं करिष्यत्येवं तत्राध्यासीत ॥२३॥ आक्रोशेत् परो भिक्षुर्न तस्मै प्रतिसंज्वलेत् । सदृशो भवति बालानां तस्माद् भिक्षुर्न संज्वलेत् ॥२४॥ श्रुत्वा परुषा भाषाः दारुणा ग्रामकण्टकाः । तूष्णीक उपेक्षेत न ता मनसि कुर्यात् ॥२५॥ हतो न संज्वलेद् भिक्षुः मनोऽपि न प्रदुष्येत् । तितिक्षां परमां ज्ञात्वा भिक्षुर्धर्मं विचिन्तयेत् ॥२६॥

समणं संजयं दन्तं, हणेज्जा कोइ कत्थई ।
णत्थि जीवस्स णासो त्ति, ण तं पेहे असाहुवं
( एवं पिहिज्ज संजए ) ॥२७॥

(१४) दुक्करं खलु भो णिच्चं, अणगारस्स भिक्खूणो ।
सव्वं से जाइयं होइ, णत्थि किंचि अजाइयं ॥२८॥

गोयरग्गपविट्ठस्स, पाणी णो सुपसारए ।
सेओ अगारवासु त्ति, इइ भिक्खू ण चिन्तए ॥२९॥

१५ परेसु घासमेसिज्जा, भोयणे परिणिट्ठिए ।
लद्धे पिण्डे अहरिज्जा, अलद्धे णाणुतप्पए
(लद्धे पिण्डे अलद्धे वा, णाणुतप्पेज्ज संजए) ॥३०॥

अज्जेवाहं ण लब्भामि, अवि लाभो सुए सिया ।
जो एवं पडिसंचिक्खे, अलाभो तं ण तज्जए ॥३१॥

१६ णच्चा उप्पइयं दुक्खं, वेयणाए दुहट्टिए ।
अदीणो थावए पण्णं, पुट्ठो तत्थऽहियासए ॥३२॥

---

श्रमणं संयतं दान्तं हन्यात् कोऽपि कुत्रापि । नास्ति जीवस्य नाश इति न तं प्रेक्षेदसाधुवत् (एवं प्रेक्षेत संयतः) ॥२७॥ दुष्करं खलु भो नित्यमनगारस्य भिक्षोः । सर्वं तस्य याचितं भवति नास्ति किञ्चिदयाचितम् ॥२८॥ गोचराग्रप्रविष्टस्य हस्तो नैव प्रसार्येत् । श्रेयानागारवास इतीति भिक्षुः न चिन्तयेत् ॥२९॥ परेषु ग्रासमेषयेद् भोजने परिनिष्ठिते । लब्धे पिण्डे आहार्येत् अलब्धे नानुतप्येत (लब्धे पिण्डेऽलब्धे वा नानुतप्येत संयतः) ॥३०॥ अद्यैवाऽहं न लभेऽपि लाभः श्वः स्यात् । य एवं प्रतिसमीक्षेतेऽलाभस्तं न तर्जयति ॥३१॥ ज्ञात्वोत्पन्नं दुःखं वेदनया दुःखार्तितः । अदीनस्थापयेत् प्रज्ञां स्पृष्टस्तत्राध्यासीत ॥३२॥

तेगिच्छं णाभिणन्दिज्जा, संचिक्खऽत्तगवेसए ।
एवं खु तस्स सामण्णं, जं ण कुज्जा ण कारवे ॥३३॥

(१७) अचेलगस्स लूहस्स, संजयस्स तवस्सिणो ।
तणेसु सुयमाणस्स, हुज्जा गायविराहणा ॥३४॥

आयवस्स णिवाएण, तिदुला [अउला] हवइ वेयणा ।
एवं णच्चा ण सेवन्ति, तन्तुजं तणतज्जिया ॥३५॥

(१८) किलिण्णगाए मेहावी, पङ्केण व रएण वा ।
घिंसु वा परितावेण, सायं णो परिदेवए ॥३६॥

वेएज्ज णिज्जरापेही, आरियं धम्मणुत्तरं ।
जाव सरीरभेओ त्ति, जल्लं काएण धारए ॥३७॥

(१९) अभिवायणमब्भुट्ठाणं, सामी कुज्जा णिमन्तणं
जे ताइं पडिसेवन्ति, ण तेसिं पीहए मुणी ॥३८॥

अणुक्कसाई अप्पिच्छे, अण्णाएसी अलोलुए ।
रसेसु णाणुगिज्झेज्जा, णाणुतप्पेज्जा पण्णवं ॥३९॥

---

चिकित्सां नाभिनन्देत संतिष्ठेतात्मगवेषकः । एतत् खलु तस्य श्रामण्यं यन्न कुर्यान्न कारयेत् ॥३३॥ अचेलकस्य रूक्षस्य संयतस्य तपस्विनः । तृणेषु शयानस्य भवेद् गात्रविराधना ॥३४॥ आतपस्य निपातेन तौदिका (अतुला) भवति वेदना । एतद् ज्ञात्वा न सेवन्ते तन्तुजं तृणतर्जिताः ॥३५॥ क्लिन्न (क्लिष्ट) गात्रः मेधावी पङ्केन वा रजसा वा । ग्रीष्मे वा परितापेन सातं णो परिदेत ॥३६॥ वेदयेन्निर्जराप्रेक्षीचार्यं धर्ममनुत्तरम् । यावच्छरीरभेद इति मलं कायेन धारयेत् ॥३७॥ अभिवादनमभ्युत्थानं स्वामी कुर्यान्निमन्त्रणम् । ये तानि प्रतिसेवन्ते न तेभ्यः स्पृहयेन्मुनिः ॥३८॥ अनुत्कषायी (अणुकषायी) अल्पेच्छ अज्ञातैष्यलोलुपः । रसेसु नानुगृध्येत नानुतप्येत प्रज्ञावान् ॥३९॥

[२०] से णूणं मए पुव्वं, कम्माऽणाणफला कडा ।
जेणाहं णाभिजाणामि, पुट्ठो केणइ कण्हुई ॥४०॥
अह पच्छा उदिज्जन्ति, कम्माऽणाणफला कडा ।
एवमास्सासि अप्पाणं, णच्चा कम्मविवागयं ॥४१॥
[२१] निरत्थगम्मि विरओ, मेहुणाओ सुसंवुडो ।
जो सक्खं णाभिजाणामि, धम्मं कल्लाणपावगं ॥४२॥
तवोवहाणमादाय, पडिमं पडिवज्जओ ।
एवं पि मे विहरओ, छउमं ण णियट्टइ ॥४३॥
[२२] णत्थि णूणं परे लोए, इड्ढी वावि तवस्सिणो ।
अदुवा वञ्चिओमित्ति, इइ भिक्खू ण चिन्तए ॥४४॥
अभू जिणा अत्थि जिणा, अदुवावि भविस्सइ ।
मुसं ते एवमाहंसु, इइ भिक्खू ण चिन्तए ॥४५॥
एए परीसहे सव्वे, कासवेण पवेइया ।
जे भिक्खू ण विहण्णेज्जा, पुट्ठो केणइ कण्हुई ॥४६॥ त्ति बेमि

बीयं परीसहज्झयणं सम्मत्तं ॥२॥

---

अथ नूनं मया पूर्वं कर्माण्यज्ञानफलानि कृतानि । येनाहं नाभिजानामि पृष्टः केनापि कस्मिंश्चिद् ॥४०॥ अपथ्यान्युदीर्यन्ते (उदेष्यन्ति) कर्माण्यज्ञानफलानि कृतानि । एवमाश्वासयात्मानं ज्ञात्वा कर्मविपाकम् ॥४१॥ निरर्थके विरतो मैथुनात् सुसंवृतः । यस्साक्षान्नाभिजानामि धर्मं कल्याण-पावकम् ॥४२॥ तपउपधानमादाय प्रतिमां प्रतिपद्यमानस्य । एवमपि मे विहरत छद्म न निवर्तते ॥४३॥ नास्ति नूनं परलोकः ऋद्धिर्वापि तपस्विनो । अथवा वञ्चितोऽस्मीति इति भिक्षुर्न चिन्तयेत् ॥४४॥ अभूवन् जिनाः सन्ति जिनाः अथवा भविष्यन्ति । मृषां त एवमाहुः इति भिक्षुर्न चिन्तयेत् ॥४५॥ एते परीषहाः सर्वे काश्यपेन प्रवेदिताः । यो भिक्षुर्न विहन्येत् स्पृष्टः केनापि कुत्रचित् ॥४६॥ इति ब्रवीमि ॥

## ॥ अथ चाउरङ्गीयं तृतीयमध्ययतम् ॥

चत्तारि परमङ्गाणि, दुल्लहाणीह जन्तुणो ।
माणुसत्तं सुई सद्धा, संजमम्मि य वीरियं ॥१॥

समावण्णा णं संसारे, णाणागोत्तासु जाइसु ।
कम्मा णाणाविहा कट्टु, पुट्टो विस्संभिया पया ॥२॥

एगया देवलोएसु, णरएसु वि एगया ।
एगया आसुरं कायं, अहाकम्मेहिं गच्छई ॥३॥

एगया खत्तिओ होइ, तओ चण्डालवोक्कसो ।
तओ कीडपयङ्गो य, तओ कुन्थुपिवीलिया ॥४॥

एवमावट्टजोणीसु, पाणिणो कम्मकिव्विसा ।
ण णिविज्जन्ति संसारे सव्वट्ठेसु व खत्तिया ॥५॥

कम्मसङ्गेहिं सम्मूढा, दुक्खिया बहुवेयणा ।
अमाणुसासु जोणीसु, विणिहम्मन्ति पाणिणो ॥६॥

---

चत्वारि परमाङ्गानि दुर्लभानीह जन्तोः । मानुषत्वं श्रुतिः श्रद्धा संयमे च वीर्यम् ॥१॥ समापन्नाः संसारे नानागोत्रासु जातिषु । कर्माणि नानाविधानि कृत्वा पृथग्विस्रम्भिताः ॥२॥ एकदा देवलोकेषु नरकेष्वप्येकदा । एकदाऽऽसुरं कायं यथाकर्मभिर्गच्छति ॥३॥ एकदा क्षत्रियो भवति ततश्चण्डालो बोक्कसः । ततः कीटः पतङ्गश्च ततः कुन्थुः पिपीलिका ॥४॥ एवमावर्तयोनिषु प्राणिनः कर्मकिल्बिषा । न निर्विद्यन्ते संसारे सर्वार्थेष्विव क्षत्रियाः ॥५॥ कर्मसंगैस्संमूढा दुःखिता बहुवेदनाः । अमानुष्यासु योनिषु विनिहन्यते प्राणिनः ॥६॥

कम्माणं तु पहाणीए, आणुपुव्वी कयाइ उ ।
जीवा सोहिमणुप्पत्ता, आययन्ति मणुस्सयं ॥७॥

माणुस्सं विग्गहं लद्धुं, सुइ धम्मस्स दुल्लहा ।
जं सोच्चा पडिवज्जन्ति, तवं खन्तिमहिंसयं ॥८॥

आहच्च सवगं लद्धुं, सद्धा परमदुल्लहा ।
सोच्चा णेआउयं मग्गं, बहवे परिभस्सई ॥९॥

सुइं च लध्धुं, सद्धं च, वीरियं पुण दुल्लहं ।
बहवे रोयमाणा वि,णो य णं पडिवज्जई ॥१०॥

माणुसत्तंमि आयाओ, जो धम्मं सोच्च सद्दहे ।
तवस्सी वीरियं लध्धुं, संवुडो निध्धुणे रयं ॥११॥

सोही उज्जुभूयस्स, धम्मो सुद्धस्स चिट्ठई ।
णिव्वाणं परमं जाइ, धयसित्तेव पावए ॥१२॥

विगिंच कम्मुणो हेउं, जसं संचिणु खन्तिए ।
पाढवं सरीरं हिच्चा, उड्ढं पक्कमई दिसं ॥१३॥

---

कर्मणां तु प्रहान्याऽऽनुपूर्व्या कदाचिदेव । जीवाश्शुद्धिमनुप्राप्ताः आददते मनुष्यताम् ॥७॥ मानुष्यकं विग्रहं लब्ध्वापि, श्रुतिर्धर्मस्य दुर्लभा । यच्छ्रुत्वा प्रतिपद्यन्ते तपः क्षान्तिमहिंस्रताम् ॥८॥ आहत्य श्रवणं लब्ध्वापि, श्रद्धा परमदुर्लभा। श्रुत्वा नैयायिकं मार्गं बहवः परिभ्रश्यन्ति, ॥९॥ श्रुतिं च लब्ध्वाऽपि श्रद्धां च वीर्यं पुनर्दुर्लभम् । बहवो रोचमाना अपि नैव (नो एतं) प्रतिपद्यन्ते ॥१०॥ मानुष्यत्वे आयातः यो धर्मं श्रुत्वा श्रद्धते । तपस्वी वीर्यं लब्ध्वा संवृतो निर्धुनोति रजः ॥११॥ शुद्धी ऋजुभूतस्य धर्मश्शुद्धस्य तिष्ठति । निर्वाणं परमं याति घृत सिक्त इव पावकः ॥१२॥ वेविग्धि कर्मणो हेतुं यशस्सञ्चिनु क्षान्त्या । पार्थिवं शरीरं हित्वा ऊर्ध्वं प्रक्रामति दिशम् ॥१३॥

विसालिसेहिं सीलेहिं, जक्खा उत्तरउत्तरा ।
महासुक्का व दिप्पन्ता, मण्णन्ता अपुणच्चयं ॥१४॥
अप्पिया देवकामा णं, कामरूवविउव्विणो ।
उड्ढं कप्पेसु चिट्ठन्ति, पुव्वा वाससया बहू ॥१५॥
तत्थ ठिच्चा जहाठाणं, जक्खा आउक्खए चुया ।
उवेन्ति माणुसं जोणिं, से दसङ्गेऽभिजायए ॥१६॥
खित्तं वत्थुं हिरण्णं च, पसवो दास-पोरुसं ।
चत्तारि कामखन्धाणि, तत्थ से उववज्जई ॥१७॥
मित्तवं नाइवं होइ, उच्चागोए य वण्णवं;
अप्पायङ्के महापण्णे, अभिजाए जसो बले ॥१८॥
भोच्चा माणुस्सए भोए, अप्पडिरूवे अहाउयं ।
पुव्विं विसुद्धसद्धम्मे, केवलं बोहि बुज्झिया ॥१९॥
चउरङ्गं दुल्लहं मच्चा, संजमं पडिवज्जिया;
तवसा धुतकम्मंसे, सिद्धे हवइ सासए ॥२०॥ त्ति बेमि

॥ तइयं चाउरङ्गिज्जं अज्झयणं सम्मत्तं ॥ ३ ॥

---

विसदृशैरशीलैर्यक्षा उत्तरोत्तराः । महाशुक्ला इव दीप्यमानाः मन्यमाना अपुनश्च्यवम् ॥१४॥ अर्पिता देवकामाः कामरूपविकरणाः ऊर्ध्वं कल्पेषु तिष्ठन्ति पूर्वाणि वर्षशतानि बहूनि ॥१५॥ तत्र स्थित्वा यथा स्थानं यक्षा आयुःक्षये च्युताः । उपयन्ति मानुषीं योनिं स दशाङ्गोऽभिजायते ॥१६॥ क्षेत्रं वास्तु हिरण्यं च पशवो दासाः पौरुषेयम् । चत्वारः कामस्कन्धाः तत्र स उपपद्यते ॥१७॥ मित्रवान् ज्ञातिमान् भवति उच्चैर्गोत्रश्च वर्णवान् । अल्पातङ्को महाप्रज्ञः अभिजातो यशस्वी बली ॥१८॥ मुक्त्वा मानुष्यकान् भोगान् अप्रतिरूपान् यथायुः । पूर्वं विशुद्धसद्धर्मा केवलां बोधिं बुध्वा ॥१९॥ चतुरङ्गीं दुर्लभां मत्वा संयमं प्रतिपद्य । तपसा धूतकर्मांशः सिद्धो भवति शाश्वतः ॥२०॥ इति ब्रवीमि ॥

॥ अथासंस्कृताख्यं चतुर्थमध्ययनम् ॥

असंखयं जीविय मा पमाए, जरोवणीयस्स हु णत्थि ताणं;
एवं वियाणाहि जणे पमत्ते, किण्णू विहिंसा अजया गहिन्ति ॥१॥

जे पावकम्मेहि धणं मणूसा, समाययन्ती अमइं गहाय;
पहाय ते पास पयट्टिए णरे, वेराणुबद्धा णरयं उवेन्ति ॥२॥

तेणे जहा संधिमुहे गहीए, सकम्मुणा किच्चइ पावकारी;
एवं पया पेच्च इहं च लोए, कडाण कम्माण? ण मोक्खु अत्थि ॥३॥

संसारमावण्ण परस्स अट्ठा, साहारणं जं च करेइ कम्मं;
कम्मस्स ते तस्स उ वेयकाले, ण बन्धवा बन्धवयं उवेन्ति ॥४॥

वित्तेण ताणं ण लभे पमत्तो, इमम्मि लोए अदुवा परत्थ; ।
दीवप्पणट्ठे व अणन्तमोहे, णेयाउयं दट्ठुमदट्ठुमेव ॥५॥

सुत्तेसु यावी पडिबुद्धजीवी, ण वीससे पण्डिय आसुपण्णे;
घोरा मुहुत्ता अबलं सरीरं, भारण्डपक्खी व चरऽप्पमत्तो ॥६॥

---

असंस्कृतं जीवितं मा प्रमादीः जरोपनीतस्य खलु नास्ति त्राणम् । एवं विजानीहि जनाः प्रमत्ताः किं नु विहिंसा अयता ग्रहीष्यन्ति ॥१॥ ये पापकर्मभिर्धनं मनुष्याः समाददते अमतिं गृहीत्वा । प्रहित्वा ते पश्य प्रवर्तितान् नरान् वैरानुबद्धा नरकमुपयन्ति ॥२॥ स्तेनो यथा सन्धिमुखे गृहीतः स्वकर्मणा कृत्यते पापकारी । एवं प्रजा प्रत्येह च लोके कृतानां कर्मणां न मोक्षोऽस्ति ॥३॥ संसारमापन्नः परस्यार्थं साधारणं यच्च करोति कर्म । कर्मणस्ते तस्य तु वेदकाले न बान्धवा बान्धवतामुपयन्ति ॥४॥ वित्तेन त्राणं न लभते प्रमत्तोऽस्मिल्लोकेऽथवा परत्र । प्रनष्टदीप इवानन्तमोहः नैयायिकं दृष्ट्वाऽदृष्ट्वेव ॥५॥ सुप्तेष्वपि प्रतिबुद्धजीवी न विश्वस्यात् पण्डित आशुप्रज्ञः । घोरा मुहूर्ता अबलं शरीरं भारण्डपक्षीव चराप्रमत्तः ॥६॥

चरे पयाइं परिसङ्कमाणो, जं किञ्चि पासं इह मण्णमाणो;
लाभन्तरे जीविय वूहइत्ता, पच्छा परिण्णाय मलावधंसी ॥७॥

छन्दं णिरोहेण उवेइ मोक्खं, आसे जहा सिक्खियवम्मधारी;
पुव्वाइ वासाइ चरऽप्पमत्तो, तम्हा मुणी खिप्पमुवेइ मोक्खं ॥८॥

स पुव्वमेवं ण लभेज्ज पच्छा, एसोवमा सासयवाइयाणं;
विसीदई सिढिले आउयंमि, कालोवणीए सरीरस्स भेदे ॥९॥

खिप्पं ण सक्केइ विवेगमेउं, तम्हा समुट्ठाय पहाय कामे;
समिच्च लोगं समया महेसी, अप्पाणरक्खी चरमप्पमत्तो ॥१०॥

मुहुं मुहुं मोहगुणे जयन्तं, अणेगरूवा समणं चरन्तं;
फासा फुसन्ती असमञ्जसं च, ण तेसु भिक्खू मणसा पउस्से ॥११॥

मन्दा य फासा बहुलोहणिज्जा, तहप्पगारेसु मणं ण कुज्जा;
रक्खिज्ज कोहं विणएज्ज माणं, मायं ण सेवेज्ज पयहिज्ज लोहं ॥१२॥

---

चरेत् पदानि परिशङ्कमाणः यत्किञ्चित् पाशमिह मन्यमानः। लाभान्तरे जीवितं बृंहयित्वा पश्चात् परिज्ञाय मलापध्वंसी ॥७॥ छन्दोनिरोधेनोपैति मोक्षं अश्वो यथा शिक्षितो वर्मधारी। पूर्वाणि चराऽप्रमत्तः तस्मान्मुनिः क्षिप्रमुपैति मोक्षम् ॥८॥ स पूर्वमेवं न लभेत् पश्चात् एषोपमा शाश्वतवादिनाम्। विषीदति शिथिलयति आयुषि कालोपनीते शरीरस्य भेदे ॥९॥ क्षिप्रं न शक्नोति विवेकमेतुं तस्मात्समुत्थाय प्रहित्वा कामान्। समेत्य लोकं समतया महर्षी आत्मरक्षी चराऽप्रमतः ॥१०॥ मुहुर्मुहुः मोहगुणान् जयन्तमनेकरूपाः श्रमणं चरन्तम्। स्पर्शाः स्पृशन्त्यसमंजसं च न तेषु भिक्षुः मनसा प्रदूष्येत् ॥११॥ मन्दाश्च स्पर्शा बहु लोभनीयाः तथाप्रकारेषु मनो न कुर्यात्। रक्षयेत् क्रोधं विनयेन्मानं मायां न सेवेत परित्यजेल्लोभम् ॥१२॥

जे संखया तुच्छ परप्पवाई, ते पिज्जदोसाणुगया परज्झा;
एते अहम्मे त्ति दुगुञ्छमाणो, कंङ्खे गुणे जाव सरीरभेओ ॥१३॥ त्ति बेमि

॥४॥ चउत्थं असंखयज्झयणं सम्मत्तं

---

ये संस्कृतास्तुच्छपरप्रवादिनः ते प्रेमद्वेषानुगताः परवशाः। एते अधर्म इति जुगुप्समानः काङ्क्षेद् गुणान् यावच्छरीरभेदः ॥ इति ब्रवीमि ॥

॥ असंस्कृताख्यं चतुर्थमध्ययनं समाप्तम् ॥

॥ अथाकाममरणाख्यं पञ्चममध्ययनम् ॥

अण्णवंसि महोहंसि, एगे तरति दुरुत्तरं;
तत्थ एगे महापण्णे, इमं पण्हमुदाहरे ॥१॥
संतिमे य दुवे ठाणा, अक्खाया मारणन्तिया,
अकाममरणं चेव, सकाममरणं तहा ॥२॥
बालाणं तु अकामं तु, मरणं असइं भवे,
पंडियाणं सकामं तु, उक्कोसेण सइं भवे ॥३॥
तत्थिमं पढमं ठाणं, महावीरेण देसियं;
कामगिद्धे जहा बाले, भिसं कूराइं कुव्वई ॥४॥
जे गिद्धे कामभोगेसु, एगे कूडाय गच्छइ;
ण मे दिट्ठे परे लोए, चक्खूदिट्ठा इमा रई ॥५॥
हत्थागया इमे कामा, कालिया जे अणागया;
को जाणइ परे लोए, अत्थि वा णत्थि वा पुणो ॥६॥
जणेण सद्धिं होक्खामि, इइ बाले पगब्भई;
काम-भोगाणुराणेणं, केसं संपडिवज्जई ॥७॥

---

अर्णवे महौघ एकस्तरति दुरुत्तरम्। तत्रैको महाप्रज्ञः इमं प्रश्नमुदाहरेत् ॥१॥ स्तः इमे द्वे स्थाने आख्याते मारणान्तिके। अकाममरणं सकाममरणं तथा ॥२॥ बालानामकामं तु मरणमसकृद् भवेत् पण्डितानां सकामं तु उत्कर्षेण सकृद्भवेत् ॥३॥ तत्रेदं प्रथमं स्थानं महावीरेण देशितम्। कामगृद्धो यथा बालः भृशं क्रूराणि करोति ॥४॥ यो गृद्धः कामभोगेषु एकः कूटाय गच्छति। न मया दृष्टः परलोकः चक्षुर्दृष्टेयं रतिः ॥५॥ हस्तागता इमे कामाः कालिका येऽनागताः। को जानाति परलोकः अस्ति वा नास्ति वा पुनः ॥६॥ जनेन सार्धं भविष्यामि इति बालः प्रगल्भते। कामभोगानुरागेन क्लेशं सम्प्रतिपद्यते ॥७॥

तओ दण्डं समारभई, तसेसु थावरेसु य;
अट्ठाए य अणट्ठाए, भूयगामं विहिंसइ ॥८॥

हिंसे बाले मुसावाई, माइल्ले पिसुणे सढे;
भूञ्जमाणे सुरं मंसं, 'सेयमेयं' ति मण्णई ॥९॥

कायसा वयसा मत्ते, वित्ते गिद्धे य इत्थिसु;
दुहओ मलं संचिणइ, सिसुणागो व्व मट्टियं ॥१०॥

तओ पुट्ठो आयङ्केण गिलाणो परितप्पई;
पभीओ परलोगस्स, कम्माणुप्पेही अप्पणो ॥११॥

सुया मे णरए ठाणा, असीलाणं च जा गई;
बालाणं कूरकम्माणं, पगाढा जत्थ वेयणा ॥१२॥

तत्थोववाइयं ठाणं जहा मे तमणुस्सुयं;
आहाकम्मेहिं गच्छन्तो, सो पच्छा परितप्पई ॥१३॥

जहा सागडिओ जाणं; समं हिच्चा महापहं;
विसमं मग्गमोइण्णो, अक्खभग्गम्मि सोयइ ॥१४॥

---

ततः स दण्डं समारभते त्रसेषु स्थावरेषु च। अर्थाय चानर्थाय भूतग्रामं विहिनस्ति ॥८॥ हिंस्रो बालो मृषावादी मायावान् पिशुनश्शठः। भुञ्जानः सुरां मांसं श्रेयमेतदिति मन्यते ॥९॥ कायेन वचसा मत्तः वित्ते गृद्धश्च स्त्रीषु। द्विधा मलं संचिनोति शिशुनाग इव मृत्तिका ॥१०॥ ततः स्पृष्ट आतङ्केन ग्लानः परितप्यते। प्रभीतः परलोकात् कर्मानुपश्यात्मनः ॥११॥ श्रुतानि मया नरके स्थानानि अशीलानां च या गतिः। बालानां क्रूरकर्मणां प्रगाढा यत्र वेदनाः ॥१२॥ तत्रौपपातिकं स्थानं यथा मया तदनुश्रुतम्। आधाकर्मभिः गच्छन् स पश्चात् परितप्यते ॥१३॥ यथा शाकटिको जानन् समं हित्वा महापथम्। विषमं मार्गमवतीर्णः अक्षे भग्ने शोचते ॥१४॥

एवं धम्मं विउक्कम्म, अहम्मं पडिवज्जिया;
बाले मच्चुमुहं पत्ते, अक्खे भग्गे व सोयइ ॥१५॥

तओ से मरणन्तंमि, बाले सन्तससई भया;
अकाममरणं मरई, धुत्ते व कलिणा जिए ॥१६॥

एयं अकाममरणं, बालाणं तु पवेइयं;
एत्ते सकाममरणं, पण्डियाणं सुणेह मे ॥१७॥

मरणं पि सपुण्णाणं, जहा मे तमणुस्सुयं;
विप्पसण्णमणाघायं, संजयाणं वुसीमओ ॥१८॥

ण इमं सव्वेसु भिक्खूसु, ण इमं सव्वेसु गारिसु;
णाणासीला य अगारत्था, विसमसीला य भिक्खुणो ॥१९॥

सन्ति एगेहि भिक्खूहिं, गारत्था संजमुत्तरा;
गारत्थेहि य सव्वेहिं, साहवो संजमुत्तरा ॥२०॥

चीराजिणं णिगिणिणं, जडी संघाडि मुंडिणं;
एयाइंपि ण तायन्ति, दुस्सीलं परियागयं ॥२१॥

---

एवं धर्मं व्युत्क्रम्य अधर्मं प्रतिपद्य। बालो मृत्युमुखं प्राप्तो अक्षे भग्न इव शोचति ॥१५॥ ततस्स मरणान्ते बालस्संत्रस्यति भयात्। अकाममरणेन म्रियते धूर्त इव कलिना जितः ॥१६॥ एतदकाममरणं बालानां तु प्रवेदितम्। इतस्सकाममरणम्, पण्डितानां श्रृणुत मे ॥१७॥ मरणमपि स पुण्यानां यथा मे तदनुश्रुतम्। विप्रसन्नमनाघातं संयतानां वश्यवताम् ॥१८॥ नेदं सर्वेषु भिक्षुषु नेदं सर्वेष्वगारिषु। नानाशीलाश्चागारस्थाः विषमशीलाश्च भिक्षवः ॥१९॥ सन्त्येकेभ्यो भिक्षुभ्यः अगारस्थास्संयमोत्तराः। अगारस्थेभ्यश्च सर्वेभ्यः साधवस्संयमोत्तराः ॥२०॥ चिराजिनं नाग्न्यं जटित्वं सङ्घाटी मुण्डित्वम्। एतान्यपि न त्रायन्ते दुःशीलं पर्यायागतम् ॥२१॥

पिण्डोलए व्व दुस्सीलो, णरगाओ ण मुच्चई,
भिक्खाए वा गिहत्थे वा, सुव्वए कमई दिवं ॥२२॥
अगारिसामाइयङ्गाणि, सड्ढी काएण फासए;
पोसहं दुहओ पक्खं, एगरायं ण हावए ॥२३॥
एवं सिक्खासमावण्णो, गिहिवासे वि सुव्वए ।
मुच्चई छवि-पव्वाओ, गच्छे जक्खसलोगयं ॥२४॥
अह जे संवुडे भिक्खू, दोण्हमण्णतरे सिया ।
सव्वदुक्खपहीणे वा, देवे वावि महिड्ढिए ॥२५॥
उत्तराइं विमोहाइं, जुइमन्ताऽणुपुव्वसो;
समाइण्णाइं जक्खेहिं, आवासाइं जसंसिणो ॥२६॥
दीहाउया इड्ढिमंता, समिद्धा कामरूविणो;
अहुणोववण्णसंकासा, भुज्जो अच्चिमालिप्पभा ॥२७॥
ताइं ठाणाइं गच्छन्ति, सिक्खित्ता संजमं तवं;
भिक्खाए वा गिहित्थे वा, जे सन्ति परिनिव्वुडा ॥२८॥

---

पिण्डावलगोऽपि दुःशीलः नरकान्न मुच्यते। भिक्षुको वा गृहस्थो वा सुव्रतः क्रामति दिवम् ॥२२॥ अगारिसामायिकाङ्गानि श्रद्धावान् कायेन स्पृशति। पौषधं द्वयोः पक्षयोः एकरात्रमपि न हापयति ॥२३॥ एवं शिक्षा समापन्नो गृहवासेऽपि सुव्रतः। मुच्यते छविपर्वतः गच्छेद्यक्षसलोकताम् ॥२४॥ अथ यस्संवृतो भिक्षुःद्वयोरेकतरःस्यात्। सर्वदुःख-प्रहीणो वा देवो वापि महर्द्धिकः ॥२५॥ उत्तरा विमोहा द्युतिमन्त अनुपूर्वतः। समाकीर्णा यक्षैरावासाः यशस्विनः ॥२६॥ दीर्घायुषो दीप्ति (ऋद्धि) मन्तः समृद्धाः कामरूपिणः। अधुनोत्पन्नसङ्काशाः भूयोऽर्चिमालिप्रभाः ॥२७॥ तानि स्थानानि गच्छन्ति शिक्षित्वा संयमं तपः। भिक्षाको वा गृहस्थो वा ये सन्ति परिनिवृताः ॥२८॥

तेसिं सोच्चा सपुज्जाणं, संजयाणं वुसीमओ;
ण संतसन्ति मरणन्ते, सीलमन्तो बहुस्सुया ॥२९॥

तुलिया विसेसमादाय, दयाधम्मस्स खन्तिए;
विप्पसीएज्ज मेहावी, तहा भूएण अप्पणा ॥३०॥

तओ काले अभिप्पेए, सड्ढी तालिसमन्तिए;
विणएज्ज लोमहरिसं, भेयं देहस्स कंखए ॥३१॥

अह कालम्मि संपत्ते, आघायाय समुस्सयं;
सकाममरणं मरइ, तिण्हमण्णयरं मुणि ॥३२॥ त्ति बेमि ॥

पंचमं अकाममरणिज्जं अज्झयणं समत्तं ॥ ५ ॥

---

तेषां श्रुत्वा सत्पूज्यानां संयतानां वश्यव्रताम् । न संत्रस्यन्ति मरणान्ते शीलवन्तो बहुश्रुताः ॥२९॥ तोलयित्वा विशेषमादाय दयाधर्मस्य भक्षन्त्या । विप्रसीदेन्मेधावी तथा भूतेनात्मना ॥३०॥ ततःकालेऽभिप्रेते श्रद्धावान् तादृशोऽन्तिके । विनयेल्लोमहर्षम् भेदं देहस्य काङ्क्षयेत् ॥३१॥ अथ काले सम्प्राप्ते आधातयन् समुच्छ्रयम् । सकाममरणं म्रियते त्रयाणामन्यतरेण मुनिः ॥३२॥ इति ब्रवीमि ॥

॥ अथ क्षुल्लकनिर्ग्रन्थीयाख्यं षष्ठमध्ययनम् ॥

जावन्तऽविज्जा पुरिसा, सव्वे ते दुक्खसंभवा;
लुप्पन्ति बहुसो मूढा, संसारम्मि अणन्तए ॥१॥
समिक्ख पण्डिए तम्हा, पासजाईपहे बहु;
अप्पणा सच्चमेसेज्जा, मेत्तिं भूएसु कप्पए ॥२॥
माया पिया ण्हुसा भाया, भज्जा पुत्ता य ओरसा;
नालं ते मम ताणाय, लुप्पन्तस्स सकम्मूणा ॥३॥
एयमट्ठं सपेहाए, पासे समियदंसणे;
छिन्द गिद्धिं सिणेहं च, ण कङ्खे पुव्वसंथवं ॥४॥
गवासं मणि-कुंडलं, पसवो दास-पोरुसं;
सव्वमेयं चइत्ताणं, कामरुवी भविस्ससि ॥५॥
(थावरं जंगमं चेव, धणं धण्णं उवक्खरं;
पच्चमाणस्स कम्मेहिं, णालं दुक्खाओ मोयणे)

---

यावन्तोऽविद्यापुरुषाः सर्वे ते दुःखसम्भवाः। लुप्यन्ते बहुशो मूढाः संसारेऽनन्तके ॥१॥ समीक्ष्य पण्डितस्तस्मात् पाशजातिपथान् बहून्। आत्मना सत्यमेषयेत् मैत्रीं भूतेषु कल्पयेत् ॥२॥ माता पिता स्नुषा भ्राता भार्या पुत्राश्चौरसाः। नालं ते मम त्राणाय लुप्यमानस्य स्वकर्मणा ॥३॥ एतदर्थं संप्रेक्षया पश्येत् समितदर्शनः। छिन्द्यात् गृद्धिं स्नेहं च नैव काङ्क्षेत् पूर्वसंस्तवम् ॥४॥ गवाश्वं मणिकुण्डलं पशवो दासपौरुषम्। सर्वमेतत्त्यक्त्वा कामरूपी भविष्यसि ॥५॥ (स्थावरं जङ्गमं चैव धनं धान्यमुपस्कृतम्। पच्यमानस्य कर्मभिः नालं दुःखान्मोचने )

अज्जत्थं सव्वओ सव्वं, दिस्स पाणे पियायए ।
ण हणे पाणिणो पाणे, भय-वेराओ उवरए ॥६॥
आदाणं णरयं दिस्स, णायएज्ज तणामवि ।
दोगुंछी अप्पणो पाए, दिण्णं भुंजेज्ज भोयणं ॥७॥
इहमेगे उ मण्णन्ति, अप्पच्चक्खाय पावगं ।
आयरियं विदित्ता णं, सव्वदुक्खा विमुच्चई ॥८॥
भणन्ता अकरेन्ता य, बन्धमोक्खपइण्णिणो;
वायाविरियमेत्तेणं, समासासेन्ति अप्पयं ॥९॥
ण चित्ता तायए भासा, कुओ विज्जाणुसासणं;?
विसण्णा पावकम्मेहिं, बाला पंडियमाणिणो ॥१०॥
जे केइ सरीरे सत्ता, वण्णे रूवे य सव्वसो;
मणसा काय वक्केणं, सव्वे ते दुक्खसंभवा ॥११॥
आवण्णा दीहमद्धाणं संसारम्मि अणन्तए;
तम्हा सव्वदिसं पस्स अप्पमत्तो परिव्वए ॥१२॥

---

अध्यात्मस्थं सर्वतस्सर्वं दृष्ट्वा प्राणान् प्रियदयान् । न हन्यात् प्राणिनां प्राणान् भयवैरादुपरतः ॥६॥ आदानं नरकं (दृष्ट्वा) नाददीत तृणमपि । जुगुप्सात्मनः पात्रे दत्तं भुञ्जीत भोजनम् ॥७॥ इहैके तु मन्यन्ते अप्रत्याख्याय पापकम् । आर्यं विदित्वा सर्वदुःखेभ्यो विमुच्यते ॥८॥ भणन्तोऽकुर्वन्तश्च बन्धमोक्षप्रतिज्ञावन्तः । वाग्वीर्यमात्रेण समाश्वासयन्त्वात्मानम् ॥९॥ न चित्रा त्रायते भाषा कुतो विद्यानुशासनम् । विषण्णाः पापकर्म्मसु बालाः पण्डितमानिनः ॥१०॥ ये केचिच्छरीरे सक्ताः वर्णे रूपे च सर्वथा । मनसा कायवाक्येन सर्वे ते दुःखसम्भवाः ॥११॥ आपन्ना दीर्घमध्वानं संसारेऽनन्तके । तस्मात् सर्वं दिशः पश्यन्नप्रमत्तः परिव्रजेः ॥१२॥

बहिया उड्ढमादाय, णावकंखे कयाइ वि;
पुव्वकम्मखयट्ठाए, इमं देहं समुद्धरे ॥१३॥
विविच्च कम्मुणो हेउं, कालकंखी परिव्वए;
मायं पिण्डस्स पाणस्स, कडं लद्धूण भक्खए ॥१४॥
सण्णिहिं च ण कुव्वेज्जा, लेवमायाए संजए;
पक्खी पत्तं समादाय, णिरवेक्खो परिव्वए ॥१५॥
एसणासमिओ लज्जू, गामे अणियओ चरे;
अप्पमत्तो पमत्तेहिं, पिण्डवायं गवेसए ॥१६॥
एवं से उदाहु अणुत्तरनाणी अणुत्तरदंसी
अणुत्तरणाणदंसणधरे अरहा णायपुत्ते भगवं वेसालिए वियाहिए॥त्ति बेमि॥

॥ छट्ठं खुड्डागनियण्ठिज्जमज्झयणं समत्तं ॥६॥

---

बहिरूर्ध्वमादाय नावकाङ्क्षेत् कदाचिदपि । पूर्वकर्म्मक्षयार्थयिमं देहं समुद्धरेत् ॥१३॥ विविच्य कर्म्मणो हेतुं कालकाङ्क्षी परिव्रजेः । मात्रां पिण्डस्य पानस्य कृतं लब्ध्वा भक्षयेत् ॥१४॥ ०न्निधिं च न कुर्वीत लेपमात्रया संयतः । पक्क्षी (व) पत्रं समादाय निरपेक्षः परिव्रजेत् ॥१५॥ एपणासमितो लज्जावान् ग्रामेऽनियतश्चरेत् । अप्रमतः प्रमत्तेभ्यो पिण्डपातं गवेषयेत् ॥१६॥ एवं स उदाहृतवान् अनुत्तरज्ञान्यनुत्तरज्ञानदर्शनधरः अर्हन् ज्ञातपुत्रो भगवान् वैशालिको व्याख्याता ॥ इति ब्रवीमि ॥६॥ क्षुल्लकनिर्ग्रन्थीयाख्यमध्ययनं समाप्तम् ॥

॥ अथोरभ्रियाख्यं सप्तममध्ययनम् ॥

जहाऽऽएसं समुद्दिस्स, कोइ पोसेज्ज एलयं;
ओदणं जवसं देज्जा, पोसेज्जा वि सयङ्गणे ॥१॥
तओ स पुट्ठे परिवूढे, जायमेदे महोदरे;
पीणिए विउले देहे, आएसं परिकङ्खए ॥२॥
जाव ण एइ आएसो, ताव जीवइ सेदुही;
अह पत्तंमि आएसे, सीसं छेत्तूण भुज्झई ॥३॥
जहा खलु से ओरब्भे, आएसाय समीहिए;
एवं बाले अहम्मिट्ठे, ईहइ णिरयाउयं ॥४॥
हिंसे बाले मुसावाई, अद्धाणम्मि विलोवए;
अण्णऽदत्तहरे तेणे, माई कण्हुहरे सढे ॥५॥
इत्थीविसयगिद्धे य महारम्भपरिग्गहे;
भुञ्जमाणे सुरं मंसं, परिवूढे परंदमे ॥६॥
अयकक्करभोई य, तुन्दिले चिय लोहिए;
आउयं णरए कङ्खे, जहाऽऽएसं व एलए ॥७॥

---

यथाऽऽदेशं समुद्दिश्य कश्चित् पोषयेदेलकम् । ओदनं यवसं दद्यात् पोषयेदपि स्वकाङ्गणे ॥१॥ ततस्स पुष्टः परिवृढः जातमेदा महोदरः । प्रीणिते विपुले देहे आदेशं प्रतिकाङ्क्षति ॥२॥ यावन्नायात्यादेशो तावज्जीवति सो दुःखी । अथ प्राप्त आदेशे शिरश्छित्वा भुज्यते ॥३॥ यथा खलु स उरभ्रः आदेशार्थं समीहितः । एवं बालोऽधर्मिष्ठ ईहते नरकायुष्कम् ॥४॥ हिंस्रो बालो मृषावादी अध्वनि विलोपकः । अन्याऽदत्तहरस्तेनः मायी कहणुहरश्शठः ॥५॥ स्त्री विषयगृद्धश्च महारम्भपरिग्रहः । भुञ्जानः सुरां मांसं परिवृढः परन्दमः ॥६॥ अजकर्करभोजीच तुन्दिलश्चितलोहितः । आयुष्कं नरके काङ्क्षति यथाऽऽदेशमिवैडकः ॥७॥

आसणं सयणं जाणं, वित्तं कामे य भुंजिया;
दुस्साहडं धणं हिच्चा, बहुं संचिणिया रयं ॥८॥
तओ कम्मगुरू जन्तू, पच्चुप्पण्णपरायणे;
अय व्व आगयाऽऽएसे, मरणन्तम्मि सोयइ ॥९॥
तओ आउपरिक्खीणे, चुया देहा विहिंसगा;
आसुरियं दिसं बाला, गच्छंति अवसा तमं ॥१०॥
जहा कागिणिए हेउं, सहस्सं हारए णरो;
अपत्थं अम्बगं भोच्चा, राया रज्जं तु हारए ॥११॥
एवं माणुस्सगा कामा, देवकामाण अन्तिए;
सहस्सगुणिया भुज्जो, आउं कामा य दिव्विया ॥१२॥
अणेगवासाणउया; जा सा पण्णवओ ठिइ;
जाणि जीयन्ति दुम्मेहा, ऊणे वाससताउए ॥१३॥
जहा य तिण्णि वणिया, मूलं घेत्तूण णिग्गया;
एगोऽत्थ लहए लाभं, एगो मूलेण आगओ ॥१४॥

---

आसनं शयनं यानं वित्तं कामान् भुक्त्वा । दुःसंहृतं धनं हित्वा बहु सञ्चित्य रजः ॥८॥ ततः कर्मगुरुर्जन्तुः प्रत्युत्पन्नपरायणः । अज इवागत आदेशे मरणान्ते शोचति ॥९॥ तत आयुषि परिक्षीणे च्युतदेहो विहिंसकः । असूर्यां दिशं बालो गच्छत्यवशस्तमः ॥१०॥ यथा काकिण्या हेतोः सहस्रं हारयेन्नरः । अपथ्यमाम्रकं भुक्त्वा राजा राज्यं तु हारयेत् ॥११॥ एवं मानुष्यकाः कामाः देवकामानामन्तिके । सहस्रगुणिता भूयः आयुःकामाश्च दिव्याः ॥१२॥ अनेकवर्षनयुतानि या सा प्रज्ञावतस्स्थितिः । यानि जीयन्ते दुर्मेधसः ऊने वर्षशतायुषि ॥१३॥ यथा च त्रयो वणिजः मूलं गृहीत्वा निर्गताः । एकोऽत्र लभते लाभं एको मूलेनागतः ॥१४॥

एगो मूलं पि हारित्ता, आगओ तत्थ वाणिओ ।
ववहारे उवमा एसा, एवं धम्मे वियाणह ॥१५॥

माणुसत्तं भवे मूलं, लाभो देवगई भवे ।
मूलच्छेएण जीवाणं, णरग-तिरिक्खत्तणं धुवं ॥१६॥

दुहओ गई बालस्स, आवई वहमूलिया ।
देवत्तं माणुसत्तं च, जं जिए लोलयासढे ॥१७॥

तओ जिए सई होइ, दुविहं दोग्गइं गए ।
दुल्लहा तस्स उम्मग्गा, अद्धाए सुचिरादवि ॥१८॥

एवं जियं संपेहाए, तुलिया बालं च पंडियं ।
मूलियं ते पविसन्ति, माणुसं जोणिमिन्ति जे ॥१९॥

वेमायाहिं सिक्खाहिं, जे णरा गिहि-सुव्वया ।
उवेंति माणुसं जोणिं, कम्मसच्चा हु पाणिणो ॥२०॥

जेसिं तु विउला सिक्खा, मूलयंते अइच्छिया ।
सीलवन्ता सवीसेसा, अदीणा जन्ति देवयं ॥२१॥

---

एको मूलमपि हारयित्वा आगतस्तत्र वणिक् । व्यवहार उपमैषा एवं धर्मे विजानीत ॥१५॥ मानुषत्वं भवेन्मूलं लाभो देवगतिर्भवेत् । मूलच्छेदेन जीवानां नरक तिर्यक्त्वं ध्रुवम् ॥१६॥ द्विधा गतिर्बालस्यापतति वधमूलिका । देवत्वं मानुषत्वं च यज्जितो लोलताशठः ॥१७॥ ततो जितस्सदा भवति द्विविधां दुर्गतिं गतः । दुर्लभा तस्योन्मज्जा काले सुचिरादपि ॥१८॥ एवं जितं संप्रेक्ष्य तोलयित्वा बालं च पण्डितम् । मौलिकं ते प्रवेशयन्ति मानुषीं योनिमायान्ति ये ॥१९॥ विमात्राभिश्शिक्षाभिः ये नरा गृहिसुव्रताः । उपयन्ति मानुषीं योनिं कर्मसत्याः खलु प्राणिनः ॥२०॥ केषां तु विपुला शिक्षा मौलिकं तेऽतिक्रान्ताः । शीलवन्तस्सविशेषाः अदीना यान्ति दैवतम् ॥२१॥

एवमदीणवं भिक्खुं अगारिं च वियाणिया ।
कहं णु जिच्चमेलिक्खं, जिच्चमाणो ण संविदे ॥२२॥

जहा कुसग्गे उदगं, समुद्देण समं मिणे ।
एवं माणुस्सगा कामा, देवकामाण अंतिए ॥२३॥

कुसग्गमित्ता इमे कामा, सण्णिरुद्धम्मि आउए ।
कस्स हेउं पुरेकाउं, जोगक्खेमं ण संविदे ॥२४॥

इह कामाऽणियट्टस्स, अत्तट्ठे अवरज्झइ ।
सुच्चा णेयाउयं मग्गं, जं भुज्जो परिभस्सई ॥२५॥

इह कामणियट्टस्स, अत्तट्ठे णावरज्झई ।
पूतिदेहणिरोहेणं, भवे देवेत्ति मे सुयं ॥२६॥

इड्ढी जुई जसो वण्णो, आउं सुहमणुत्तरं ।
भुज्जो जत्थ मणुस्सेसु, तत्थ से उववज्जई ॥२७॥

बालस्स पस्स बालत्तं, अहम्मं पडिवज्जिया ।
चिच्चा धम्मं अहम्मिट्ठे, णरए सूववज्जई ॥२८॥

---

एवमदीनवन्तं भिक्षुमगारिणं च विज्ञाय। कथं नु जीयेतेदृक्षं जीयमानो न संविन्ते ॥२२॥ यथा कुशाग्र उदकं समुमुद्रेण समं मिनुयात्। एवं मानुष्यकाः देवकामानामन्तिके ॥२३॥ कुशाग्रमात्रा इमे कामाः संनिरूद्धे आयुषि। कस्य हेतुं पुरस्कृत्य योगक्षेमं न संविन्ते ॥२४॥ इह कामऽनिवृत्तस्यात्मार्थोऽपराध्यति। श्रुत्वा नैयायिकं मार्गं यत् भूयः परिभ्रश्यति ॥२५॥ इह कामेभ्यः निवृत्तस्यात्मार्थो नापराध्यति। पूतिदेहनिरोधेन भवे देव इति मया श्रुतम् ॥२६॥ ऋद्धिर्द्युतिर्यशोवर्णः आयुस्सुखमनुत्तरम्। भूयो येषु मनुष्येषु तत्राथोत्पद्यते ॥२७॥ बालस्य पश्य बालत्वं अधर्मं प्रतिपद्य। त्यक्त्वा धर्ममधर्मिष्ठः नरकेषूपपद्यते ॥२८॥

धीरस्स पस्स धीरत्तं, सव्वधम्माणुवत्तिणो ।
चिच्चा अधम्मं धम्मिट्ठे, देवेसु उववज्जई ॥२९॥
तुलिया णं बालभावं, अबालं चेव पण्डिए ।
चइऊण बालभावं, अबालं सेवए मुणि ॥३०॥ त्ति बेमि ॥

॥ ७ ॥ सत्तमं एलइज्झमज्झयणं समत्तं ॥

---

धीरस्य पश्य धीरत्वं सर्वधर्मानुवर्तिनः । त्यक्त्वाऽधर्मं धर्मिष्ठः देवेषूपपद्यते ॥२९॥ तोलयित्वा बालभावं, अबालं चैव पण्डितः । त्यक्त्वा बालभावं, अबालत्वं सेवते मुनिः ॥३०॥ इति ब्रवीमि ॥

## ॥ अथ कापिलीयाख्यमष्टममध्ययनम् ॥

अधुवे असासयम्मी, संसारम्मि दुक्खपउराए ।
किं णाम होज्ज तं कम्मयं, जेणाहं दोग्गइं ण गच्छेज्जा? ॥१॥
विजहित्तु पुव्वसंजोगं, ण सिणेहं कहिंचि कुव्वेज्जा ।
असिणेह सिणेहकरेहिं, दोस-पओसेहि मुच्चए भिक्खू ॥२॥
तो नाण-दंसण-समग्गो, हियनिस्सेसाए य सव्वजीवाणं ।
तेसिं विमोक्खणट्ठाए, भासई मुणिवरो विगयमोहो ॥३॥
सव्वं गंथं कलहं च, विप्पजहे तहाविहं भिक्खू ।
सव्वेसु कामजाएसु, पासमाणो ण लिप्पई ताई ॥४॥
भोगामिसदोसविसण्णे, हियणिस्सेयसबुद्धिवोच्चत्थे,
बाले य मन्दिए मूढे, बज्झइ मच्छिया व खेलम्मि ॥५॥
दुपरिच्चया इमे कामा, णो सुजहा अधीरपुरिसेहिं;
अह सन्ति सुव्वया साहू, जे तरन्ति अतरं वणिया व ॥६॥

---

अध्रुवे अशाश्वते संसारे दुःखप्रचुरे। किं नाम भवेत्तत्कर्मकं येनाहं दुर्गतिं न गच्छेयम् ॥१॥ विहाय पूर्वसंयोगं न स्नेहं क्वचित्कुर्वीत। अस्नेहस्स्नेहकरेषु दोषपदैर्मुच्यते भिक्षुः ॥२॥ ततो ज्ञानदर्शनसमग्रो हितनिःश्रेयसे च सर्वजीवानाम्। तेषां विमोक्षणार्थाय भाषते मुनिवरो विगतमोहः ॥३॥ सर्वं ग्रन्थं कलहं च विप्रजह्यात्तथाविधं भिक्षुः। सर्वेषु कामजातेषु प्रेक्षमाणो न लिप्यते त्रायी ॥४॥ भोगामिषदोषविषण्णो हितनिःश्रेयसबुद्धिविपर्यस्तः। मूढो बध्यते मक्षिकेव श्लेष्मणि ॥५॥ दुष्परित्यजा इमे कामा नैव सुत्यजा अधीरपुरुषैः। अथ सन्ति सुव्रतास्साधवो ये तरन्त्यतरं वणिज इव ॥६॥

समणा मु एगे वदमाणा, पाणवहं मिया अजाणंता ।
मंदा णिरयं गच्छन्ति पावियाहिं दिट्ठीहिं ॥७॥

ण हु पाणवहं अणुजाणे, मुच्चेज्ज कयाइ सव्वदुक्खाणं ।
एवमायरिएहि मक्खायं, जेहिं इमो साहुधम्मो पण्णत्तो ॥८॥

पाणे य णाइवाएज्जा, से समियत्ति वुच्चई ताई ।
तओ से पावयं कम्मं, णिज्जाइ उदगं व थलाओ ॥९॥

जगणिस्सिएहिं भूएहिं, तसणामेहिं थावरेहिं च ।
णो तेसिमारभे दण्डं, मणसा वयसा कायसा चेव ॥१०॥

सुद्धेसणा उ णच्चा णं, तत्थ ठवेज्ज भिक्खू अप्पाणं ।
जायाए घासमेसेज्जा, रसगिद्धे ण सिया भिक्खाए ॥११॥

पंताणि चेव सेवेज्जा, सीयपिंडं पुराणकुम्मासं ।
अदु वक्कसं पुलागं वा, जवणट्ठाए णिसेवए मंथुं ॥१२॥

जे लक्खणं च सुविणं च, अङ्गविज्जं च जे पउञ्जंति ।
ण हु ते समणा वुच्चंति, एवं आयरिएहिं अक्खायं ॥१३॥

---

श्रमणा वयमेके वदमानाः प्राणवधं मृगा अजानन्तः । मन्दा नरकं गच्छन्ति बालाः पापिकाभिर्दृष्टिभिः ॥७॥ नैव प्राणवधमनुजानन्मुच्येत कदाचित्सर्वदुःखैः । एवमार्यैराख्यातं यैरयं साधुधर्मः प्रज्ञप्तः ॥८॥ प्राणांश्च नातिपातयेत् स समित इत्युच्यते त्रायी । ततोऽथ पापकं कर्म निर्यात्युदकमिव स्थलात् ॥९॥ जगन्निश्रितेषु भूतेषु त्रसनामसु स्थावरेषु च । नैव तेष्वारभेद्दण्डं मनसा वचसा कायेन चैव ॥१०॥ शुद्धैषणास्तु ज्ञात्वा नु तत्र स्थापयेत् भिक्षुरात्मानम् । यात्रायै ग्रासमेषयेद् रसगृद्धो न स्यात् भिक्षादः ॥११॥ प्रान्तानि चैव सेवेत शीतपिण्डं पुराणकुल्माषं । अथवा बुक्कसं पुलाकं वा यापनार्थं निषेवेत मन्थुं ॥१२॥ ये लक्षणं च स्वप्नं चाङ्गविद्यां च ये प्रयुञ्जते । न हु ते श्रमणा उच्यन्ते एवमार्यैराख्यातम् ॥१३॥

इह जीवियं अणियमेत्ता, पब्भट्ठा समाहिजोएहिं ।
ते कामभोगरसगिद्धा, उववज्जंति आसुरे काए ॥१४॥
तत्तोऽवि य उव्वट्टित्ता, संसारं बहुं अणुपरिंति ।
बहुकम्मलेवलित्ताणं, बोही होइ सुदुल्लहा तेसिं ॥१५॥
कसिणंपि जो इमं लोयं, पडिपुण्णं दलेज्ज इक्कस्स ।
तेणावि से ण संतुस्से, इइ दुप्पूरए इमे आया ॥१६॥
जहा लाहो तहा लोहो, लाहा लोहो पवड्ढइ ।
दोमास-कयं कज्जं, कोडीए वि ण णिट्ठियं ॥१७॥
णो रक्खसीसु गिज्जेज्जा, गंडवच्छासु णेगचित्तासु ।
जाओ पुरिसं पलोभित्ता, खेलंति जहा व दासेहिं ॥१८॥
णारीसु णो पगिज्जेज्जा, इत्थी विप्पजहे अणगारे ।
धम्मं च पेसलं णच्चा, तत्थ ठविज्ज भिक्खु अप्पाणं ॥१९॥

---

इह जीवितमनियम्य प्रभ्रष्टास्समाधियोगेभ्यः । ते कामभोगरसगृद्धा उपपद्यन्ते आसुरे काये ॥१४॥ ततोऽपि चोद्धृत्य संसारं बहुमनुपरियन्ति । बहुकर्मलेपलिप्तानां बोधिर्भवति सुदुर्लभा तेषाम् ॥१५॥ कृत्स्नमपि य इमं लोकं प्रतिपूर्णं दद्यादेकस्मै । तेनापि स्वं न सन्तुष्येदिति दुष्पू-रोऽयमात्मा ॥१६॥ यथा लाभस्तथा लोभो लाभाल्लोभः प्रवर्धते । द्विमाषकृतं कार्यं कोट्यापि न निष्ठितम् ॥१७॥ न राक्षसीषु गृध्येत् गण्डवक्षस्स्वनेकचित्तासु । याः पुरुषं प्रलोभ्य क्रीडन्ति यथैव दासैः ॥१८॥ नारीषु न प्रगृद्ध्येत् स्त्री विप्रजहोऽनगारः । धर्मं च पेशलं ज्ञात्वा तत्र स्थापयेत् भिक्षुरात्मानम् ॥१९॥

इइ एस धम्मे अक्खाइ, कविलेणं च विसुद्धपण्णेणं ।
तरिहिंति जे उ काहिंति, तेहिं आराहिया दुवे लोगु ॥२०॥ त्ति बेमि ॥

॥ अट्ठमं काविलीयमज्झयणं समत्तं ॥ ८ ॥

---

इत्येष धर्म आख्यातः कपिलेन च विशुद्धप्रज्ञेन । तरिष्यन्ति तैराराधितौ द्वौ लोकौ ॥२०॥
इति ब्रवीमि ॥

॥ अथ नमिप्रव्रज्याख्यं नवममध्ययनम् ॥

चइऊण देवलोगाओ, उववण्णो माणुसम्मि लोगंमि ।
उवसंतमोहणिज्जो, सरई पोराणियं जाइं ॥१॥
जाइं सरित्तु भयवं, सहसंबुद्धो अणुत्तरे धम्मे ।
पुत्तं ठवित्तु रज्जे, अभिणिक्खमई णमी राया ॥२॥
सो देवलोगसरिसे, अंतेउरवरगओ वरे भोए ।
भुञ्जित्तु णमी राया, बुद्धो भोगे परिच्चयई ॥३॥
मिहिलं सपुरजणवयं, बलमोरोहं च परियणं सव्वं ।
चिच्चा अभिणिक्खंतो, एगंतमहिट्ठिओ भयवं ॥४॥
कोलाहलगब्भूतं, आसी मिहिलाए पव्वयंतम्मि ।
तइया रायरिसिम्मि, णमिंमि अभिणिक्खमंतम्मि ॥५॥
अब्भुट्ठियं रायरिसिं, पव्वज्जाठाणमुत्तमं ।
सक्को माहणरूवेणं, इमं वयणमब्बवी ॥६॥

---

च्युत्वा देवलोकादुत्पन्नो मानुषे लोके । उपशान्तमोहनीयस्स्मरति पौराणिकीं जातिम् ॥१॥ जातिं स्मृत्वा भगवान् स्वयंसंबुद्धोऽनुत्तरे धर्मे । पुत्रं स्थापयित्वा राज्येऽभिनिष्क्रामति नमी राजा ॥२॥ स देवलोकसदृशान्तःपुरवरागतः वरान् भोगान् । भुक्त्वा नमी राजा बुद्धो भोगान् परित्यजति ॥३॥ मिथिलां सुपुरजनपदां बलमवरोधं च परिजनं सर्वम् । त्यक्त्वाऽभिनिष्क्रान्त एकान्तमधिष्ठितो भगवान् ॥४॥ कोलाहलकभूतमासीन्मिथिलायां प्रव्रजति । तदा राजर्षौ नमावभिनिष्क्रामति ॥५॥ अभ्युत्थितं राजर्षिं प्रव्रज्यास्थान उत्तमे । शक्रो माहनरूपेणेदं वचनमब्रवीत् ॥६॥

किं णु भो अज्ज मिहिलाए, कोलाहलगसंकुला ।
सुच्चन्ति दारुणा सद्दा, पासाएसु गिहेसु य? ॥७॥

एयमट्ठं निसामित्ता, हेउकारणचोइओ ।
तओ णमी रायरिसी, देविन्दं इणमब्बवी ॥८॥

मिहिलाए चेइए वच्छे, सीयच्छाए मणोरमे ।
पत्त–पुप्फ–फलोवेए, बहूणं बहूगुणे सया ॥९॥

वाएण हीरमाणंमि, चेइयंमि मणोरमे ।
दुहिया असरणा अत्ता, एए कंदंति भो ? खगा ॥१०॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ ।
तओ णमिं रायरिसिं, देविन्दो इणमब्बवी ॥११॥

एस अग्गी य वाऊ य, एयं डज्झइ मन्दिरं ।
भयवं अन्तेउरंतेणं, कीस णं णावपिक्खह ॥१२

एयमट्ठं णिसामित्ता, हेउकारणचोइओ ।
तओ णमी रायरिसी, देविन्दं इणमब्बवी ॥१३॥

---

किं नु भो अद्य मिथिलायां कोलाहलसङ्कुलाः । श्रूयन्ते दारुणा शब्दाः प्रासादेषु गृहेषु च ॥७॥ एनमर्थं निशम्य हेतुकारणचोदितः । ततो नमी राजर्षिर्देवेन्द्रमिदमब्रवीत् ॥८॥ मिथिलायां चैत्यवृक्षे शीतच्छाये मनोरमे । पत्रपुष्पफलोपेते बहूनां बहुगुणे सदा ॥९॥ वातेन ह्रियमाणे चैत्ये मनोरमे । दुःखिता अशरणा आर्त्ता एते क्रन्दन्ति भोःखगाः ॥१०॥ एनमर्थं निशम्य हेतुकारणचोदितः । ततो नमिं राजर्षिं देवेन्द्र इदमब्रवीत् ॥११॥ एष अग्निश्च वातश्चैतद्दहति मन्दिरम् । भगवन् अन्तःपुरान्तं कस्मान्नावप्रेक्षसे ॥१२॥ एनमर्थं निशम्य हेतुकारणचोदितः । ततो नमीराजर्षिः देवेन्द्रमिदमब्रवीद् ॥१३॥

सुहं वसामो जीवामो, जेसि मो णत्थि किंचणं ।
मिहिलाए डज्जमाणीए, ण मे डज्जइ किंचणं ॥१४॥

चत्तपुत्तकलत्तस्स, णिव्वावारस्स भिक्खुणो ।
पियं ण विज्जई किंचि, अप्पियं पि ण विज्जई ॥१५॥

बहु खु मुणिणो भद्दं, अणगारस्स भिक्खुणो ।
सव्वओ विप्पमुक्कस्स, एगन्तमणुपस्सओ ॥१६॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ ।
तओ णमिं रायरिसिं, देविन्दो इणमब्बवी ॥१७॥

पागारं कारइत्ता णं, गोपुरट्टालगाणि य ।
उस्सूलए सयग्धीय, तओ गच्छसि खत्तिया ॥१८॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ ।
तओ णमी रायरिसी, देविन्दं इणमब्बवी ॥१९॥

सद्धं णगरिं किच्चा, तवसंवरमग्गलं ।
खन्तिं णिउणपागारं, तिगुत्तं दुप्पधंसयं ॥२०॥

---

सुखं वसामो जीवामो येषामस्माकं नास्ति किञ्चन । मिथिलायां दह्यमानायां न मे दह्यते किञ्चन ॥१४॥ त्यक्तपुत्रकलत्रस्य निर्व्यापारस्य भिक्षोः । प्रियं न विद्यते किञ्चिदप्रियमपि न विद्यते ॥१५॥ बहु खलु मुनेर्भद्रमनगारस्य भिक्षोः । सर्वतो विप्रमुक्तस्यैकान्तमनुपश्यतः ॥१६॥ एनमर्थं निशम्य हेतुकारणचोदितः । ततो नमिं राजर्षिं देवेन्द्र इदमब्रवीत् ॥१९॥ प्राकारं कारयित्वा नु गोपुराट्टालकानि च । खातिकाश्शतघ्न्यश्च ततो गच्छ क्षत्रिय ॥१८॥ एनमर्थं निशम्य हेतुकारणचोदितः ततो नमीराजर्षिर्देवेन्द्रमिदमब्रवीत् ॥१९॥ श्रद्धां च नगरीं कृत्वा तपस्संवरमर्गलाम् । क्षान्तिं निपुणप्राकारं त्रिगुप्तं दुष्प्रधर्षकम् ॥२०॥

घणुं परक्कमं किच्चा, जीवं च ईरियं सया।
धिइं च केयणं किच्चा, सच्चेणं पलिमन्थए ॥२१॥

तवनारायजुत्तेणं, भेत्तूणं कम्मकंचुयं।
मुणी विगयसंगामो, भवाओ परिमुच्चई ॥२२॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ।
तओ णमिं रायरिसीं, देविन्दो इणमब्बवी ॥२३॥

पासाए कारइत्ता णं, वद्धमाणगिहाणि य।
वालग्गपोइयाओ य, तओ गच्छसि खत्तिया ॥२४॥

एयमट्ठं णिसामित्ता, हेउकारणचोईओ।
तओ णमी रायरिसी, देविन्दं इणमब्बवी ॥२५॥

संसयं खलु सो कुणई, जो मग्गे कुणई घरं।
जत्थेव गंतुमिच्छेज्जा, तत्थ कुविज्ज सासयं ॥२६॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ।
तओ णमिं रायरिसिं, देविन्दो इणमब्बवी ॥२७॥

---

धनुः पराक्रमं कृत्वा जीवां चेर्यां सदा। धृतिं च केतनं कृत्वा सत्येन परिमन्थयेत् ॥२१॥ तपोनाराचयुक्तेन भित्त्वा कर्मकञ्चुकम्। मुनिर्विगतसङ्ग्रामो भवात्परिमुच्यते ॥२२॥ एनमर्थं निशम्य हेतुकारणचोदितः। ततो नमिं राजर्षिं देवेन्द्र इदमब्रवीत् ॥२३॥ प्रासादान् कारयित्वा नु वर्धमानगृहाणि च। वलभीश्च (कारयित्वा) ततो गच्छ क्षत्रिय ॥२४॥ एनमर्थं निशम्य हेतुकारणचोदितः। ततो नमी राजर्षिर्देवेन्द्रमिदमब्रवीत् ॥२५॥ संशयः खलु स कुरुते यो मार्गे कुरुते गृहम्। यत्रैव गन्तुमिच्छेत्तत्र कुर्वीत शाश्वतम् ॥२६॥ एनमर्थं निशम्य हेतु-कारणचोदितः। ततो नमिं राजर्षिं देवेन्द्र इदमब्रवीत् ॥२७॥

आमोसे लोमहारे य, गंठिभेए य तक्करे।
णगरस्स खेमं काऊण, तओ गच्छसि खत्तिया ॥२८॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ।
तओ णमिं रायरिसिं, देविन्दो इणमब्बवी ॥२९॥

असइं तु मणुस्सेहिं, मिच्छादण्डो पउंजई।
अकारिणोऽत्थ बज्झन्ति, मुच्चई कारओ जणो ॥३०॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ।
तओ णमिं रायरिसिं, देविन्दो इणमब्बवी ॥३१॥

जे केइ पत्थिवा तुब्भं, णाऽऽणमन्ति णराहिवा।
वसे ते ठावइत्ताणं, तओ गच्छसि खत्तिया ॥३२॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ।
तओ णमी रायरिसी, देविन्दं इणमब्बवी ॥३३॥

जो सहस्सं सहस्साणं, संगामे दुज्जए जिणे।
एगं जिणेज्ज अप्पाणं, एस से परमो जओ ॥३४॥

---

आमोषेषु लोमहारेषु च ग्रन्थिभेदेषु। नगरस्य क्षेमं कृत्वा ततो गच्छ क्षत्रिय ॥२८॥ एनमर्थं निशम्य हेतुकारणचोदितः। ततो नमी राजर्षिर्देवेन्द्रमिदमब्रवीत् ॥२९॥ असकृत्तु मनुष्यैर्मिथ्यादण्डः प्रयुज्यते। अकारिणोऽत्र बध्यन्ते मुच्यते कारको जनः ॥३०॥ एनमर्थं निशम्य हेतुकारणचोदितः। ततो नमी राजर्षिं देवेन्द्रमिदमब्रवीत् ॥३१॥ ये केचित् पार्थिवाः तुभ्यं न आनमन्ति नराधिप! वशे तान् स्थापयित्वा ततो गच्छ क्षत्रिय! ॥३२॥ एनमर्थं निशम्य हेतुकारणचोदितः। ततो नमी राजर्षिर्देवेन्द्रमिदमब्रवीत् ॥३३॥ यस्सहस्रं सहस्राणाम् संग्रामे दुर्जये जयेत्। एकं जयेदात्मानमेषस्तस्य परमो जयः ॥३४॥

अप्पाणमेव जुज्झाहि, किं ते जुज्झेण बज्झओ।
अप्पाणमेव अप्पाणं, जइत्ता सुहमेहए ॥३५॥

पंचिन्दियाणि कोहं, माणं मायं तहेव लोहं च।
दुज्जयं चेव अप्पाणं, सव्वमप्पे जिए जियं ॥३६॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ।
तओ णमिं रायरिसिं, देविन्दो इणमब्बवी ॥३७॥

जइत्ता विउणे जण्णे, भोइत्ता समण-माहणे।
दच्चा भोच्चा य जट्ठा य, तओ गच्छसि खत्तिया ॥३८॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ।
तओ णमी रायरिसी, देविन्दं इणमब्बवी ॥३९॥

जो सहस्सं सहस्साणं, मासे मासे गवं दए।
तस्सावि संजमो सेओ, अदिन्तस्स वि किंचणं ॥४०॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ।
तओ णमिं रायरिसिं, देविन्दो इणमब्बवी ॥४१॥

---

आत्मना युध्यस्व किं ते युध्धेन बाह्यतः। आत्मनैवात्मानं जित्वा सुखमेधते ॥३५॥ पञ्चेन्द्रियाणि क्रोधो मानो माया तथैव लोभश्च दुर्जयश्चैवात्मा सर्वमात्मनि जिते जितम् ॥३६॥ एनमर्थं निशम्य हेतुकारणचोदितः। ततो नमिं राजर्षिं देवेन्द्र इदमब्रवीत् ॥३७॥ याजयित्वा विपुलान् यज्ञान् भोजयित्वा श्रमणब्राह्मणान्। दत्वा भुक्त्वा चेष्ट्वा च ततो गच्छ क्षत्रिय ॥३८॥ एनमर्थं निशम्य हेतुकारणचोदितः। ततो नमी राजर्षिर्देवेन्द्रमिदमब्रवीत् ॥३९॥ यस्सहस्रं सहस्राणाम्मासे मासे गवां दद्यात्। तस्यापि संयमः श्रेयान् अददतोऽपि किञ्चन ॥४०॥ एनमर्थं निशम्य हेतुकारणचोदितः। ततो नमिं राजर्षिं देवेन्द्र इदमब्रवीत् ॥४१॥

घोरासमं चइत्ता णं, अण्णं पत्थेसि आसमं ।
इहेव पोसहरओ, भवाहि मणुयाहिवा ? ॥४२॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ ।
तओ णमी रायरिसी, देविन्दं इणमब्बवी ॥४३॥

मासे मासे तु जो बालो, कुसग्गेण तु भुंजए ।
ण सो सुक्खायधम्मस्स, कलं अग्घइ सोलसिं ॥४४॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ ।
तओ णमिं रायरिसीं, देविन्दो इणमब्बवी ॥४५॥

हिरण्णं सुवण्णं मणि-मुत्तं, कंसं दूसं च वाहणं ।
कोसं वड्ढावइत्ताणं, तओ गच्छसि खत्तिया ॥४६॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ ।
तओ णमी रायरिसी, देविन्दं इणमब्भवी ॥४७॥

सुवण्णरुप्पस्स उ पव्वया भवे, सिया हु केलाससमा असंखया ।
णरस्स लुद्धस्स ण तेहिं किंचि, इच्छा हु आगाससमा अणन्तिया ॥४८॥

---

घोराश्रमं त्यक्त्वान्यत् प्रार्थयसे आश्रमम् । इहैव पौषधरतो भव मनुजाधिप! ॥४२॥ एनमर्थं निशम्य हेतुकारणचोदितः । ततो नमी राजर्षिः देवेन्द्रमिदमब्रवीत् ॥४३॥ मासे मासे तु यो बालो कुशाग्रेण तु भुङ्क्ते । न सः स्वाख्यातधर्मणः कलामर्घति षोडशीं ॥४४॥ एनमर्थं निशम्य हेतुकारणचोदितः । ततो नमिं राजर्षिं देवेन्द्र इदमब्रवीत् ॥४५॥ हिरण्यं सुवर्णं मणिमुक्तं कांस्यं च वाहनम् । कोषं च वर्धयित्वा ततो गच्छ क्षत्रिय ॥४६॥ एनमर्थं निशम्य हेतुकारणचोदितः । ततो नमी राजर्षिः देवेन्द्रमिदमब्रवीत् ॥४७॥ सुवर्णरूप्यस्य तु पर्वता भवेयुस्स्याद्धि कैलाससमा असंख्यकाः, नरस्य लुब्धस्य न तैः किञ्चिदिच्छा हु आकाससमा अनन्तिका ॥४८॥

पुढवी साली जवा चेव, हिरणं पसुभिस्सह ।
पडिपुण्णं णालमेगस्स, इइ विज्जा तवं चरे ॥४९॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ ।
तओ णमिं रायरिसिं, देविन्दो इणमब्बवी ॥५०॥

अच्छेरयमब्भुदए, भोए चयसि पत्थिवा ।
असन्ते कामे पत्थेसि, संकप्पेण विहण्णसि ॥५१॥

एयमट्ठं णिसामित्ता, हेउकारणचोइओ ।
तओ णमी रायरिसी, देविन्दं इणमब्बवी ॥५२॥

सल्लं कामा विसं कामा, कामा आसीविसोवमा ।
कामे य पत्थेमाणा, अकामा णन्ति दुग्गइं ॥५३॥

अहे वयइ कोहेणं, माणेणं अहमा गई ।
माया गइपडिग्घाओ, लोभाओ दुहओ भयं ॥५४॥

अवउज्झिऊण माहणरूवं, विउरूविऊण इंदत्तं ।
वन्दइ अभित्थुणन्तो, इमाहिं महुराहिं वग्गूहिं ॥५५॥

---

पृथ्वी शाली यवाश्चैव हिरण्यं पशुभिस्सह । प्रतिपूर्णं नालमेकस्येति विदित्वा तपश्चरेत् ॥४९॥ एतमर्थं निशम्य हेतुकारणचोदितः । ततो नमिं राजर्षिं देवेन्द्र इदमब्रवीत् ॥५०॥ आश्चर्यमद्भुतकान् भोगांस्त्यजसि पार्थिव! । असतः कामान्प्रार्थयसे सङ्कल्पेन विहन्यसे ॥५१॥ एतमर्थं निशम्य हेतुकारणचोदितः ततो नमी राजर्षिर्देवेन्द्रमिदमब्रवीत् ॥५२॥ शल्यं कामाः विषं कामाः कामा आशीविषोपमाः । कामान् प्रार्थयमाना अकामा यान्ति दुर्गतिम् ॥५३॥ अधो व्रजति क्रोधेन मानेनाधमा गतिः । मायया गतिप्रतिघातो लोभात् द्विधा भयम् ॥५४॥ अपोह्य ब्राह्मणरूपं विकृत्येन्द्रत्वं । वन्दते अभिष्टुवन्नाभिर्मधुराभिर्वाग्भिः ॥५५॥

अहो ! ते णिज्जिओ कोहो, अहो ! माणो पराजिओ ।
अहो ! ते णिरक्किया माया, अहो ! लोभो वसीकओ ॥५६॥
अहो ! ते अज्जवं साहु, अहो ! ते साहु मद्दवं ।
अहो ! ते उत्तमा खन्ती, अहो ! ते मुत्ति उत्तमा ॥५७॥
इहं सि उत्तमो भन्ते, पेच्चा होहिसि उत्तमो ।
लोगुत्तमुत्तमं ठाणं, सिद्धिं गच्छसि णीरओ ॥५८॥
एवं अभित्थुणन्तो, रायरिसी उत्तमाए सद्धाए ।
पायाहिणं करेन्तो, पुणो पुणो वन्दई सक्को ॥५९॥
तो वन्दिऊण पाए, चक्कङ्कुसलक्खणे मुणिवरस्स ।
आगासेणुप्पइओ, ललिय-चवल-कुण्डलतिरीडी ॥६०॥
णमी णमेइ अप्पाणं, सक्खं सक्केण चोइओ ।
चइऊण गेहं वइदेही, सामण्णे पज्जुवट्ठिओ ॥६१॥

---

अहो त्वया निर्जितः क्रोधोऽहो मानः पराजितः । अहो त्वया निराकृता मायाऽहो लोभो वशीकृतः ॥५६॥ अहो त आर्जवं साधु अहो ते साधु मार्दवम् । अहो त उत्तमा क्षान्तिरहो ते मुक्तिरुत्तमा ॥५७॥ इहास्युत्तमो भगवन् प्रेत्य भविष्यस्युत्तमः । लोकोत्तममुत्तमं स्थानं सिद्धिं गच्छसि नीरजाः ॥५८॥ एवमभिष्टुवन्राजर्षिमुत्तमया श्रद्धया । प्रदक्षिणां कुर्वन्पुनःपुनो वन्दते शक्रः ॥५९॥ ततो वन्दित्वा पादौ चक्राङ्कुशलक्षणौ मुनिवरस्य आकाशेनोत्पतितो ललितचपलकुण्डलकिरीटी ॥६०॥ नमिर्नमयत्वात्मानं साक्षाच्छक्रेण चोदितः । त्यक्त्वा गृहं वैदेही श्रामण्ये पर्युपस्थितः ॥६१॥

एवं करेन्ति संबुद्धा, पंडिया पवियक्खणा।
विणियट्टन्ति भोगेसु, जहा से णमी रायरिसि ॥६२॥ त्ति बेमि॥

॥ नवमं नमिपवज्जाअज्झयणं समत्तं ॥९॥

एवं कुर्वन्ति सम्बुद्धाः पण्डिताः प्रविचक्षणाः। विनिवर्तन्ते भोगेभ्यो यथा स नमी राजर्षिः ॥६२॥ इति ब्रवीमि ॥९॥ नमिप्रव्रज्याऽध्ययनं समाप्तम् ॥

## ॥ अथ द्रुमपत्रकाख्यं दशममध्ययनम् ॥

दुमपत्तए पण्डुयए जहा, णिवडइ रायगणाण अच्चए;
एवं मणुयाण जीवियं, समयं गोयम! मा पमायए ॥१॥

कुसग्गे जह ओसबिन्दुए, थोवं चिट्ठइ लम्बमाणए;
एवं मणुयाण जीवियं, समयं गोयम! मा पमायए ॥२॥

इइ इत्तरियम्मि आउए, जीवियए बहुपच्चवायए;
विहुणाहि रयं पुरे कडं, समयं गोयम! मा पमायए ॥३॥

दुल्लहे खलु माणुसे भवे, चिरकालेण वि सव्वपाणिणं;
गाढा य विवाग कम्मुणो, समयं गोयम! मा पमायए ॥४॥

पुढविकायमइगओ, उक्कोसं जीवो उ संवसे।
कालं संखाईयं, समयं गोयम! मा पमायए ॥४॥

आउक्कायमइगओ, उक्कोसं जीवो उ संवसे।
कालं संखाईयं, समयं गोयम! मा पमायए ॥६॥

---

द्रुमपत्रकं पाण्डुरकं यथा निपतति रात्रिगणानामतिक्रमे। एवम्मनुजानां जीवितं समयं गौतम! मा प्रमादीः ॥१॥ कुशाग्रे यथाऽवश्यायबिन्दुकस्स्तोकं तिष्ठति लम्बमानकः। एवम्मनुजाः जीवितं समयं गौतम! मा प्रमादीः ॥२॥ इतीत्वरआयुषि जीवितके बहुप्रत्यवाये! विधुनी हि रजःपुराकृतं समयं गौतम! मा प्रमादीः ॥३॥ दुर्लभः खलु मानुषो भवश्चिरकालेनापि सर्वप्राणिनाम्। गाढाश्च विपाकाः कर्मणां समयं गौतम! मा प्रमादीः ॥४॥ पृथ्वीकायमतिगत उत्कर्षतो जीवस्तु संवसेत्। कालं संख्यातीतं समयं गौतम! मा प्रमादीः ॥५॥ अप्कायमतिगत उत्कर्षतो जीवस्तु संवसेत्। कालं संख्यातीतं समयं गौतम! मा प्रमादीः ॥६॥

तेउक्कायमइगओ, उक्कोसं जीवो उ संवसे।
कालं संखाईयं, समयं गोयम! मा पमायए ॥७॥

वाउक्कायमइगओ, उक्कोसं जीवो उ संवसे।
कालं संखाईयं, समयं गोयम! मा पमायए ॥८॥

वणस्सइकायमइगओ, उक्कोसं जीवो उ संवसे।
कालमणन्त–दुरन्तं, समयं गोयम! मा पमायए ॥९॥

बेइन्दियकायमइगओ, उक्कोसं जीवो उ संवसे।
कालं संखिज्जसण्णियं समयं गोयम! मा पमायए ॥१०॥

तेइन्दियकायमइगओ, उक्कोसं जीवो उ संवसे।
कालं संखिज्जसण्णियं, समयं गोयम! मा पमायए ॥११॥

चउरिन्दियकायमइगओ, उक्कोसं जीवो उ संवसे।
कालं संखिज्जसण्णियं, समयं गोयम मा पमायए ॥१२॥

पंचिदियकायमइगओ, उक्कोसं जीवो उ संवसे।
सत्तऽट्ठभवग्गहणे, समयं गोयम! मा पमायए ॥१३॥

---

तैजस्कायमतिगत उत्कर्षतो जीवस्तु संवसेत्। कालं संख्यातीतं समयं गौतम! मा प्रमादीः ॥६॥ तैजस्कायमतिगत उत्कर्षतो जीवस्तु संवसेत्। कालं संख्यातीतं समयं गौतम! मा प्रमादीः ॥७॥ वायुकायमतिगत उत्कर्षतो जीवस्तु संवसेत्। कालं संख्यातीतं समयं गौतम! मा प्रमादीः ॥८॥ वनस्पतिकायमतिगत उत्कृष्टतो जीवस्तु संवसेत्। कालमनन्तं दुरन्तं समयं गौतम! मा प्रमादीः ॥९॥ द्वीन्द्रियकायमतिगत उत्कर्षतो जीवस्तु संवसेत्। कालं सङ्ख्येय-सञ्ज्ञितं समयं गौतम! मा प्रमादीः ॥१०॥ त्रीन्द्रियकायमतिगत उत्कर्षतो जीवस्तु संवसेत्। कालं सङ्ख्येयसञ्ज्ञितं गौतम! मा प्रमादीः ॥११॥ चतुरिन्द्रियकायमतिगत उत्कर्षतो जीवस्तु संवसेत् कालं सङ्ख्येयसञ्ज्ञितं समयं गौतम! मा प्रमादीः ॥१२॥ पञ्चेन्द्रियकायमतिगत उत्कृष्टतो जीवस्तु संवसेत्। सप्ताष्टभवग्रहणं समयं गौतम! मा प्रमादीः ॥१३॥

देवे णेरइए य गओ, उक्कोसं जीवो उ संवसे।
इक्केक्कभवग्गहणे समयं गोयम! मा पमायए ॥१४॥

एवं भवसंसारे, संसरइ सुहासुहेहिं कम्मेहिं;
जीवो पमायबहुलो, समयं गोयम! मा पमायए ॥१५॥

लध्धूण वि माणुसत्तणं, आरिअत्तं पुणरावि दुल्लहं।
बहवे दसुया मिलेक्खुया, समयं गोयम! मा पमायए ॥१६॥

लध्धूण वि आरियत्तणं, अहीणपंचिंदियता हु दुल्लहा।
विगलिन्दियता हु दीसई, समयं गोयम! मा पमायए ॥१७॥

अहीणपंचिंदियत्तंपि, से लहे उत्तमधम्मसुई हु दुल्लहा।
कुतित्थिणिसेवए जणे, समयं गोयम! मा पमायए ॥१८॥

लध्धूण वि उत्तमं सुइं, सद्दहणा पुणरावि दुल्लहा।
मिच्छत्तणिसेवए जणे, समयं गोयम! मा पमायए ॥१९॥

धम्मं पि हु सद्दहंतया, दुल्लहया काएण फासया।
इह कामगुणेहिं मुच्छिया, समयं गोयम! मा पमायए ॥२०॥

---

देवान् नैरयिकांश्च गत उत्कृष्टतो जीवस्तु संवसेत्। एकैकभवग्रहणं समयं गौतम! मा प्रमादीः ॥१४॥ एवं भवसंसारे संसरन्ति शुभाशुभैः कर्म्मभिः। जीवः प्रमाद बहुलः समयं गौतम! मा प्रमादीः ॥१५॥ लब्ध्वापि मानुष्यत्वमार्यत्वं पुनरपि दुर्लभम्। बहवो दस्यवो म्लेच्छाः समयं गौतम! मा प्रमादीः ॥१६॥ लब्ध्वाप्यार्यत्वमहीनपञ्चेन्द्रियता हु दुर्लभा। विकलेन्द्रियता हु दृश्यन्ते समयं गौतम! मा प्रमादीः ॥१७॥ अहीनपञ्चेन्द्रियत्वमपि स लभेदुत्तमधर्मश्रुतिः हु दुर्लभा। कुतीर्थिनिसेवको जनः समयं गौतम! मा प्रमादीः ॥१८॥ लब्ध्वाप्युत्तमां श्रुतिं श्रद्धानं पुनरपि दुर्लभा! मिथ्यात्वनिसेवको जनः समयं गौतम! मा प्रमादीः ॥१९॥ धर्मं श्रद्धतोऽपि हु दुर्लभा कायस्पर्शना। इह कामगुणैः मूर्च्छिताः गौतम! मा प्रमादीः ॥२०॥

परिजूरइ ते सरीरयं, केसा पण्डुरया हवन्ति ते।
से सोयबले य हायई, समयं गोयम! मा पमायए ॥२१॥

परिजूरई ते सरीरयं, केसा पण्डुरया हवन्ति ते।
से चक्खुबले य हायई, समयं गोयम! मा पमायए ॥२२॥

परिजूरइ ते सरीरयं, केसा पण्डुरया हवन्ति ते।
से घाणबले य हायई, समयं गोयम! मा पमायए ॥२३॥

परिजूरइ ते सरीरयं, केसा पण्डुरया हवन्ति ते।
से जिब्भबले य हायई, समयं गोयम! मा पमायए ॥२४॥

परिजूरइ ते सरीरयं, केसा पण्डुरया हवन्ति ते।
से फासबले य हायई, समयं गोयम! मा पमायए ॥२५॥

परिजूरइ ते सरीरयं, केसा पण्डुरया हवन्ति ते।
से सव्वबले य हायई, समयं गोयम! मा पमायए ॥२६॥

अरई गण्डं विसूइया, आयङ्का विविहा फुसन्ति ते।
विहडइ विद्धंसइ ते सरीरयं, समयं गोयम! मा पमायए ॥२७॥

---

परिजीर्यति ते शरीरकं केशाः पाण्डुराश्च भवन्ति ते। तत् श्रोत्रबलं च हीयते समयं गौतम! मा प्रमादीः ॥२१॥ परिजीर्यते ते शरीरकं केशाः पाण्डुराश्च भवन्ति ते। तच्चक्षुर्बलं च हीयते समयं गौतम! मा प्रमादीः ॥२२॥ परिजीर्यते ते शरीरकं केशाः पाण्डुराश्च भवन्ति ते। तत् घ्राणबलं च हीयते समयं गौतम! मा प्रमादीः ॥२४॥ परिजीयते ते शरीरकं केशाः पाण्डुराश्च भवन्ति ते। तद्रसनबलं च हीयते समयं गौतम! मा प्रमादीः ॥२५॥ परिजीयते ते शरीरकं केशाःपाण्डुराश्च भवन्ति ते। तत् सर्वबलं च हीयते समयं गोतम! मा प्रमादीः ॥२६॥ अरतिःगडुर्विसूचिका आतङ्काःविविधाः स्पर्शन्ति ते विपतति विध्वस्यते ते शरीरकं समयं गौतम! मा प्रमादीः ॥२७॥

वोच्छिन्द सिणेहमप्पणो, कुमुयं सारइयं व पाणियं ।
से सव्वसिणेहवज्जिए, समयं गोयम! मा पमायए ॥२८॥

चिच्चा ण धणं च भारियं, पव्वइओ हि सि अणगारियं ।
मा वन्तं पुणो वि आविए, समयं गोयम! मा पमायए ॥२९॥

अवउज्झिय मित्तबन्धवं, विउलं चेव धणोहसंचयं ।
मा तं बिइयं गवेसए, समयं गोयम! मा पमायए ॥३०॥

ण हु जिणे अज्ज दिस्सई, बहुमए दिस्सइ मग्गदेसिए ।
संपइ णेयाउए पहे, समयं गोयम! मा पमायए ॥३१॥

अवसोहियकण्टगापहं, ओइण्णो सि पहं महालयं ।
गच्छसि मग्गं विसोहिया, समयं गोयम! मा पमायए ॥३२॥

अबले जह भारबाहए, मा मग्गे विसमेऽवगाहिया ।
पच्छा पच्छाणुतावए, समयं गोयम! मा पमायए ॥३३॥

तिण्णो हु सि अण्णवं महं, किं पुण चिट्ठसि तीरमागओ ।
अभितुर पारं गमित्तए, समयं गोयम! मा पमायए ॥३४॥

---

व्युच्छिन्द्धि स्नेहमात्मनः कुमुदं शारदमिव पानीयम् । अथ सर्वस्नेहवर्जितःसमयं गौतम! मा प्रमादीः ॥२८॥ त्यक्त्वा धनं च भार्यां प्रव्रजितो ह्यसि अनगारिताम् । मा वान्तं पुनरप्यापिब समयं गौतम! मा प्रमादीः ॥३०॥ नैव जिनोऽद्य दृश्यते बहुमतः दृश्यते मार्गदेशकः । सम्प्रति नैयायिके पथि समयं गौतम! मा प्रमादीः ॥३१॥ अवशोध्य कण्टकपथमवतीर्णोऽसि पन्थानं महालयम् । गच्छसि मार्गं विशोध्य समयं गौतम! मा प्रमादीः ॥३२॥ अबलो यथा भारवाहकः मा मार्गं विषममवगाह्य । पश्चादनुतापकः समयं गौतम। मा प्रमादीः ॥३३॥ तीर्ण एवासि अर्णवं महान्तं किं पुनःतिष्ठसि तीरमागतः । अभित्वर पारं गन्तुं समयं गौतम! मा प्रमादीः ॥३४॥

अकलेवरसेणिमूस्सिया, सिद्धिं गोयम लोयं (च) गच्छसि;
खेमं च सिवं अणुत्तरं, समयं गोयम! मा पमायए ॥३५॥

बुद्धे परिणिव्वुडे चरे, गाम गए णगरे व संजए।
सन्तिमग्गं च बूहए, समयं गोयम! मा पमायए ॥३६॥

बुद्धस्स णिसम्म भासियं, सुकहियमट्ठपओवसोहियं।
रागं दोसं च छिन्दिया, सिद्धिगइं गए गोयमे ॥३७॥ त्ति बेमि॥

॥ दसमं दुमपत्तयज्झयणं सम्मत्तं ॥१०॥

---

अकलेवरश्रेणिमुत्सृतां सिद्धिं गोतम! लोकं च गच्छसि। क्षेमं च शिवमनुत्तरं समयं गौतम! मा प्रमादीः ॥३५॥ बुद्धः परिनिर्वृतश्चरेः ग्रामे गतो नगरे वा संयतः। शान्तिमार्गं च बृंहयेः समयं गौतम! मा प्रमादीः ॥३६॥ बुद्धस्य निशम्य भाषितं सुकथितमर्थपदोपशोभितं। रागं द्वेषं च छित्वा सिद्धिगतिं गतो गौतमः ॥३७॥ इति ब्रवीमि॥

॥ अथ बहुश्रुतपूजाख्यमेकादशमध्ययनम् ॥

संजोगा विप्पमुक्कस्स, अणगारस्स भिक्खुणो ।
आयारं पाउकरिस्सामि, आणुपुव्विं सुणेह मे ॥१॥

जे यावि होइ णिव्विज्जे, थध्धे लुध्धे अणिग्गहे ।
अभिक्खणं उल्लवई, अविणीए अबहुस्सुए ॥२॥

अह पंचहिं ठाणेहिं, जेहिं सिक्खा ण लब्भई ।
थम्भा १ कोहा २ पमाएणं ३, रोगेणाऽऽलस्सएण य ४-५ ॥३॥

अह अट्ठहिं ठाणेहिं, सिक्खासीले त्ति वुच्चई ।
अहस्सिरे १ सया दन्ते २, ण य मम्ममुदाहरे ३ ॥४॥

णासीले ४ ण विसीले ५, ण सिया अइलोलुए ६ ।
अक्कोहणे ७ सच्चरए ८, सिक्खासीले त्ति वुच्चई ॥५॥

अह चउद्दसहिं ठाणेहिं, वट्टमाणे उ संजए ।
अविणीए वुच्चई सो उ, णिव्वाणं च ण गच्छइ ॥६॥

---

संयोगाद्विप्रमुक्तस्यानगारस्य भिक्षोः । आचारं प्रादुष्करिष्याम्यानुपूर्व्या श्रृणुत मे ॥१॥ यश्चापि भवति निर्विद्यः स्तब्धो लुब्धोऽनिग्रहः । अभिक्ष्णमुल्लपत्यविनीतोऽबहुश्रुतः ॥२॥ अथ पञ्चभिस्स्थानैर्यैः शिक्षा न लभ्यते । स्तम्भात्क्रोधात्प्रमादेन रोगेणालस्येन च ॥३॥ अथाष्टभिस्स्थानैश्शिक्षाशील इत्युच्यते । अहसिता सदा दान्तो न च मर्मोदाहरेत् ॥४॥ नाशीलो न विशीलो न स्यादतिलोलुपः । अक्रोधनस्सत्यरतश्शिक्षाशील इत्युच्यते ॥५॥ अथ चतुर्दशसु स्थानेषु वर्तमानस्तु संयतः । अविनीत उच्यते स तु निर्वाणं च न गच्छति ॥६॥

अभिक्खणं कोही १ भवइ, पबन्धं च पकुव्वइ २ ।
मित्तिज्जामणो वमइ ३, सुयं लध्धूण मज्जइ ४ ॥७॥

अवि पावपरिक्खेवी ५, अवि मित्तेसु कुप्पई ६ ।
सुप्पियस्सावि मित्तस्स, रहे भासइ पावयं ७ ॥८॥

पइण्णवाई ८ दुहिले ९, थध्धे १० लुध्धे ११ अणिग्गहे १२ ।
असंविभागी १३ अचियत्ते १४, अविणीए त्ति वुच्चई ॥९॥

अह पण्णरसहिं ठाणेहिं, सुविणीए त्ति वुच्चई ।
णीयावित्ती १ अचवले २, अमाई ३ अकुऊहले ४ ॥१०॥

अप्पं चाहिक्खिवइ ५, पबंधं च ण कुव्वइ ६ ।
मित्तिज्जमाणो भयई ७, सुयं लध्धुं ण मज्जइ ८ ॥११॥

ण य पावपरिक्खेवी ९, ण य मिते सुकुप्पइ १० ।
अप्पियस्सावि मित्तस्स, रहे कल्लाण ११, भासई ॥१२॥

कलह-डमरवज्जए १२, बुध्धे अभिजाइगे ।
हिरिमं पडिसंलीणे, सुविणीए ति वुच्चई ॥१३॥

---

अभिक्ष्णं क्रोधी भवति प्रबन्धं च प्रकुरुते । मित्रीय्यमाणोऽपि वमति श्रुतं लब्ध्वा माद्यति ॥७॥ अपि पापपरिक्षेप्यपि मित्रेभ्यः कुप्यति । सुप्रियस्यापि मित्रस्य रहसि भाषते पापकम् ॥८॥ प्रकीर्णवादी द्रोग्धा स्तब्धोऽनिग्रहः । असंविभाग्यप्रीतिकरोऽविनीत इत्युच्यते ॥९॥ अथ पञ्चदशभिस्स्थानैस्सुविनीत इत्युच्यते । नीचवर्त्यचपलोऽमाय्यकुतूहलः ॥१०॥ अल्पं चाधिक्षिपति प्रबधं च न कुर्वति । मित्रीय्यमाणो भजते श्रुतं लब्ध्वा न माद्यति ॥११॥ न च पापपरिक्षेपी न च मित्रेभ्यः कुप्यति । अप्रियस्यापि मित्रस्य रहसि कल्याणं भाषते ॥१२॥ कलहडमरवर्जको बुद्धोऽभिजातगः । ह्रीमान्प्रतिसंलीनस्सुविनीत इत्युच्यते ॥१३॥

वसे गुरुकुले णिच्चं, जोगवं उवहाणवं ।
पियंकरे पियंवाई, से सिक्खं लद्धुमरिहइ ॥१४॥

जहासखम्मि पयं णिहियं, दुहओ वि विरायई ।
एवं बहुस्सुए भिक्खू, धम्मो कित्ती तहा सुयं ॥१५॥

जहा से कम्बोयाणं, आइण्णे कंथए सिया ।
आसे जवेण पवरे, एवं हवइ बहुस्सुए ॥१६॥

जहाऽऽइण्ण समारूढे, सूरे दढपरक्कमे; ।
उभओ णंदिघोसेणं, एवं हवइ बहुस्सुए ॥१७॥

जहा करेणुपरिकिण्णे, कुञ्जरे सट्ठिहायणे ।
बलवन्ते अप्पडिहए, एवं हवइ बहुस्सुए ॥१८॥

जहा से तिक्खसिङ्गे, जायक्खन्धे विरायई ।
वसहे जूहाहिवई, एवं हवइ बहुस्सुए ॥१९॥

जहा से तिक्खदाढे, उदग्गे दुप्पहंसए ।
सीहे मियाण पवरे, एवं हवइ बहुस्सुए ॥२०॥

---

वसे गुरुकुले नित्यं योगवानुपधानवान् । प्रियङ्करः प्रियंवादी स शिक्षां लब्धुमर्हति ॥१४॥ यथा शङ्खे पयो निहितं द्वाभ्यामपि विराजते । एवं बहुश्रुते भिक्षौ धर्मः [illegible] ॥१५॥ यथा स काम्बोजानामाकीर्णः कन्थकस्स्यात् । अश्वो जवेन प्रवरः एवं भवति बहुश्रुतः ॥१६॥ यथाऽऽकीर्णसमारूढःशूरो दृढपराक्रमः । उभयतो नन्दिघोषेनैवं भवति बहुश्रुतः ॥१७॥ यथा करेणुपरिकीर्णः कुञ्जरष्षष्टिहायनः । बलवानप्रतिहत एवं भवति बहुश्रुतः ॥१८॥ यथा स तीक्ष्णशृङ्गो जातस्कन्धो विराजते । वृषभो यूथाधिपतिरेवं भवति बहुश्रुतः ॥१९॥ यथा स तीक्ष्णदंष्ट्र उदग्रः दुष्प्रधर्षकः । सिंहो मृगानां प्रवर एवं भवति बहुश्रुतः ॥२०॥

जहा से वासुदेवे, सङ्ख-चक्क-गदाधरे ।
अप्पडिहयबले जोहे, एवं हवइ बहुस्सुए ॥२१॥

जहा से चाउरन्ते, चक्कवट्टी महिड्ढिए ।
चोद्दसरयणाहिवई, एवं हवइ बहुस्सुए ॥२२॥

जहा से सहस्सक्खे, वज्जपाणी पुरन्दरे ।
सक्खे देवाहिवई, एवं हवइ बहुस्सुए ॥२३॥

जहा से तिमिरविद्धंसे, उत्तिट्ठंते दिवायरे ।
जलन्ते इव तेएणं, एवं हवइ बहुस्सुए ॥२४॥

जहा से उडुवई चन्दे, णक्खत्तपरिवारिए ।
पडिपुण्णे पुण्णमासीए, एवं हवइ बहुस्सुए ॥२५॥

जहा से सामाइयाणं, कोट्ठागारे सुरक्खिए ।
णाणाधण्णपडिपुण्णे, एवं हवइ बहुस्सुए ॥२६॥

जहा सा दुमाण पवरा, जम्बू नाम सुदंसणा ।
अणाढियस्स देवस्स, एवं हवइ बहुस्सुए ॥२७॥

---

यथा स वासुदेवश्शङ्खचक्रगदाधरः । अप्रतिहतबलोयोध एवं भवति बहुश्रुतः ॥२१॥ यथा स चतुरन्तश्चक्रवर्ती महर्द्धिकः । चतुर्दशरत्नाधिपतिरेवं भवति बहुश्रुतः ॥२२॥ यथा स सहस्राक्षो वज्रपाणिः पुरन्दरः । शक्रो देवाधिपतिरेवं भवति बहुश्रुतः ॥२३॥ यथा स तिमिर विध्वंस उत्तिष्ठन् दिवाकरः । ज्वलन्निव तेजसैवं भवति बहुश्रुतः ॥२४॥ यथा स उडुपतिश्चन्द्रो नक्षत्रपरिवारितः । प्रतिपूर्णः पौर्णमास्यामेवं भवमि बहुश्रुतः ॥२५॥ यथा स सामाजिकानां कोष्ठागारस्सुरक्षितः । नानाधान्यप्रतिपूर्ण एवं भवति बहुश्रुतः ॥२६॥ यथा सा द्रुमाणां प्रवराः जम्बूनामसुदर्शना । अनादृतस्य देवस्यैवं भवति ब श्रुतः ॥२७॥

जहा सा णईण पवरा, सलिला सागरंगमा ।
सीया णीलवन्तपवहा, एवं हवइ बहुस्सुए ॥२८॥

जहा से णगाण पवरे, सुमहं मंदरे गिरी ।
णाणोसहिपज्जलिए, एवं हवइ बहुस्सुए ॥२९॥

जहा से सयंभूरमणे, उदही अक्खओदए ।
णाणारयणपडिपुण्णे, एवं हवइ बहुस्सुए ॥३०॥

समुद्दगम्भीरसमा दुरासया, अचक्किया केणइ दुप्पहंसया ।
सुयस्स पुण्णा विउलस्स ताइणो; खवित्तु कम्मं गइमुत्तमं गया ॥३१॥

तम्हा सुयमहिट्ठिज्जा, उत्तमट्ठगवेसए ।
जेणऽप्पाणं परं चेव, सिद्धिं संपाउणीज्जासि ॥३२॥ त्तिं बेमि ॥

॥ एगारसमं बहुस्सुअपूअज्झयणं समत्तं ॥११॥

---

जथा सा नदीनां प्रवरा सलीला सागरङ्गमा । शीता नीलवत्प्रवहैवं भवति बहुश्रुतः ॥२८॥ यथा स नगानां प्रवरस्सुमहान्मन्दरो गिरिः । नानौषधिप्रज्वलित एवं भवति बहुश्रुतः ॥२९॥ यथा स स्वयम्भुरमण उदधिरक्षयोदकः । नानारत्नप्रतिपूर्ण एवं भवति बहुश्रुतः ॥३०॥ समुद्रगम्भीरसमा दुराश्रया अचकिताः केन चिद् दुष्प्रधर्षकाः श्रुतेन पूर्णाः विपुलेन तायिनः क्षपयित्वा कर्म गतिमुत्तमां गताः ॥३१॥ तस्माच्छ्रुतमधितिष्ठेदुत्तमार्थगवेषकः । येनाऽऽत्मानं परं चैव सिद्धिं संप्रापयेत् ॥३२॥ इति ब्रवीमि ॥

॥ अथ हरिकेशीयाख्यं द्वादशममध्ययनम् ॥

सोवागकुलसंभूओ, गुणुत्तरधरो मुणी ।
हरिएसबलो णाम, आसि भिक्खू जिइन्दिओ ॥१॥

इरिएसण-भासाए, उच्चारसमितीसु य ।
जओ आयाणणिक्खेवे, संजओ सुसमाहिओ ॥२॥

मणगुत्तो वयगुत्तो, कायगुत्तो जिइन्दिओ ।
भिक्खट्ठा बम्भइज्जम्मि, जण्णवाडमुवट्ठिओ ॥३॥

तं पासिऊणमिज्जन्तं, तवेण परिसोसियं ।
पंतोवहिउवगरणं, उवहसंति अणारिया ॥४॥

जाईमय पडिबद्धा, हिंसगा अजिइन्दिया ।
अबम्भचारिणो बाला, इमं वयणमब्बवी ॥५॥

कयरे आगच्छइ दित्तरूवे, काले विकराले फोक्कणासे ।
ओमचेलए पंसुपिसायभूए, संकरदूसं परिहरिय कण्ठे ॥६॥

---

श्वपाककुलसंभूतो गुणोत्तरधरो मुनिः । हरिकेशबलो नामाऽऽसीद् भिक्षुर्जितेन्द्रियः ॥१॥ ईर्येषणभाषायामुच्चारसमतिषु च । यत आदाननिक्षेपे संयतस्सुसमाहितः ॥२॥ मनोगुप्तो वाग्गुप्तः कायगुप्तो जितेन्द्रियः । भिक्षार्थं ब्रह्मेज्ये यज्ञवाट उपस्थितः ॥३॥ तं दृष्ट्वाऽऽयान्त तपसा परिशोषितम् । प्रांतोपध्युपकरणमुपहसन्त्यनार्याः ॥४॥ जातिमदेन प्रतिबद्धा हिंसका अजितेन्द्रियाः । अब्रह्मचारिणो बाला इदं वचनमब्रुवन् ॥५॥ कतर आगच्छति दीप्तरूपः कालो विकरालः फोक्कनासः । अवमचेलकः पांशुपिशाचभूतस्सङ्करदुष्यं परिधृत्य कण्ठे ॥६॥

कयरे तुमं इय अदंसणिज्जे?, काए व आसा इहम गओ सि ।
ओमचेलगा पंसुपिसायभूया, गच्छ क्खलाहि किमिहं ठिओ सि ! ॥७॥

जक्खो तहिं तिन्दुगरुक्खवासी, अणुकम्पओ तस्स महामुणिस्स ।
पच्छायइत्ता णियगं सरीरं, इमाइं वयणाइं उदाहरित्था ॥८॥

समणो अहं संजओ बम्भयारी, विरओ धण-पयण-परिग्गहाओ ।
परप्पवित्तस्स उ भिक्खकाले, अण्णस्स अट्ठा इहम गओ मि ॥९॥

वियरिज्जई खज्जइ भुज्जई य, अण्णं पभूयं भवयाणमेयं ।
जाणाहि मे जायणजीविणो त्ति, सेसावसेसं लहऊ तवस्सी ॥१०॥

उवक्खडं भोयण माहणाणं, अत्तट्ठियं सिद्धमिहेगपक्खं ।
ण ऊ वयं एरिसमण्णपाणं, दाहामु तुज्जं किमिहं ठिओसि ? ॥११॥

थलेसु बीयाइं वयन्ति कासगा, तहेव णिण्णेसु आससाए ।
एयाइ सद्धाए दलाह मज्झं, आराहए पुण्णमिणं खु खित्तं ॥१२॥

---

कतरस्त्वमित्यदर्शनीयः कया वाऽऽशयेहागतोऽसि । अवमचेलकः पांशुपिशाचभूतो गच्छापसर किमिह स्थितोऽसि ॥७॥ यक्षस्तस्मिन् तिन्दुकवृक्षवास्यनुकम्पकस्तस्य महामुनेः । प्रच्छाद्य निजकं शरीरमिमानि वचनान्युदाहार्षीत् ॥८॥ श्रमणोऽहं संयतो ब्रह्मचारी विरतो धनपचन-परिग्रहात् । परप्रवृत्तस्य तु भिक्षाकालेऽन्नस्यार्थायेहागतोऽस्मि ॥९॥ वितीर्यते खाद्यते भुज्यते चान्नं प्रभूतं भवतामेतत् । जानीत मां याचनजीवनमिति शेषावशेषं लभतां तपस्वी ॥१०॥ उपस्कृतं भोजनं माहनानामात्मार्थिकं सिद्धमिहैकपक्षम् । ननु वयमिदृशमन्नपानं दास्यामस्तुभ्यं किमिह स्थितोऽसि ॥११॥ स्थलेषु बीजानि वपन्ति कर्षकाः तथैव निम्नेषु चाशंसया । एतया श्रद्धया दद्ध्वं मह्यमाराधयेत्पूर्णमिदं खु क्षेत्रम् ॥१२॥

खेत्ताणि अम्हं विइयाणि लोए, जहिं पकिण्णा विरुहन्ति पुण्णा ।
जे माहणा जाइविज्जोववेया, ताइं तु खेत्ताइं सुपेसलाइं ॥१३॥

कोहो य माणो य वहो य जेसिं, मोसं अदत्तं च परिग्गहो य ।
ते माहणा जाइविज्जाविहूणा, ताइं तु खेत्ताइं सुपावयाइं ॥१४॥

तुब्भेऽत्थ भो भारधरा गिराणं, अट्ठं ण जाणेह अहिज्ज वेए ।
उच्चावयाइं मुणिणो चरन्ति, ताइं तु खेत्ताइं सुपेसलाइं ॥१५॥

अज्झावयाणं पडिकूलभासी, पभाससे किंणु हे सगासे अम्हं ।
अवि एयं विणस्सउ अण्णपाणं, ण य णं दाहामु तुमं णियंठा ! ॥१६॥

समिईहिं मज्झ सुसमाहियस्स, गुत्तीहि गुत्तस्स जिईंदियस्स ।
जइ मे ण दाहित्थ अहेसणिज्जं, किमज्ज जण्णाण लहित्थ लाहं ? ॥१७॥

के इत्थ खत्ता उवजोइया वा, अज्झावया वा सह खण्डिएहिं ।
एयं तु दंडेण फलेण हन्ता, कंठम्मि घेतूण खलिज्ज जो णं ॥१८॥

---

क्षेत्राण्यस्माकं विदितानि लोके येषु प्रकीर्णानि विरोहन्ति पूर्णानि । ये ब्राह्मणा जाति विद्योपेता तानि तु क्षेत्राणि सुपेशलानि ॥१३॥ क्रोधश्च मानश्च वधश्च येषां मृषाऽदत्त च परिग्रहश्च । ते माहना जातिविद्याविहीनास्तानि तु क्षेत्राणि सुपापकानि ॥१४॥ यूयमत्र भो भारधरा गिरामर्थं न जानीथाधीत्य वेदान् । उच्चावचानि मुनयश्चरन्ति तानि तु क्षेत्राणि सुपेशलानि ॥१५॥ उपाध्यायानां प्रतिकूलभाषी प्रभाषसे किं नु सकाशेऽस्माकम् । अपि चैतद्विनश्यत्वन्नपानं न च णं दास्यामस्तव निग्रन्थ ! ॥१६॥ समितिभिर्मह्य सुसमाहिताय गुप्तिभिर्गुप्ताय जितेन्द्रियाय । यदि मह्यं न दास्यथाऽथैषणीयं किमार्या ! यज्ञानां लप्स्यध्वं लाभम् ॥१७॥ केऽत्र क्षत्रा ! उपज्योतिष्का वाऽध्यापका वा सह खण्डिकैः । एनं तु दण्डेन फलेन हत्वा कण्ठे गृहीत्वा स्खलयेयुर्ये नु ॥१८॥

अज्झावयाणं वयणं सुणित्ता, उद्धाइया तत्थ बहू कुमारा।
दण्डेहिं वित्तेहिं कसेहिं चेव, समागया तं इसि तालयन्ति ॥१९॥

रण्णो तहिं कोसलियस्स धूया, भद्द त्ति णामेण अणिन्दियङ्गी;
तं पासिया संजयं हम्ममाणं, कुद्धे कुमारे परिणिव्ववेइ ॥२०॥

देवाभिओगेण णिओइएण, दिण्णा मु रण्णा मणसा ण झाया।
णरिन्द-देविन्दऽभिवंदिएणं, जेणामि वन्ता इसिणा स एसो ॥२१॥

एसो हु सो उग्गतवो महप्पा, जिइन्दिओ संजओ बम्भयारी।
जो मे तया णेच्छइ दिज्जमाणिं, पिउणा सयं कोसलिएण रण्णा ॥२२॥

महाजसो एस महाणुभावो, घोरव्वओ घोरपरक्कमो य।
मा एयं हीलह अहीलणिज्जं, मा सव्वे तेएण भे णिद्दहेज्जा ॥२३॥

एयाइं तीसे वयणाइं सोच्चा, पत्तीई भद्दाइ सुहासियाइं।
इसिस्स वेयावडियट्ठयाए, जक्खा कुमारे विणिवारयन्ति ॥२४॥

---

उपाध्यायानां वचनं श्रुत्वोद्धावितास्तत्र बहवः कुमाराः। दण्डैर्वेत्रैः कशैश्चैव समागतास्तमृषिं ताडयन्ति ॥१९॥ राज्ञस्तत्र कौशलिकस्य दुहिता भद्रेतिनाम्नाऽनिन्दिताङ्गी। तं दृष्ट्वा संयतं हन्यमानं। क्रुद्धान् कुमारान् परिनिर्वापयन्ति ॥२०॥ देवाभियोगेन नियोजितेन दत्तास्मि राज्ञा मनसा न ध्याता। नरेन्द्रदेवेन्द्राभिवन्दितेन येनास्मि वान्तर्षिणा स एषः ॥२१॥ एष हु स उग्रतपा महात्मा जितेन्द्रियस्संयतो ब्रह्मचारी। यो मां तदा नेच्छति दीयमानां पित्रा स्वयं कौशलिकेन राज्ञा ॥२२॥ महायशा एष महानुभाग घोरव्रतो घोरपराक्रमश्च। मैनं हीलयताऽहीलनीयं मा सर्वांस्तेजसा भो निर्धाक्षीत् ॥२३॥ एतानि तस्या वचनानि श्रुत्वा पत्न्या भद्रायास्सुभाषितानि। ऋषेर्वैयावृत्त्यर्थं यक्षाः कुमारान विनिपातयन्ति ॥२४॥

ते घोररूवा ठिय अन्तलिक्खे, असुरा तहिं तं जणं तालयन्ति।
ते भिण्णदेहे रुहिरं वमन्ते, पासिऊण भद्दा इणमाहु भुज्जो ॥२५॥

गिरिं णहेहिं खणह, अयं दंतेहिं खायह।
जायतेयं पाएहि हणह, जे भिक्खुं अवमण्णह ॥२६॥

आसीविसो उग्गतवो महेसी, घोरव्वओ घोरपरक्कमो य।
अगणिं व पक्खन्द पयङ्गसेणा, जे भिक्खुयं भत्तकाले वहेह ॥२७॥

सीसेण एयं सरणं उवेह, समागया सव्वजणेण तुब्भे।
जइ इच्छह जीवियं वा धणं वा, लोगं पि एसो कुविओ डहेज्जा ॥२८॥

अवहेडियपिट्ठिसउत्तमङ्गे, पसारियाबाहु अकम्मचेट्ठे।
णिब्भेरियच्छे रुहिरं वमन्ते, उड्ढम्मुहे णिग्गयजीह-णेत्ते ॥२९॥

ते पासिया खण्डिय कट्ठभूए, विमणो विसण्णो अह माहणो सो।
इंसिं पसाएइ सभारियाओ, हीलं च णिंदं च खमाह भन्ते! ॥३०॥

---

ते घोररूपास्स्थिता अन्तरिक्षे असुरास्तस्मिन्तं जनं ताडयन्ति। तान्भिन्नदेहान् रुधिरं वमतो दृष्ट्वा भद्रेदं ब्रूते भूयः ॥२५॥ गिरिं नखैः खनथायो दंतैः खादथ। जाततेजसं पादैः हथ ये भिक्षुमवमन्यध्वे ॥२६॥ आसीविष उग्रतपा महर्षिर्घोरव्रतो घोरपराक्रमश्च अग्निं वा प्रस्कंदथ पतंगसेना ये भिक्षुकं भक्तकाले विध्यथ ॥२७॥ शीर्षेणैनं शरणमुपेत समागताः सर्वजनेन यूयम्। यदीच्छत जीवितं वा धनं वा लोकमप्येष कुवितो दहेत् ॥२८॥ अवहेडितपृष्ठसदुत्तमाङ्गान् प्रसारितबाहुकर्म्मचेष्टान्। प्रसारितलोचनान् रुधिरं वमत ऊर्ध्वमुखान्निर्गतजिह्वानेत्रान् ॥२९॥ तान् दृष्ट्वा खण्डिकान् काष्टभूतान् विमना विषण्णोऽथ माहनः सः। ऋषिं प्रसादयति सभार्यका हीलां निन्दां च क्षमस्व भदन्त! ॥३०॥

बालेहिं मूढेहिं अयाणएहिं, जं हीलिया तस्स खमाह भन्ते ।
महप्पसाया इसिणो हवन्ति, ण हु मुणी कोवपरा हवन्ति ॥३१॥

पुव्विं च इण्हिं अणागयं च, मणप्पओसो ण मे अत्थि कोइ ।
जक्खा हु वेयावडियं करेन्ति, तम्हा हु एए णिहया कुमारा ॥३२॥

अत्थं च धम्मं च वियाणमाणा, तुब्भे ण वि कुप्पह भूइपण्णा ।
तुब्भं तु पाए सरणं उवेमो, समागया सव्वजणेण अम्हे ॥३३॥

अच्चेमो ते महाभाग!, ण ते किंचि ण अच्चिमो ।
भुञ्जाहि सालिमं कूरं, णाणावंजणसंजुयं ॥३४॥

इमं च मे अत्थि पभूयमण्णं, तं भुञ्जसु अम्ह अणुग्गहट्ठा ।
बाढं ति पडिच्छइ भत्तपाणं, मासस्स उ पारणए महप्पा ॥३५॥

तहियं गन्धोदयपुप्फवासं, दिव्वा तहिं वसुहारा य वुट्ठा ।
पहयाओ दुन्दुहीओ सुरेहिं, आगासे अहो दाणं च घुट्ठं ॥३६॥

---

बालैर्मूढैरजानद्भिः यदि हीलिताः तत् क्षमध्वं भदन्त! । महाप्रसादा ऋषयो भवंति न हु मुनयः कोपपरा भवन्ति ॥३१॥ पूर्वं चेदानीं चानागते च मनःप्रद्वेषो न मेऽस्ति कोऽपि । यक्षा हु वैयावृत्यं कुर्व्वन्ति तस्माध्ध्वेते निहताः कुमाराः ॥३२॥ अर्थं च धर्मं च विजानन्तो यूयं नापि कुप्यथ भूतिप्रज्ञाः । तुभ्यं तु पादौ शरणमुपेमस्समागतास्सर्व्वजनेन वयं ॥३३॥ अर्च्चयामस्ते महाभाग! न ते किञ्चिन्नार्च्चयामः । भुङ्क्ष्व शालिमयं कूरं नानाव्यञ्जनसंयुतम् ॥३४॥ इदं च मेऽस्ति प्रभूतमन्नं तद्भुङ्क्ष्वास्माकमनुग्रहार्थम् । बाढमिति प्रतीच्छति भक्तपानं मासस्य तु पारणके महात्मा ॥३५॥ तस्मिन् गन्धोदकपुष्पवर्षं दिव्यां तस्मिन् वसुधारा च वृष्टा । प्रहता दुन्दुभयस्सुरैराकाशेऽहो दानं च घुष्टम् ॥३६॥

सक्खं खु दीसई तवोविसेसो, ण दीसई जाइविसेसो कोई ।
सोवागपुत्तं हरिएससाहुं, जस्सेरिसा इड्ढि महाणुभागा ॥३७॥

किं माहणा जोइसमारभंता, उदएण सोहिं बहिया विमग्गहा! ।
जं मग्गहा बाहिरियं विसोहिं, ण तं सुदिट्ठं कुसला वयन्ति ॥३८॥

कुसं च जूवं तणकट्ठमग्गिं, सायं च पायं उदगं फुसन्ता ।
पाणाइं भूयाइं विहेडयन्ता, भुज्जो वि मन्दा पगरेह पावं ॥३९॥

कहं चरे भिक्खु वयं जयामो, पावाइं कमाइं पणुल्लयामो! ।
अक्खाहि णे संजय जक्खपूइया, कहं सुजट्ठं कुसला वयन्ति ॥४०॥

छज्जीवकाए असमारभंता, मोसं अदत्तं च असेवमाणा ।
परिग्गहं इत्थिओ माण मायं, एयं परिण्णाय चरंति दन्ता ॥४१॥

सुसंवुडो पंचहिं संवरेहिं, इह जीवियं अणवकङ्खमाणो ।
वोसट्ठकायो सुइ-चत्तदेहा, महाजयं जयइ जण्णसिट्ठं ॥४२॥

---

साक्षात्खु दृश्यते तपो विशेषो न दृश्यते जातिविशेषःकोऽपि। श्वपाकपुत्रं हरिकेशसाधुं यस्येदृश्यृद्धिर्महानुभागा ॥३७॥ किं माहनाः ज्योतिःसमारभमाणा उदकेन शुद्धिं बाह्यां विमार्गयथ। यन्मार्गयथ बाह्यां विशुद्धिं न तत्सुदृष्टं कुशला वदन्ति ॥३८॥ कुशं च यूपं तृणकाष्टमग्निं संध्यायां च प्रात उदकं स्पृशन्तः। प्राणान् भूतान् विहेठयन्तो भूयोऽपि मन्दा प्रकुरुथ पापम् ॥३९॥ कथं चरेमहि भिक्षो! वयं यजामो पापानि कर्माणि प्रणुदामः। आख्याहि नस्संयत! यक्षपूजित! कथं सुयष्टं कुशला वदन्ति ॥४०॥ षड्जीवकायानसमारभमाणा मृषामदत्तं चासेवमानाः। परिग्रहं स्त्रियो मानं मायामेतत्परिज्ञाय चरन्ति दान्ताः ॥४१॥ सुसंवृतः पञ्चभिस्संवरैरिह जीवितमनवकाङ्क्षन्। व्युत्सृष्टकायश्शुचित्यक्तदेहः महाजयं यजति यज्ञश्रेष्टम् ॥४२॥

के ते जोई! के व ते जोइठाणा, का ते सुया! किं च ते कारिसङ्गं! ।
एहा य ते कयरा संति भिक्खू!, कयरेण होमेण हुणासि जोइं! ॥४३॥

तवो जोई जीवो जोइट्ठाणं, जोगा सुया सरीरं कारिसङ्गं ।
कम्म एहा संजमजोग संती, होमं हुणामि इसिणं पसत्थं ॥४४॥

के ते हरए! के य ते संतितित्थे!, कहिं सि णाहो व रयं जहासि ।
आइक्ख णे संजय जक्खपूइया, इच्छामो णाउं भवओ सगासे ॥४५॥

धम्मे हरए बम्भे संतितित्थे, अणाविले अत्तपसण्णलेसे ।
जहिं सि ण्हाओ विमलो विसुद्धो, सुसीइभूओ पजहामि दोसं ॥४६॥

एयं सिणाणं कुसलेहि दिट्ठं, महासिणाणं इसिणं पसत्थं ।
जहिंसि ण्हाया विमला विसुद्धा, महारिसी उत्तमं ठाणं पत्त ॥४७॥
त्ति बेमि ॥

॥ बारसमं हरिएसीज्झमज्झयणं समत्तं ॥१२॥

---

किं ते ज्योतिः किं वा तज्ज्योतिःस्थानं का ते श्रुवः किं ते करीषाङ्गमेधाश्च । ते कतरास्सन्ति भिक्षो! कतरेण होमेन जुहोषि ज्योतिः ॥४३॥ तपो ज्योतिर्जीवो ज्योतिःस्थानं योगाः श्रुवः शरीरं करीषाङ्गम् । कर्मैधास्संयमयोगश्शान्तिः होमेन जुहोम्यृषीणां प्रशस्तेन ॥४४॥ कस्ते ह्रदः किं च ते शान्तितीर्थं कस्मिन् स्नातो वा रजो जहासि । आचक्ष्व नः संयत! यक्षपूजित! इच्छामो ज्ञातुम्भवतश्शकाशे ॥४५॥ धर्मो ह्रदो ब्रह्म शान्तितीर्थमनाविल आत्मप्रसन्नलेशे यत्र स्नातो विमलो विशुद्धः सुशीतीभूतः प्रजहाति दोषम् ॥४६॥ एतत् स्नानं कुशलेन दृष्टं महास्नानमृषीणां प्रशस्तम् । तत्र स्नाता विमला विशुद्धा महर्षय उत्तमं स्थानं प्राप्ताः ॥४७॥ इति ब्रवीमि ॥

## ॥ अथ चित्रसम्भूतीयाख्यं त्रयोदशममध्ययनम् ॥

जाईपराइओ खलु, कासि णियाणं तु हत्थिणपुरम्मि ।
चुलणीइ बम्भदत्तो, उववण्णो पउमगुम्माओ ॥१॥

कंपिल्ले सम्भूओ चित्तो, पुण जाओ पुरिमतालम्मि ।
सेट्ठिकुलम्मि विसाले, धम्मं सोऊण पव्वइओ ॥२॥

कंपिल्लम्मि य नयरे, समागया दो वि चित्त-सम्भूया ।
सुह-दुक्ख-फलविवागं, कहन्ति ते इक्कमिक्कस्स ॥३॥

चक्कवट्टी महिड्ढीओ, बम्भदत्तो महायसो ।
भायरं बहुमाणेणं, इमं वयणमब्बवी ॥४॥

आसिमो भायरा दो वि, अण्णमण्णवसाणुगा ।
अण्णमण्णमणूरत्ता, अण्णमण्णहिएसिणो ॥५॥

दासा दसण्णे आसी, मिया कालिञ्जरे नगे ।
हंसा मयङ्गतीराए, सोवागा कासिभूमिए ॥६॥

---

जातिपराजितः खल्वकार्षीन्निदानं हस्तिनागपुरे । चुलन्यां ब्रह्मदत्त उत्पन्नः पद्मगुल्मात् ॥१॥ कांपिल्ये सम्भूतः चित्रः पुनर्जातः पुरिमताले । श्रेष्ठिकुले विशाले धर्मं श्रुत्वा प्रव्रजितः ॥२॥ काम्पिल्ये च नगरे समागतौ द्वावपि चित्रसम्भूतौ । सुखदुःखफलविपाकं कथितवन्तौ ता एकैकस्य ॥३॥ चक्रवर्ती महर्द्धिक ब्रह्मदत्तो महायशाः । भ्रातरं बहुमानेनेमं वचनमब्रवीत् ॥४॥ अभूवाऽऽवां भ्रातरौ द्वा अप्यन्योन्यमनुरक्ता अन्योहितैषिणौ ॥५॥ दासो दशार्णे अभूव मृगौ कालीञ्जरे नगे । हंसौ मृतगङ्गातीरे श्वपाकौ काशीभूम्यां ॥६॥

देवा य देवलोगम्मि, आसि अम्हे महिड्ढिया ।
इमा णो छट्ठिया जाई, अण्णमण्णेण जा विणा ॥७॥

कम्मा णियाणपगडा, तुमे राय! विचिन्तिया ।
तेसिं फलविवागेण, विप्पओगमुवागया ॥८॥

सच्च-सोयप्पगडा, कम्मा मए पुरा कडा ।
ते अज्ज परिभुञ्जामो, किं णु चित्तो वि से तहा! ॥९॥

सव्वं सुचिण्णं सफलं नराणं, कडाण कम्माण ण मोक्खु अत्थि ।
अत्थेहिं कामेहिं य उत्तमेहिं, आया ममं पुण्णफलोववेओ ॥१०॥

जाणाहि संभूय! महाणुभागं, महिड्ढियं पुण्णफलोववेयं ।
चित्तं पि जाणाहि तहेव रायं!, इड्ढी जुई तस्स वि य प्पभूया ॥११॥

महत्थरूवा वयणप्पभूया, गाहाणुगीया नरसंघमज्झे ।
जं भिक्खुणो सीलगुणोववेया, इहऽज्जयन्ते समणो मि जाओ ॥१२॥

---

देवौ च देवलोके अभूवावाम्महर्द्धिकौ । इमाऽऽवयोष्षष्ठिका जनिरन्योऽन्येन या विना ॥७॥ कर्माणि निदानप्रकटानि त्वया राजन्विचिन्तितानि । तेषां फलविपाकेन विप्रयोगमुपागतौ ॥८॥ सत्यशौचप्रकटानि कर्माणि मया पुराकृतानि । तान्यद्य परिभुञ्जे किं नु चित्रोऽपि तानि तथा ॥९॥ सर्वं सुचीर्णं सफलं नराणां कृतानां कर्मणां न मोक्षोऽस्ति । अर्थैः कामैश्चोत्तमैरात्मा मम पुण्यफलोपेतः ॥१०॥ जानासि सम्भूत! महानुभागम्महर्द्धिकं पुण्यफलोपेतम् । चित्रमपि जानीहि तथैव राजनृद्धिर्द्युतिस्तस्यापि च प्रभूता ॥११॥ महार्थरूपा वचनात्प्रभूता गाथानुगीता नरसंघमध्ये । यां भिक्षवश्शीलगुणोपेता इहाऽर्जयन्ति श्रमणोऽस्मि जातः ॥१२॥

उच्चोदए १ महु २ कक्के ३ य ४ बम्भे ५, पवेइया आवसहा य रम्मा ।
इमं गिहं वित्तधणप्पभूयं, पसाहि पंचालगुणोववेयं ॥१३॥

णट्टेहिं गीएहिं य वाइएहिं, णारीजणाइं परिचारयन्तो ।
भुंजाहि भोगाइं इमाइं भिक्खू, मम रोयई पव्वज्जा हु दुक्खं ॥१४॥

तं पुव्वणेहेण कयाणुरागं, णराहिवं कामगुणेसु गिद्धं ।
धम्मस्सिओ तस्स हियाणुपेही, चित्तो इमं वयणमुदाहरित्था ॥१५॥

सव्वं विलवियं गीयं, सव्वं णट्टं विडम्बणा ।
सव्वे आभरणा भारा, सव्वे कामा दुहावहा ॥१६॥

बालाभिरामेसु दुरावहेसु, ण तं सुहं कामगुणेसु रायं ! ।
विरत्तकामाण तवोधणाणं, जं भिक्खुणं सीलगुणे रयाणं ॥१७॥

णरिंद जाई अधमा णराणं, सोवागजाई दुहओ गयाणं ।
जहिं वयं सव्वजणस्स वेसा, वसीय सोवागणिवेसणेसु ॥१८॥

---

उच्चोदयो १ मधुः २ कर्कः ३ च ४ ब्रह्मा ५ प्रवेदिता आवसथाश्च रम्याः । चित्रधनप्रभूतं प्रशाधि पाञ्चालगुणोपेतम् ॥१३॥ नृत्यैर्गीतैश्च वादित्रैश्चनारीजनान् परिचारयन् । भुङ्क्ष्व भोगानिमान् भिक्षो ! मह्यं रोचते प्रव्रज्या हु दुःखम् ॥१४॥ तं पूर्वस्नेहेन कृतानुरागं नराधिपं कामगुणेषु गृद्धम् । धर्माश्रितस्तस्य हितानुप्रेक्षी चित्र इदं वचनमुदाहृतवान् ॥१५॥ सर्वं विलपितं गीतं सर्वं नृत्यं विडम्बितम् । सर्वाण्याभरणानि भाराः सर्वे कामा दुःखावहाः ॥१६॥ बालाभिरामेषु दुःखावहेषु न तत्सुखं कामगुणेषु राजन् ! । विरक्तकामानां तपोधनानां यद्भिक्षूणां शीलगुणे रतानाम् ॥१७॥ नरेन्द्र ! जनिरधमा नराणां श्वपाकजनिर्द्वयोर्गतयोः । यस्यामावां सर्वजनस्य द्वेष्यौ अवसावः श्वपाकनिवेशनेषु ॥१८॥

तीसे य जाईइ उ पावियाए, वुत्था मु सोवागणिवेसणेसु ।
सव्वस्स लोगस्स दुगंछणिज्जा, इहं तु कम्माइं पुरे कडाइं ॥१९॥

सो दाणि सिं राय! महाणुभागो, महिड्ढिओ पुण्णफलोववेओ ।
चइत्तु भोगाइं असासयाइं, आयाणहेउं अभिणिक्खमाहि ॥२०॥

इह जीविए राय! असासयम्मि, धणियं तु पुण्णाइ अकुव्वमाणो ।
से सोयई मच्चुमुहोवणीए, धम्मं अकाऊण परम्मि लोए ॥२१॥

जहेह सीहो व मियं गहाय, मच्चू णरं णेइ हु अन्तकाले ।
ण तस्स माया व पिया व भाया, कालम्मि तम्मंसहरा भवंति ॥२२॥

ण तस्स दुक्खं विभयन्ति णाइओ, ण मित्तवग्गा ण सुया ण बंधवा ।
इक्को सयं पच्चणुहोइ दुक्खं, कत्तारमेवं अणुजाइ कम्मं ॥२३॥

चिच्चा दुपयं च चउप्पयं च, खित्तं गिहं धण-धण्णं च सव्वं ।
कम्मप्पबीओ अवसो पयाइ, परं भवं सुंदर पावगं वा ॥२४॥

---

तस्यां च जात्यां तु पापिकायामुषितौ आवां श्वपाकनिवेशनेषु । सर्वस्य लोकस्य जुगुप्सनीया इह तु कर्माणि पुराकृतानि ॥१९॥ स इदानीं राजा महानुभागो महर्द्धिकः पुण्यफलोपेतः । त्यक्त्वा भोगानशाश्वतानादानहेतोरभिनिष्क्रामः ॥२०॥ इह जीविते राजन्नशाश्वते अतिशयेन तु पुण्यान्यकुर्वाणः । स शोचते मृत्युमुखोपनीतो धर्ममकृत्वा परस्मिन् लोके ॥२१॥ यथेह सिंह इव मृगं गृहीत्वा मृत्युर्नरं नयति ह्यन्तकाले । न तस्य माता वा पिता वा भ्राता काले तस्मिन्नंशधरा भवन्ति ॥२२॥ न तस्य दुःखं विभजन्ति ज्ञातयो न मित्रवर्गा न सुता न बान्धवाः । एकस्स्वयं प्रत्यनुभवति दुःखं कर्तारमेवानुयाति कर्म ॥२३॥ त्यक्त्वा द्विपदं च चतुष्पदं च क्षेत्रं गृहं धनधान्यं च सर्वम् । कर्मात्मद्वितीयोऽवशः प्रयाति परं भवं सुंदरं पापकं वा ॥२४॥

तमेगयं तुच्छसरीरगं से, चिईगयं दहिय उ पावगेणं।
भज्जा य पुत्तोवि य णायओ य, दायारमण्णं अणुसंकमन्ति ॥२५॥

उवणिज्जइ जीवियमप्पमायं, वण्णं जरा हरइ णरस्स रायं!।
पंचालराया! वयणं सुणाहि, मा कासि कम्माणि महालयाइं ॥२६॥

अहं पि जाणामि जहेह साहू!, जं मे तुमं साहसि वक्कमेयं।
भोगा इमे सङ्गकरा हवन्ति, जे दुज्जया अज्जो! अम्हारिसेहिं ॥२७॥

हत्थिणपुरम्मि चित्ता!, दट्ठूणं णरवइं महिड्ढियं।
कामभोगेसु गिद्धेणं, णियाणमसुहं कडं ॥२८॥

तस्स मे अप्पडिकन्तस्स, इमं एयारिसं फलं।
जाणमाणो वि जं धम्मं, कामभोगेसु मुच्छिओ ॥२९॥

णागो जहा पङ्कजलावसण्णो, दट्ठुं थलं णाभिसमेइ तीरं।
एवं वयं कामगुणेसु गिद्धा, ण भिक्खुणो मग्गमणुव्वयामो ॥३०॥

---

तदेकं तुच्छशरीरकं तस्य चितिगतं दग्ध्वा तु पावकेन। भार्या च पुत्रोऽपि च ज्ञातयश्च दातारमन्यमनुसङ्क्रामन्ति ॥२५॥ उपनीयते जीवितमप्रमादं वर्णं जरा हरति नरस्य राजन्!। पञ्चालराज! वचनं श्रुणु मा कार्षीः कर्माणि महालयानि ॥२६॥ अहमपि जानामि यथेह साधो! यन्मे त्वं साधयसि वाक्यमेतत्। भोगा इमे संगकरा भवन्ति ये दुर्जया आर्य! अस्मादृशैः ॥२७॥ हस्तिनागपुरे चित्र! दृष्ट्वा नरपतिम्महर्द्धिकम्। कामभोगेषु गृद्धेन निदान-मशुभं! कृतम् ॥२८॥ तस्य मेऽप्रतिक्रान्तस्येदमेतादृशं फलम्। जानन्नपि यद्धर्मं कामभोगेषु मूर्छितः ॥२९॥ नागो यथा पङ्कजलावसन्नो दृष्ट्वा स्थलं नाभिसमेति तीरम्। एवं वयं कामगुणेषु गृद्धा न भिक्षोर्मार्गमनुव्रजामः ॥३०॥

अच्चेइ कालो तूरन्ति राइओ, ण यावि भोगा पुरसाण णिच्चा ।
उविच्च भोगा पुरिसं चयन्ति, दुमं जहा खीणफलं व पक्खी ॥३१॥

जइऽसि भोगे चविउं असत्तो, अज्जाइं कम्माइं करेहि रायं ।
धम्मे ठिओ सव्वपयाणुकम्पी, तो होहिसि देवो इओ विउव्वी ॥३२॥

ण तुज्झ भोगे चइऊण बुद्धी, गिद्धो सि आरम्भपरिग्गहेसु ।
मोहं कओ इत्तिउ विप्पलावो, गच्छामि रायं आमन्तिओ सि ॥३३॥

पञ्चालराया वि य बम्भदत्तो, साहुस्स तस्स वयणं अकाउं ।
अणुत्तरे भुञ्जिय कामभोगे, अणुत्तरे सो नरए पविट्ठो ॥३४॥

चित्तो वि कामेहि विरत्तकामो, उदत्तचारित्ततवो महेसी ।
अणुत्तरं संजम पालइत्ता, अणुत्तरं सिद्धिगइं गओ ॥३५॥ त्ति बेमि

॥ तेरसमं चित्तसम्भूइज्झयणं सम्मत्तं ॥

---

अत्येति कालस्त्वरन्ति रात्रयो नचापि भोगाः पुरुषाणां नित्याः। उपेत्य भोगाः पुरुषं त्यजन्ति द्रुमं यथा क्षीणफलं व पक्षी ॥३१॥ यद्यसि भोगान्त्यक्तुमशक्त आर्याणि कर्माणि कुरु राजन्!। धर्मे स्थितस्सर्वप्रजानुकम्पी ततो भविष्यसि देव इतो विकुर्वी ॥३२॥ न तव भोगान्त्यक्तुं बुद्धिर्गृद्धोऽस्यारम्भपरिग्रहेषु। मोघं कृत एतावान्विप्रलापो गच्छामि राजन्! आमंत्रितोऽसि ॥३३॥। पञ्चालराजाऽपि च ब्रह्मदत्तस्साधोस्तस्य वचनमकृत्वा। अनुत्तरान् भुङ्क्त्वा कामभोगाननुत्तरे स नरके प्रविष्टः ॥३४॥ चित्रोऽपि कामेभ्यो विरक्तकाम उदात्तचारित्रतपो महर्षिः। अनुत्तरं संयमं पालयित्वाऽनुत्तरां सिद्धिगतिं गतः ॥३५॥ इति ब्रवीमि ॥

॥ अथ इषुकारीयाख्यं चतुर्दशमध्ययनम् ॥

देवा भवित्ताण पुरे भवम्मि, केई चुया एगविमाणवासी ।
पुरे पुराणे उसुयारनामे, खाए समिद्धे सुरलोगरम्मे ॥१॥

सकम्मसेसेण पुराकएणं, कुलेसु उग्गे (सुदत्ते) सु य ते पसूया ।
णिव्विण संसारभया जहाय, जिणिंदमग्गं सरणं पवण्णा ॥२॥

पुमत्तमागम्म कुमार दोऽवी, पुरोहिओ तस्स जसा य पत्ती ।
विसालकित्तीय तहेसुयारो, रायत्थ देवी कमलावई य ॥३॥

जाईजरामच्चुभयाभिभूया, बहिं विहाराभिणिविट्ठचित्ता ।
संसारचक्कस्स विमोक्खणट्ठा, दट्ठूण ते कामगुणे विरत्ता ॥४॥

पियपुत्तगा दोण्णि वि माहणस्स, सकम्मसीलस्स पुरोहियस्स ।
सरित्तु पोराणिय तत्थ जाइं, तहा सुचिण्णं तवसंजमं च ॥५॥

ते कामभोगेसु असज्जमाणा, माणुस्सएसुं जे यावि दिव्वा ।
मोक्खाभिकंखी अभिजायसड्ढा, तायं उवागम्म इमं उदाहु ॥६॥

---

देवा भूत्वा पूर्वभवे केचिच्च्युता एकविमानवासिनः । पुरे पुराणे इषुकारनाम्नि ख्याते समृद्धे सुरलोकरम्ये ॥१॥ स्वकर्मशेषेण पुराकृतेन कुलेष्वुदात्तेषु च ते प्रसूताः । निर्विण्णाः संसारभयाद्धित्वा जिनेन्द्रमार्गं शरणं प्रपन्नाः ॥२॥ पुंस्त्वमागम्य कुमारौ द्वावपि पुरोहितस्तस्य यशा च पत्नी । विशालकीर्तिश्च तथेषुकारो राजाऽत्र देवी कमलावती च ॥३॥ जातिजरामृत्युभयाभिभूतौ बहिर्विहाराभिनिविष्टचित्तौ । संसारचक्रस्य विमोक्षणार्थं दृष्ट्वा तौ कामगुणेभ्यो विरक्तौ ॥४॥ प्रियपुत्रकौ द्वावपि माहनस्य स्वकर्मशीलस्य पुरोहितस्य । स्मृत्वा पौराणिकीं तत्र जातिं तथा सुचीर्णं तपस्संयमं च ॥५॥ तौ कामभोगेष्वसंसजतौ मानुष्यकेषु ये चापि दिव्याः । मोक्षाभिकाङ्क्षिणा अभिजातश्रद्धौ तातमुपागम्येदमुदाहुः ॥६॥

असासयं दट्ठु इमं विहारं, बहुअन्तरायं न य दीहमाउं।
तम्हा गिहंसि ण रइं लभामो, आमन्तयामो चरिसामु मोणं ॥७॥

अह तायओ तत्थ मुणीण तेसिं, तवस्स वाघायकरं वयासी।
इमं वयं वेयविओ वयन्ति, जणा ण होई असुयाण लोगो ॥८॥

अहिज्ज वेए परिविस्स विप्पे, पुत्ते परिट्ठप्प गिहंसि जाया।
भोच्चाण भोए सह इत्थियाहिं, आरण्णगा होह मुणी पसत्था ॥९॥

सोयग्गिणा आयगुणिन्धणेणं, मोहाणिला पज्जलणाहिएणं।
संतत्तभावं परितप्पमाणं, लोलुप्पमाणं बहुहा बहुं च ॥१०॥

पुरोहियं तं कमसोऽणुणन्तं, निमंतयन्तं च सुए धणेणं।
जहक्कमं कामगुणेहि चेव, कुमारगा ते पसमिक्ख वक्कं ॥११॥

वेया अहीया ण भवन्ति ताणं, भुत्ता दिया णिन्ति तमं तमेणं।
जाया य पुत्ता ण हवन्ति ताणं, को णाम ते अणुमण्णिज्ज एयं ॥१२॥

---

अशाश्वतं दृष्ट्वेमं विहारं बह्वन्तरायं न च दीर्घमायुः। तस्माद् गृहे न रतिं लभावह आमन्त्रयावहे चरिष्यावो मौनम् ॥७॥ अथ तातकस्तत्र मुन्योस्तयोस्तपसो व्याघातकरमवादीत्। इमां वाचं वेदविदो वदन्ति यथा न भवत्यसुतानां लोकः ॥८॥ अधीत्य वेदान् परिवेष्य विप्रान् पुत्रान्प्रतिष्ठाप्य गृहे जातान्। भुक्त्वा भोगान्सह स्त्रीभिरारण्यकौ भवत म्मुनी प्रशस्तौ ॥९॥ शोकाग्निनाऽऽत्मगुणेंधनेन मोहानिलात्प्रज्वलनाधिकेन। संतप्तभावं परितप्यमानं लोलुप्यमानं बहुधा बहुं च ॥१०॥ पुरोहितं तं क्रमेणानुनयन्तं निमंत्रयन्तं च सुतौ धनेन। यथाक्रमं कामगुणैश्चैव कुमारकौ तो प्रसमीक्ष्य वाक्यम् ॥११॥ वेदा अधीता न भवन्ति त्राणं भोजिता द्विजा नयन्ति तमस्तमसा। जाताश्च पुत्रा न भवन्ति त्राणं को नाम ते अनुमन्यतैतत् ॥॥१२॥

खणमेत्तसोक्खा बहुकालदुक्खा, पगामदुक्खा अणिगामसोक्खा ।
संसारमोक्खस्स विपक्खभूया, खाणी अणत्थाण उ कामभोगा ॥१३॥

परिव्वयन्ते अणियत्त कामे, अहो य राओ परितप्पमाणे ।
अण्णप्पमत्ते धणमेसमाणे, पप्पोत्ति मच्चुं पुरिसे जरं च ॥१४॥

इमं च मे अत्थि इमं च णत्थि, इमं च मे किच्च इमं अकिच्चं ।
तं एवमेवं लालप्पमाणं, हरा हरंति त्ति कहं पमाओ ॥१५॥

धणं पभूयं सह इत्थियाहिं, सयणा तहा कामगुणा पगामा ।
तवं कए तप्पइ जस्स लोगो, तं सव्वसाहीणमिहेव तुब्भं ॥१६॥

धणेण किं धम्मधुराहिगारे, सयणेण वा कामगुणेहि चेव ।
समणा भविस्सामु गुणोहधारी, बहिंविहारा अभिगम्म भिक्खं ॥१७॥

जहा य अग्गी अरणीउऽसन्तो, खीरे घयं तेल्लमहा तिलेसु ।
एमेव जाया सरीरंमि सत्ता, संमुच्छई णासइ णावचिट्ठे ॥१८॥

---

क्षणमात्रसौख्या बहुकालदुःखाः प्रकामदुःखा अनिकामसौख्याः । संसारमोक्षस्य विपक्षभूताः खानिरनर्थानां तु कामभोगाः ॥१३॥ परिव्रजन्ननिवृत्तकामोऽह्नि च रात्रौ च परितप्यमानः । अन्नप्रमत्तो (अन्यप्रमत्तो) धनमेषमाणः प्राप्नोति मृत्युं पुरुषो जरां च ॥१४॥ इदं च मेऽस्तीदं च नास्तीदं च मे कृत्यमिदमकृत्यं । तमेवमेव लालप्यमानं हरा हरन्तीति कथं प्रमादः ॥१५॥ धनं प्रभूतं सह स्त्रीभिस्स्वजनास्तथा कामगुणाः प्रकामाः । तपः कृते तप्यते यस्य लोकस्तत्सर्वं स्वाधीनमिहैव युवयोः ॥१६॥ धनेन किं धर्मधुराधिकारे स्वजनेन वा कामगुणैश्चैव । श्रमणौ भविष्यावो गुणौघधारिणौ बहिर्विहारावभिगम्य भिक्षाम् ॥१७॥ यथा चाग्निररणितोऽसन् क्षीरे घृतं तैलमथ तिलेषु । एवमेव जातौ शरीरे सत्वास्संमुर्च्छन्ति नश्यन्ति नावतिष्ठन्ते ॥१८॥

णो इन्दियग्गेज्झ अमुत्तभावा, अमुत्तभावा वि य होइ निच्चो ।
अज्झत्थहेउं णिययस्स बन्धो, संसारहेउं च वयन्ति बन्धं ॥१९॥
जहा वयं धम्ममजाणमाणा, पावं पुरा कम्ममकासि मोहा ।
ओरुज्झमाणा परिरक्खियन्ता, तं णेव भुज्जोवि समायरामो ॥२०॥
अब्भाहयंमि लोगंमि, सव्वओ परिवारिओ ।
अमोहाहिं पडन्तीहिं, गिहंसि ण रइं लभे ॥२१॥
केण अब्भाहओ लोगो, केण वा परिवारिओ ।
का वा अमोहा वुत्ता, जाया चिंतावरो हुमि ॥२२॥
मच्चुणाऽब्भाहओ लोगो, जराए परिवारिओ ।
अमोहा रयणी वुत्ता, एवं ताय विजाणह ॥२३॥
जा जा वच्चइ रयणी, ण सा पडिणियत्तई ।
अहम्मं कुणमाणस्स, अफला जन्ति राइओ ॥२४॥

---

नो इन्द्रियग्राह्योऽमूर्तभावादमूर्त्तभावादपि भवति नित्यः । आत्मस्थहेतुर्नियतोऽस्य बन्धस्संसारहेतुं च वदन्ति बन्धम् ॥१९॥ यथा वयं धर्ममजानाना पापं पुरा कर्माकार्ष्म मोहात् । अवरुध्यमानाः परिरक्षमाणास्तन्नैव भूयोपि समाचरामः ॥२०॥ अभ्याहते लोके सर्वत्र परिवारिते । अमोघाभिः पतन्तीभिर्गृहे न रतिं लभावहे ॥२१॥ केनाभ्याहतो लोकः केन वा परिवारितो का वाऽमोघोक्ता जातौ चिन्तापरो भवामि ॥२२॥ मृत्युनाभ्याहतो लोको जरया परिवारितः । अमोघा रजन्य उक्ता एवं तात! विजानीत ॥२३॥ या या व्रजति रजनी न सा प्रतिनिवर्तते । अधर्मं कुर्वतोऽफला यान्ति रात्रयः ॥२४॥

जा जा वच्चइ रयणी, ण सा पडिणियत्तइ ।
धम्मं च कुणमाणस्स सफला जन्ति राइओ ॥२५॥
एगओ संवसित्ता णं, दुहओ सम्मत्तसंजुया ।
पच्छा जाया गमिस्सामो, भिक्खमाणा कुले कुले ॥२६॥
जस्सऽत्थि मच्चुणा सक्खं, जस्स वत्थि पलायणं ।
जो जाणइ ण मरिस्सामि, सो हु कंखे सुए सिया ॥२७॥
अज्जेव धम्मं पडिवज्जायामो, जहिं पवण्णा ण पुणब्भवामो ।
अणागयं णेव य अत्थि किंची, सद्धाखमं णो विणइत्तु रागं ॥२८॥
पहीणपुत्तस्स हु णत्थि वासो, वासिट्ठिभिक्खायरियाइ कालो ।
साहाहि रुक्खो लहई समाहिं, छिण्णाहि साहाहि तमेव खाणुं ॥२९॥
पंखाविहूणो व्व जहेव पक्खी, भिच्चव्विहूणो व्व रणे णरिन्दो ।
विवण्णसारो वणिओ व्व पोए, पहीणपुत्तो मि तहा अहं पि ॥३०॥

---

या या व्रजति रजनी न सा प्रतिनिवर्तते । धर्मे च कुर्वतस्सफला यान्ति रात्रयः ॥२५॥ एकतस्समुष्यणं द्वये सम्यक्त्वसंयुताः । पश्चाज्जातौ गमिष्यामो भिक्षमाणा कुले कुले ॥२६॥ यस्यास्ति मृत्युना सख्यं यस्य वाऽस्ति पलायनम् । यो जानीते न मरिष्यामि स हु काङ्क्षति श्वस्स्यात् ॥२७॥ अद्यैव धर्मं प्रतिपद्यामहे यं प्रपन्ना न पुनर्भविष्यामः । अनागतं नैव चास्ति किंचिद् श्रद्धाक्षमं नो व्यपनीय रागम् ॥२८॥ प्रहीणपुत्रस्य हु नास्ति वासो वाशिष्टि! भिक्षा चर्यायाः कालः । शाखाभिर्वृक्षो लभते समाधिं छिन्नाभिश्शाखाभिस्तमेव स्थाणुम् ॥२९॥ पक्षविहीनो वा यथेह पक्षी भृत्यविहीनो वा रणे नरेन्द्रः । विपन्नसारो वणिक्वा पोते प्रहीणपुत्रोऽस्मि तथाऽहमपि ॥३०॥

सुसंभिया कामगुणा इमे ते, संपिण्डिया अग्गरसप्पभूया ।
बहुयाणि उ वासाणि, सामण्णमणुपालिया ।
मासिएणं उ भत्तेण, सिद्धिं पत्तो अणुत्तरं ॥९५॥

---

लाभालाभयोस्सुखे दुःखे, जीविते मरणे तथा। समो निन्दाप्रशंसयोस्तथा मानापमानयोः ॥९०॥ गौरवेभ्यः कषायेभ्यो, दण्डशल्यभयेभ्यश्च। निवृत्तो हास्यशोकाभ्यामनिदानोऽबन्धनः ॥९१॥ अनिश्रित इह लोके, परलोकेऽनिश्रितः। वासीचन्दनकल्पश्चाशनेऽनशने तथा ॥९२॥ अप्रशस्तेभ्यो द्वारेभ्यस्सर्वतः पीहिताश्रवः। अध्यात्मध्यानयोगैः प्रशस्तो दमशासनः ॥९३॥ एवं ज्ञानेन चरणेन, दर्शनेन तपसा च। भावनाभिश्च शुद्धाभिः, सम्यग् भावयित्वाऽऽत्मानम् ॥९४॥ बहुकानि तु वर्षाणि, श्रामण्यमनुपाल्य। मासिकेन तु भक्तेन, सिद्धिं प्राप्तोऽनुत्तराम् ॥९५॥

एवं करेंति संबुद्धा, पण्डिया पवियक्खणा ।
विणियट्टंति भोगेसु, मियापुत्ते जहा मिसी ॥९६॥

महप्पभावस्स महाजसस्स, मियाइ पुत्तस्स णिसम्म भासियं ।
तवप्पहाणं चरियं च उत्तमं, गइप्पहाणं च तिलोगविस्सुयं ॥९७॥

वियाणिया दुक्खविवड्ढणं धणं, ममत्तबन्धं च महाभयावहं ।
सुहावहं धम्मधुरं अणुत्तरं, धारेज्ज णिव्वाणगुणावहं महं ॥९८॥

त्ति बेमि

卐

॥१९॥ एगूण वीसइमं मियापुत्तिज्जं अज्झयणं समत्तं ॥

---

एवं कुर्वन्ति सम्बुद्धाः, पण्डिता प्रविचक्षणाः। विनिवर्तन्ते भोगेभ्यो, मृगापुत्रो यथर्षिः ॥९६॥ महाप्रभावस्य महायशसो, मृगा (देव्यः) पुत्रस्य निशम्य भाषितम्। तपः-प्रधानं चरित्रं चोत्तमं, प्रधानगतिं च त्रिलोकविश्रुतम् ॥९७॥ विज्ञाय दुःखविवर्धनं धनं, ममत्वबन्धं च महाभयावहम्। सुखावहां धर्मधुरामनुत्तरां, धारयत निर्वाणगुणावहां महतीम् ॥९८॥ इति ब्रवीमि.

॥ एकोनविंशतितमं मृगापुत्रीयमध्ययनं समाप्तम् ॥

॥ अथ महानिर्ग्रन्थीयं विंशतितममध्ययनम् ॥

सिद्धाण णमो किच्चा, संजयाणं च भावओ ।
अत्थधम्मगइं तच्चं, अणुसट्ठिं सुणेह मे ॥१॥

पभूयरयणो राया, सेणिओ मगहाहिवो ।
विहारजत्तं णिज्जाओ, मंडिकुच्छिसि चेइए ॥२॥

णाणादुमलयाइण्णं, णाणापक्खिणिसेवियं ।
णाणाकुसुमसंछण्णं, उज्जाणं णंदणोवमं ॥३॥

तत्थ सो पासई साहुं, संजयं सुसमाहियं ।
णिसण्णं रुक्खमूलम्मि, सुकुमालं सुहोइयं ॥४॥

तस्स रूवं तु पासित्ता, राइणो तम्मि संजए ।
अच्चन्तपरमो आसी, अउलो रूवविम्हओ ॥५॥

---

सिद्धेभ्यो नमस्कृत्य, संयतेभ्यश्च भावतः । अर्थधर्मगतिं तथ्यामनुशिष्टिं शृणुत मम ॥ १ ॥ प्रभूतरत्नो राजा, श्रेणिको मगधाधिपः । विहारयात्रया निर्यातो, मण्डिकुक्षौ चैत्ये ॥ २ ॥ नानाद्रुमलताकीर्णं, नानापक्षिनिषेवितम् । नानाकुसुमसंछन्नमुद्यानं नन्दनोपमम् ॥ ३ ॥ तत्र स पश्यति साधुं संयतं सुसमाहितम् । निषण्णं वृक्षमूले, सुकुमालं सुखोचितम् (शुभोचितं) ॥ ४ ॥ तस्य रूपं तु दृष्ट्वा, राज्ञस्तस्मिन्संयते । अत्यन्तपरम आसीदतुलरूपविस्मयः ॥ ५ ॥

अहो! वण्णो अहो! रूवं, अहो! अज्जस्स सोमया ।
अहो! खन्ती अहो! मुत्ती, अहो! भोगे असंगता ॥६॥

तस्स पाए उ वंदित्ता, काऊण य पयाहिणं ।
णाइदूरमणासण्णे, पंजली पडिपुच्छई ॥७॥

तरुणोसि अज्जो! पव्वइओ, भोगकालम्मि संजया! ।
उवट्ठितोसि सामण्णे, एतमट्ठं सुणेमु ता ॥८॥

अणाहो मि महारायं!, णाहो मज्झ ण विज्जई ।
अनुकम्पगं सुहिं वा वि, कंची णाभिसमेमऽहं ॥९॥

तओ सो पहसिओ राया, सेणिओ मगहाहिवो ।
एवं ते इड्ढिमंतस्स, कहं णाहो ण विज्जई? ॥१०॥

होमि णाहो भयंताणं, भोगे भुंजाहि संजय! ।
मित्त-णाईपरिवुडो, माणुस्सं खु सुदुल्लहं ॥११॥

---

अहो! वर्णोऽहो! रूपमहो! आर्यस्य सौम्यता। अहो! क्षान्तिरहो! मुक्तिरहो! भोगेऽसंगता ॥ ६ ॥ तस्य पादौ तु वन्दित्वा, कृत्वा च प्रदक्षिणाम्। नातिदूरमनासन्नः, प्रांजलिः प्रतिपृच्छति ॥ ७ ॥ तरुणोऽस्यार्य !, प्रव्रजितो, भोगकाले संयत!। उपस्थितोऽसि श्रामण्य एनमर्थं तावच्छृणोमि ॥ ८ ॥ अनाथोऽस्मि महाराज !, नाथो मम न विद्यते। अनुकम्पकं सुहृदं वापि, किंचित् नाभिसमेम्यहं ॥ ९ ॥ ततः स प्रहसितो राजा, श्रेणिको मगधाधिपः। एवं तवर्द्धिमतः कथं नाथो न विद्यते! ॥ १० ॥ भवामि नाथो भदंतानां, भोगान् भुङ्क्ष्व संयत! मित्रज्ञातिपरिवृतो, मानुष्यं खलु सुदुर्लभम् ॥ ११ ॥

अप्पणावि अणाहोसि, सेणिया! मगहाहिवा! ।
अप्पणा अणाहो सन्तो, कहं णाहो भविस्ससि ? ॥१२॥

एवं वुत्तो णरिन्दो सो, सुसंभंता सुविम्हिओ ।
वयणं असुयपुव्वं, साहुणा विम्हयण्णिओ ॥१३॥

अस्सा हत्थी मणुस्सा मे, पुरं अंतेउरं च मे ।
भुंजामि माणुसे भोगे, आणा इस्सरियं च मे ॥१४॥

एरिसे सम्पयग्गम्मि, सव्वकामसमप्पिए ।
कहं अणाहो भवई ?, मा हु भन्ते! मुसं वए ॥१५॥

ण तुमं जाणे अणाहस्स, अत्थं पोत्थं व पत्थिवा! ।
जहा अणाहो भवइ, सणाहो वा णराहिवा! ॥१६॥

सुणेह मे महाराय!, अव्वक्खित्तेण चेयसा ।
जहा अणाहो भवई, जहा मे य पवत्तियं ॥१७॥

---

आत्मनाऽप्यनाथोऽसि, श्रेणिक! मगधाधिपाआत्मनाऽनाथस्सन्, कथं नाथो भविष्यसि ? ॥ १२ ॥ एवमुक्तो नरेन्द्रस्स, सुसंभ्रान्तस्सुविस्मितः । वचनमश्रुतपूर्वं, साधुना विस्मयं नीतिः ॥ १३ ॥ अश्वा हस्तिनो मनुष्या मे, पुरमन्तःपुरं च मे । भुनज्मि मानुषान्भोगानाज्ञैश्वर्यं च मे ॥ १४ ॥ एतादृशे संपदग्रे सर्वकामसमर्पितः । कथमनाथो भवति ? मा हु भदन्त! मृषा वादीः ॥ १५ ॥ न त्वं जानास्यनाथस्यार्थं प्रोत्थां च पार्थिव! । यथाऽनाथो भवति सनाथो वा नराधिप! ॥ १६ ॥ शृणु मे महाराज! अव्याक्षिप्तेन चेतसा । यथाऽनाथो भवति, यथा मे च प्रवर्तितम् ॥ १७ ॥

कोसंबी नाम नयरी, पुराणपुरभेयणी ।
तत्थ आसी पिया मज्झं, पभूयधणसंचओ ॥१८॥

पढमे वए महाराय!, अतुला मे अच्छिवेयणा ।
अहोत्था विउलो दाहो, सव्वंगेसु य पत्थिवा! ॥१९॥

सत्थं जहा परमतिक्खं, सरीरवियरंतरे ।
पविसेज्ज अरी कुद्धो, एवं मे अच्छिवेयणा ॥२०॥

तियं मे अन्तरिच्छं च, उत्तमंगं च पीडई ।
इंदासणिसमा घोरा, वेयणा परमदारुणा ॥२१॥

उवट्ठिता मे आयरिया, विज्जामंतचिगिच्छया ।
अबीया सत्थेकुसला, मंत-मूलविसारया ॥२२॥

ते मे तिगिच्छं कुव्वंति, चाउप्पायं जहाहियं ।
ण य दुक्खा विमोयंति, एसा मज्झ अणाहया ॥२३॥

---

कौशाम्बी नाम्नी नगरी, पुराणपुरभेदिनी । तत्रासीत्पिता मम, प्रभूतधनसञ्चयः ॥ १८ ॥ प्रथमे वयसि महाराज! अतुला मेऽक्षिवेदना । अभूद्विपुलो दाहस्सर्वगात्रेषु पार्थिव! ॥ १९ ॥ शस्त्रं यथा परमतीक्ष्णं, शरीरविवरान्तरे । प्रवेशयेदरिः क्रुद्ध, एवं मे अक्षिवेदना ॥ २० ॥ त्रिकं मे अन्तरिच्छां चोत्तमाङ्गं च पीडयति । इन्द्राऽशनिसमा घोरा, वेदना परमदारुणा ॥ २१ ॥ उपस्थिता मे आचार्या, विद्यामन्त्रचिकित्सकाः । अद्वितीयाः शास्त्र-कुशला मन्त्रमूलविशारदाः ॥ २२ ॥ ते मे चिकित्सां कुर्वन्ति, चतुष्पदां यथाहितम् । न च दुःखाद्विमोचयन्त्येषा मेऽनाथता ॥ २३ ॥

पिया मे सव्वसारंपि, देज्जाहि मम कारणा ।
ण य दुक्खा विमोयंति, एसा मज्झ अणाहया ॥२४॥

माया वि मे महाराय!, पुत्तसोगदुहऽट्टिया ।
ण य दुक्खा विमोयंती, एसा मज्झ अणाहया ॥२५॥

भायरो मे महाराय!, सगा जेट्ठ-कणिट्ठगा ।
ण य दुक्खा विमोयंति, एसा मज्झ अणाहया ॥२६॥

भइणीओ मे महाराय!, सगा जेट्ठ-कणिट्ठगा ।
ण य दुक्खा विमोयंति, एसा मज्झ अणाहया ॥२७॥

भारिया मे महाराय!, अणुरत्ता अणुव्वया ।
अंसुपुण्णेहिं णयणेहिं, उरं मे परिसिंचई ॥२८॥

अण्णं पाणं च ण्हाणं च, गंध-मल्लविलेवणं ।
मए णायमणायं वा, सा बाला णोवभुंजई ॥२९॥

---

पिता मे सर्वसारमपि दद्यान्मम कारणात् । न च दुःखाद्विमोचयंत्येषा मेऽनाथता ॥२४॥ मातापि मे महाराज! पुत्रशोकदुःखार्दिता । न च दुःखाद्विमोचत्येषा मेऽनाथता ॥२५॥ भ्रातरो मे महाराज! स्वका ज्येष्ठकनिष्ठकाः । न च दुःखाद्विमोचयन्त्येषा मेऽनाथता ॥२६॥ भगिन्यो मे महाराज!, स्वका ज्येष्ठकनिष्ठिकाः । न च दुःखाद्विमोचन्त्येग मेऽनाथता ॥२७॥ भार्या मे महाराज!, अनुरक्ताऽनुव्रता । अश्रुपूर्णाभ्यां नयनाभ्यामुरो मे परिसिञ्चति ॥२८॥ अन्नं पानं च स्नानं च, गन्धमाल्यविलेपनम् । मया ज्ञातमज्ञातं वा, सा बाला नोपभुङ्क्ते ॥२९॥

खणं पि मे महाराय!, पासाओ वि ण फिट्टई ।
ण य दुक्खा विमोयंति, एसा मज्झ अणाहया ॥३०॥

ततोहं एवमाहंसु, दुक्खमा हु पुणो पुणो ।
वेयणा अणुभविउं जे, संसारम्मि अणंतए ॥३१॥

सइं च जइ मुच्चिज्जा, वेयणा विउला इओ ।
खंतो दंतो णिरारंभो, पव्वए अणगारियं ॥३२॥

एवं च चिंतइत्ता णं, पासुत्तो मि णराहिवा! ।
परियत्तंतीए राईए, वेयणा मे खयं गया ॥३३॥

तओ कल्ले पभायम्मि, आपुच्छित्ताण बंधवे ।
खंतो दंतो णिरारंभो, पव्वईओ अणगारियं ॥३४॥

तओहं णाहो जाओ, अप्पणो य परस्स य ।
सव्वेसिं चेव भूयाणं, तसाणं थावराण य ॥३५॥

---

क्षणमपि मे महाराज!, पार्श्वादपि न अपगच्छति । न च दुःखाद्विमोचयत्येषा मेऽनाथता ॥ ३० ॥ ततोऽहमेवमुक्तवान्, दुःक्षमा एव पुनर्पुनः । वेदना अनुभवितुं याः, संसारेऽनन्तके ॥ ३१ ॥ सकृच्च यदि मुच्ये, वेदनाया विपुलायाः तदा । क्षान्तो दान्तो निरारम्भोऽनगारतां प्रव्रजेयम् ॥ ३२ ॥ एवं च चिन्तयित्वा प्रसुप्तोऽस्मि नराधिप! । परिवर्तमानायां रात्रौ, वेदना मे क्षयं गता ॥ ३३ ॥ ततः कल्ये प्रभाते, आपृच्छय बान्धवान् । क्षान्तो दान्तो निरारंभः, प्रव्रजितोऽनगारतां ॥ ३४ ॥ ततोऽहं नाथो जात, आत्मनश्च परस्य च । सर्वेषां चैव भूतानां, त्रसाणां स्थावराणां च ॥ ३५ ॥

अप्पा णदी वेयरणी, अप्पा मे कूडसामली ।
अप्पा कामदुहा धेणू, अप्पा मे णंदणं वणं ॥३६॥

अप्पा कत्ता विकत्ता य, दुक्खाण य सुहाण य ।
अप्पा मित्तममित्तं च, दुप्पट्ठियसुपट्ठिओ ॥३७॥

इमा हु अण्णा वि अणाहया णिवा !, तामेगचित्तो णिहुओ सुणेहि मे ।
णियंठधम्मं लभियाण वि जहा, सीयंति एगे बहुकायरा णरा ॥३८॥

जे पव्वइत्ता वि महव्वयाइं, सम्मं च णो फासयती पमाया ।
अणिग्गहप्पा य रसेसु गिद्धे, ण मूलओ छिंदइ बंधणं से ॥३९॥

आउत्तया जस्स य णत्थि काई, इरियाए भासाए तहेसणाए ।
आयाण-णिक्खेवदुगुंछणाए, ण वीरजायं अणुजाइ मग्गं ॥४०॥

चिरं पि से मुंडरुई भवित्ता, अथिरव्वए तव-णियमेहिं भट्ठे ।
चिरं पि अप्पाण किलेसइत्ता, ण पारए होई हु संपराए ॥४१॥

---

आत्मा नदी वैतरणी, आत्मा मे कूटशाल्मली । आत्मा कामदुधा धेनुः, आत्मा मे नन्दनं वनम् ॥ ३६ ॥ आत्मा कर्त्ता विकर्त्ता च, सुखानां च दुःखानां च । आत्मा मित्रममित्रं च, दुष्प्रस्थितस्सुप्रस्थितः ॥ ३७ ॥ इयं ह्यन्याप्यनाथता नृप !, तामेकचित्तो निभृतश्शृणु मे । निर्ग्रन्थधर्मं लब्ध्वाऽपि यथा सीदन्त्येके बहुकातरा नराः ॥ ३८ ॥ यः प्रव्रज्य महाव्रतानि, सम्यग् न स्पृशति प्रमादात् । अनिग्रहात्मा च रसेषु गृद्धो, न मूलतः छिनत्ति बन्धनं सः ॥३९॥ आयुक्तता यस्य च नास्ति कापीर्यायां भाषायां तथैषणायाम् । आदाननिक्षेपयोर्जुगुप्सायां, न वीरयातमनुयाति मार्गम् ॥ ४० ॥ चिरमपि स मुण्डरुचिर्भूत्वाऽस्थिरव्रतः तपोनियमेभ्यो भ्रष्टः । चिरमप्यात्मानं क्लेशयित्वा, न पारगो भवति खलु संपरायस्य ॥४१॥

पोल्लेव मुट्ठी जह से असारे, अयंतिते कूडकहावणे य ।
राढामणी वेरुलियप्पगासे, अमहग्घए होइ हु जाणएसु ॥४२॥

कुसीललिंगं इह धारइत्ता, इसिज्झयं जीविय विहइत्ता ।
असंजए संजय लप्पमाणे, विणिघायमागच्छइ से चिरं पि ॥४३॥

विसं तु पीयं जह कालकूडं, हणाइ सत्थं जह कुग्गहीयं ।
एमेव धम्मो विसओववण्णो, हणाइ वेयाल इवाविवण्णो ॥४४॥

जो लक्खणं सुविणं पउंजमाणो, णिमित्त-कोऊहलसंपगाढे ।
कुहेडविज्जासवदारजीवी, ण गच्छई सरणं तम्मि काले ॥४५॥

तमं तमेणेव उ से असीले, सया दुही विप्परियासुवेई ।
संधावई णरग-तिरिक्खजोणिं, मोणं विराहेत्तु असाहुरूवे ॥४६॥

उद्देसियं कीयगडं णियागं, ण मुंचई किंचि अणेसणिज्जं ।
अग्गीविवा सव्वभक्खी भवित्ता, इतो चुए गच्छइ कट्टु पावं ॥४७॥

---

पोल्लै मुष्टिर्यथा सः असारोऽयंत्रितः कूटकार्षापणश्च । काचमणिः वैदूर्यवो प्रकाशन महार्घको भवति हु जानानेषु ॥४२॥ कुशीललिंगमिह धारयित्वार्षिध्वजं जीविकायै बृंहयित्वा । असंयतस्संयतां लपन्, विनिंघातमागच्छति स चिरमपि ॥४३॥ विषं तु पीतं यथा कालकूटं, हन्ति शस्त्रं यथा कुगृहीतम् । एवमेव धर्मो विषयोपपन्नो, हन्ति वैताल इवाविपन्नः ॥४४॥ यो लक्षणं स्वप्नं प्रयुञ्जानो, निमित्तकुतूहलसंप्रगाढः । कुहेटकविद्याश्रवश्ररजीवी, न गच्छति शरणं तस्मिन् काले ॥४५॥ तमस्तमसैव तु सः अशीलः, सदा दुःखी विपर्यासमुपैति । संधावति नरकं तिर्यग्योनिं मौनं विराध्यासाधुरूपः ॥४६॥ औद्देशिकं क्रीतकृतं नित्यकं, न मुञ्चतिकिञ्चिदनेषणीयम् । अग्निरिव वा सर्वभक्षी भूत्वा, इतश्युतो गच्छति कृत्वा पापम् ॥४७॥

ण तं अरी कण्ठछेत्ता करेइ, जं से करे अप्पणिया दुरप्पा ।
से णाहिई मच्चुमुहं तु पत्ते, पच्छाणुतावेण दयाविहूणो ॥४८॥
णिरट्ठिया णग्गरुइ उ तस्स, जे उत्तमट्ठ विवज्जासमेइ ।
इमे वि से णत्थि परे वि लोए, दुहओ वि से झिज्जइ तत्थ लोए ॥४९॥

एमेवऽहाछंद–कुसीलरूवे, मग्गं विराहेत्तु जिणुत्तमाणं ।
कुररी विवा भोगरसाणुगिद्धा, णिरट्ठसोया परितावमेइ ॥५०॥

सोच्चाण मेहावि! सुभासियं इमं, अणुसासणं णाणगुणोववेयं ।
मग्गं कुसीलाण जहाय सव्वं, महाणियंठाण वए पहेणं ॥५१॥

चरित्तमायारगुणण्णिए तओ, अणुत्तरं संजम पालियाणं ।
णिरासवे संखवियाण कम्मं, उवेइ ठाणं विउलुत्तमं धुवं ॥५२॥

एवुग्गदंते वि महातवोधणे, महामुणी महापइण्णे महायसे ।
महाणियंठिज्जमिणं महासुयं, से कहेई महया वित्थरेणं ॥५३॥

---

न तमरिः कण्ठच्छेत्ता करोति, यत्तस्य कुर्यादात्मीया दुरात्मता। स ज्ञास्यति मृत्युमुखं तु प्राप्तः, पश्चादनुतापेन दयाविहीनः ॥४८॥ निरर्थका तु नाग्न्यरुचिस्तस्य, य उत्तमार्थे विपर्यासमेति। तस्य नास्ति परोऽपि लोकः, द्विधाऽपि क्षीयते तस्य लोकः ॥४९॥ एवमेव यथाछन्दकुशीलरूपो, मार्गं विराध्य जिनोत्तमानाम्। कुररीव भोगरसानुगृद्धा, निरर्थशोका परितापमेति ॥५०॥ श्रुत्वा मेधाविन्। सुभाषितमिदमनुशासनं ज्ञानगुणोपपेतम्। मार्गं कुशीलानां त्यक्त्वा सर्वं, महानिर्ग्रन्थानां व्रजेः पथा ॥५१॥ चारित्राचारगुणान्विततस्ततोऽनुत्तरं संयमं पालयित्वा। निराश्रवः सङ्क्षपय्य कर्मोपैति स्थानं विपुलोत्तमं ध्रुवम् ॥५२॥ एवमुग्रदान्तोऽपि महातपोधनो, महामुनिर्महाप्रतिज्ञः महायशाः। महानिर्ग्रन्थीयमिदं महाश्रुतं, सोऽकथयन्महता विस्तरेण ॥५३॥

तुट्ठो य सेणिओ राया, इणमुदाहु कयंजली ।
अणाहत्तं जहाभूयं, सुट्ठु मे उवदंसियं ॥५४॥

तुज्झं सुलद्धं सु मणुस्सजम्मं, लाभा सुलद्धा य तुमे महेसी! ।
तुब्भे सणाहा य सबन्धवा य, जं भे ठिया मग्गे जिणुत्तमाणं ॥५५॥

तंसि णाहो अणाहाणं, सव्वभूयाण संजया! ।
खामेमि ते महाभाग!, इच्छामि अणुसासिउं ॥५६॥

पुच्छिऊण मए तुब्भं, झाणविग्घो उ जो कओ ।
णिमंतिया य भोगेहिं, तं सव्वं मरिसेहि मे ॥५७॥

एवं थुणित्ताण स रायसीहो, अणगारसीहं परमाए भत्तीए ।
सओरोहो सपरियणो य, धम्माणुरत्तो विमलेण चेयसा ॥५८॥

ऊससियरोमकूवो, काउण य पयाहिणं ।
अभिवंदिऊण सिरसा, अतियाओ णराहिवो ॥५९॥

---

तुष्टश्च श्रेणिको राजेदमुदाह कृताञ्जलिः । अनाथत्वं यथाभूतं, सुष्ठु मे उपदर्शितम् ॥५४॥ तव सुलब्धं खलु मानुष्यजन्म, लाभाः सुलब्धाश्च त्वया महर्षे! । यूयं सनाथाश्च सबान्धवाश्च, यद्भदन्ताः स्थिता मार्गे जिनोत्तमानाम् ॥५५॥ त्वमसि नाथोऽनाथानां, सर्वभूतानां संयत! । क्षाम्यामि त्वां महाभाग!, इच्छाम्यनुशासितुम् ॥५६॥ पृष्ट्वा मया तव, ध्यानविघ्नश्च यः कृतः । निमंत्रितश्च भोगैस्तत्सर्वं मर्षय मे ॥५७॥ एवं स्तुत्वा स राजसिंहोऽनगारसिंहं परमया भक्त्या । सावरोधः सपरिजनश्च धर्मानुरक्तो विमलेन चेतसा ॥५८॥ उच्छ्वसितरोमकूपः, कृत्वा च प्रदक्षिणाः । अभिवन्द्य शिरसाऽतियातो नराधिपः ॥५९॥

इयरो वि गुणसमिद्धो, तिगुत्तिगुत्तो तिदंडविरओय ।
विहग इव विप्पमुक्को, विहरइ वसुहं विगयमोहो ॥६०॥
त्ति बेमि ॥

॥ वीसइमं महाणियंठिज्जं अज्झयणं समत्तं ॥

इतरोऽपि गुणसमृद्धस्त्रिगुप्तिगुप्तस्त्रिदण्ड विरतश्च । विहग इव विप्रमुक्तो विहरति वसुधां विगतमोहः ॥६०॥ इति ब्रवीमि

॥ समुद्दपालीयं एकविंशं अध्ययनम् ॥

चम्पाए पालिए नामं, सावए आसि वाणिए ।
महावीरस्स भगवओ, सीसो सो उ महप्पणो ॥ १ ॥

णिग्गंन्थे पावयणे, सावए से वि कोविए ।
पोएण ववहरंन्ते, पिहुंडं णगरमागए ॥ २ ॥

पिहुंडे ववहरंतस्स, वाणिओ देइ धूयरं ।
तं ससत्तं पइगिज्झ, सदेसमह पत्थिए ॥ ३ ॥

अंह पालियस्स घरणी, समुद्दंमि पसवई ।
अह दारए तहिं जाए, समुद्दपालेत्ति णामए ॥ ४ ॥

खेमेण आगए चंपं, सावए वाणिए घरं ।
संवड्ढए तस्स घरे, दारए से सुहोइए ॥ ५ ॥

बावत्तरी कलाओ य, सिक्खए णीइकोविए ।
जोव्वणेण य संपण्णे, सुरूवे पियदंसणे ॥ ६ ॥

---

चम्पायां पालितो नाम, श्रावक आसीद्वणिग् । महावीरस्य भगवतः शिष्यः स तु महात्मनः ॥ १ ॥ नैर्ग्रन्थे प्रवचने, श्रावकः सोऽपि कोविदः । पोतेन व्यवहरन्, पिहुण्डं नगरमागतः ॥ २ ॥ पिहुंडे व्यवहरते, वणिग्ददाति दुहितरम् । तां ससत्त्वां प्रतिगृह्य स्वदेशमथ प्रस्थितः ॥ ३ ॥ अथ पालितस्य गृहिणी, समुद्रे प्रसूते । अथ दारकस्तत्र जातः समुद्रपाल इति नामतः ॥ ४ ॥ क्षेमेण आगतश्चम्पां श्रावको वणिग् गृहम् । संवर्द्धते गृहे तस्य, दारकः स सुखोचितः ॥ ५ ॥ द्वासप्तति कलाश्च, शिक्षितो अशिक्षत नीतिकोविदः । यौवनेन च संपन्नः सुरूपः प्रियदर्शनः ॥ ६ ॥

तस्स रूववइं भज्जं, पिया आणेइ रूविणिं ।
पासाए कीलए रम्मे, देवो दोगुन्दओ जहा ॥ ७ ॥

अह अण्णया कयाई, पासायालोयणे ट्ठिओ ।
वज्झमंडणसोभागं, वज्झं पासइ वज्झगं ॥ ८ ॥

तं पासिउण संविग्गो, समुद्दपालो इणमब्बवी ।
अहो असुहाण कम्माणं, णिज्जाणं पावगं इमं ॥ ९ ॥

संबुद्धो सो तहिं भगवं, परमसंवेगभागओ ।
आपुच्छऽम्मापियरो, पव्वए अणगारियं ॥ १० ॥

जहित्तु संग्गंथ महाकिलेसं, महंतमोहं कसिणं भयावहं ।
परियायधम्मं चऽभिरोयएज्जा, वयाणि सीलाणि परीसहे य ॥११॥

अहिंस सच्च च अतेणयं च, तत्तो अ बंभं अपरिग्गहं च ।
पडिवज्जिया पंच महव्वयाणि, चरिज्ज धम्मं जिणदेसियं विदु ॥१२॥

---

तस्य रूपवतीं भार्यां, पिताऽऽनयति रूपिणीम् । प्रासादे क्रीडति रम्ये, देवो दोगुन्दको यथा ॥ ७ ॥ अथान्यदा कदाचित्, प्रासादालोकने स्थितः । वध्यमंडनशोभाकं वध्यं पश्यति वध्यगम् ॥ ८ ॥ तं दृष्ट्वा संविग्नः, समुद्रपाल इदमब्रवीत् । अहो अशुभानां कर्मणां, निर्याणं पापकमिदम् ॥ ९ ॥ सम्बुद्धः स तत्र भगवान्, परमं संवेगमागतो । आपृच्छ्य मातापितरौ प्राव्राजीदनगारिताम् ॥ १० ॥ त्यक्त्वा सद्ग्रन्थं महाक्लेशं महामोहं कृत्स्नं भयावहम् । पर्यायधर्मं चाभ्यरोचत्, व्रतानि शीलानि परिषहांश्च ॥ ११ ॥ अहिंसा सत्यं चास्तैन्यं च, ततश्च ब्रह्म अपरिग्रहं च । प्रतिपद्य पञ्च महाव्रतानि अचरद्धर्मं जिनदेशितं विद् ॥ १२ ॥

सव्वेहिं भूएहिं दयाणुकम्पी, खन्तिक्खमे संजयबम्भयारी ।
सावज्जजोगं परिवज्जयन्तो, चरिज्ज भिक्खू सुसमाहिइन्दिए ॥१३॥

कालेण कालं विहरज्ज रट्ठे, बलाबलं जाणिय अप्पणो य ।
सीहो व सद्देण ण संतसेज्जा, वयजोग सुच्चा ण असब्भमाहु ॥१४॥

उवेहमाणो उ परिव्वएज्जा, पियमप्पियं सव्व तितिक्खएज्जा ।
ण सव्व सव्वत्थऽभिरोयएज्जा, ण यावि पूयं गरहं च संजए ॥१५॥

अणेगछंदा मिह माणवेहिं, जे भावओ संपकरेइ भिक्खू ।
भयभेरवा तत्थ उदेन्ति भीमा, दिव्वा मणुस्सा अदुवा तिरिच्छा ॥१६॥

परीसहा दुव्विसहा अणेगे, सीयन्ति जत्था बहुकायरा नरा ।
से तत्थ पत्ते ण वहिज्ज भिक्खू, संगामसीसे इव णागराया ॥१७॥

सीओसिणा दंसमसागा य फास्त, आयंका विविहा, फुसन्तिदेहं ।
अकुक्कुओ तत्थऽहियासएज्जा, रयाइं खेवेज्ज पुरे कयाइं ॥१८॥

---

सर्वेषु भूतेषु दयानुकम्पी, क्षान्तिक्षमः संयतब्रह्मचारी । सावद्ययोगं परिवर्जयन् चरेद्भिक्षुः सुसमाहिन्द्रियः ॥१३॥ कालेन कालं विहरेद्राष्ट्रे, बलाबलं ज्ञात्वाऽऽत्मनश्च । सिंह इव शब्देन न संत्रस्येद्वाग्योगं श्रुत्वा नासभ्य ब्रूयात् ॥१४॥ उपेक्षमाणस्तु परिव्रजेत् प्रियमप्रियं सर्वं तितिक्षेत । न सर्वं सर्वत्राभिरोचयेन्नापि पूजां गर्हां च संयतः ॥१५॥ अनेकछन्दस्सु इह मानवेषु, भावतो यत् प्रकरोति भिक्षुः । भयभैरवास्तत्रोद्यन्ति भीमा, दिव्या मानुष्या यदुत तैरश्चाः ॥१७॥ परीषहा दुर्विषहा अनेके सीदन्ति अत्र बहुकातरा नराः । स तत्र प्राप्तो न व्यथेत भिक्षुः, संग्रामशीर्षे इव नागराज ॥१७॥ शीतोष्णदंशमशकाश्च स्पर्शाः, आतङ्का विविधा स्पृशन्ति देहम् । अकुकूजः तत्राध्यासयेद्रजांसि क्षिपेत्पुराकृतानि ॥१८॥

पहाय रागं च तहेव दोसं, मोहं च भिक्खू सततं वियक्खणो ।
मेरु व्व वाएण अकम्पमाणो, परीसहे आयगुत्ते सहेज्जा ॥१९॥

अणुण्णए णावणए महेसी, ण यावि पूयं गरहं च संजए ।
से उज्जुभावं पडिवज्ज संजए, णिव्वाणमग्गं विरए उवेइ ॥२०॥

अरइरइसहे पहीणसंथवे, विरए आयहिए पहाणवं ।
परमट्ठपएहिं चिट्ठई, छिण्णसोए अममे अकिंचणे ॥२१॥

विवित्तलयणाइं भएज्झताई, णिरोवलेवाइं असंखडाइं ।
इसीहिं चिणाइं महायसेहिं, काएण फासेज्ज परीसहाइं ॥२२॥

सण्णाणणाणोवगए महेसी, अणुत्तरं चरिउं धम्मसंचयं ।
अणुत्तरे णाणधरे जसंसी, ओभासई सूरिए वऽतलिक्खे ॥२३॥

दुविहं खवेऊण य पुण्णपावं, णिरङ्गणे सव्वओ विप्पमुक्के ।
तरित्ता समुद्दं व महाभवोघं, समुद्दपाले अपुणागमं गए ॥२४॥
त्ति बेमि

॥ इगवी सइमं समुद्दपालिज्जं अज्झयणं समत्तं ॥

---

प्रहायः रागं च तथैव द्वेषं, मोह च भिक्षुःसततं विचक्षणः। मेरुरिव वातेनाकम्पमानः, परीषहानात्मगुप्तः सहेत् ॥ १९ ॥ अनुन्नतो नावनतो महर्षिः न चापि पूजां गर्हां च संयतः। स ऋजुभावं प्रतिपद्य संयतः, निर्वाणमार्गं विरत उपैति ॥ २० ॥ अरतिरतिसहः प्रक्षीणसंस्तवो, विरत आत्महितः प्रधानवान्। परमार्थपदेषु तिष्ठति, छिन्नश्रोता अममोऽकिञ्चनः ॥ २१ ॥ विविक्तलयनानि भजेत् त्रायी, निरुपलेपान्यसंस्कृतानि। ऋषिभिश्चीर्णानि महायशोभिः, कायेन स्पृशेत्परीषहान् ॥ २२ ॥ सज्ज्ञानज्ञानोपगतो महर्षिरनुत्तरं चरित्वा धर्मसंचयं। अनुत्तरो ज्ञानधरो यशस्व्यवभासते सूर्य इवान्तरिक्षे ॥ २३ ॥ द्विविधं क्षपयित्वा च पुण्यपापं,निरंगनः सर्वतो विप्रमुक्तः। तीर्त्वा समुद्रमिव महाभवौघं, समुद्रपालोऽपुनरागमं गतः ॥ २४ ॥ इति ब्रवीमि.

॥ अथ द्वाविंशं रथनेमीयमध्ययनम् ॥

सोरियपुरंमि णयरे, आसि राया महिड्ढिए ।
वसुदेवत्ति णामेणं रायलक्खणसंजुते ॥१॥

तस्स भज्जा दुवे आसी, रोहिणी देवई तहा ।
तासिं दुण्हंपि पुत्ता, जे इट्ठा रामकेसवा ॥२॥

सोरियपुरंमि णयरे, आसी राया महड्ढिए ।
समुद्दविजये णामं, रायलक्खणसंजुए ॥३॥

तस्स भज्जा सिवा णाम, तीसे पुत्ते महायसे ।
भगवं अरिट्ठणेमि त्ति, लोगणाहे दमीसरे ॥४॥

सोऽरिट्ठनेमिणामो उ, लक्खणस्सरसंजुओ ।
अट्ठसहस्सलक्खणधरो, गोयमो कालगच्छवी ॥५॥

वज्जरिसहसंघयणो, समचउरंसो झसोयरो ।
तस्स रायमई कण्णं, भज्जं जायइ केसवो ॥६॥

---

शौर्यपुरे नगर आसीद्राजा महर्द्धिकः। वसुदेव इति नाम्ना राजलक्षणसंयुतः॥ १ । तस्य भार्ये द्वे अभूतां, रोहिणी देवकी तथा। तयोर्द्वयोपि द्वौ पुत्रौ, यौ इष्टौ रामकेशवौ ॥ २ ॥ शौर्यपुरे नगरे, आसीद्राजा महर्द्धिकः। समुद्रविजयो नामा, राजलक्षणसंयुत ॥ ३ ॥ तस्य भार्या शिवानाम्नी तस्याः पुत्रो महायशाः। भगवानरिष्ठनेमिरिति लोकनाथो दमीश्वरः ॥ ४ ॥ सोऽरिष्ठनेमिनामा तु, लक्षणस्वरसंयुतः। अष्टसहस्रलक्षणधरो, कालकच्छविः ॥ ५ ॥ वज्रर्षभसंहननः समचतुरस्रो झषोदरः। तस्य राजीमतीं कन्यां, भार्यां याचते केशवः ॥ ६ ॥

अह सा रायवरकण्णा, सुसीला चारुपेहिणी ।
सव्वलक्खणसंपण्णा, विज्जुसोयामणिप्पभा ॥७॥

अहाऽऽह जणओ तीसे, वासुदेवं महिड्ढियं ।
इहाऽऽगच्छउ कुमारो, जा से कण्णं दलामहं ॥८॥

सव्वोसहीहिं ण्हविओ, कयकोउय-मंगलो ॥
दिव्वजुयलपरिहिओ, आभरणेहिं विभूसिओ ॥९॥

मत्तं च गन्धहत्थिं, वासुदेवस्स जेट्ठगं ।
आरूढो सोहए अहियं, सिरे चूडामणी जहा ॥१०॥

अह ऊसिएण छत्तेण, चामराहि य सोहिए ।
दसारचक्केण य सो, सव्वओ परिवारिओ ॥११॥

चउरंगिणीए सेणाए, रइयाए जहक्कमं ।
तुरियाणं सण्णिणाएणं, दिव्वेणं गयणंफुसे ॥१२॥

---

अथ सा राजवरकन्या, सुशीला चारुपेक्षिणी। सर्वलक्षणसंपन्ना, विद्युत्सौदामिनीप्रभा ॥७॥ अथाह जनकस्तस्या, वासुदेवं महर्द्धिकम्। इहागच्छतु कुमारो, येन तस्मै कन्यां ददाम्यहम् ॥ ८ ॥ सर्वौषधिभिस्स्नपितः, कृतकौतुकमङ्गलः। परिहितदिव्ययुगल, आभरणैर्विभूषितः ॥ ९ ॥ मत्तं च गन्धहस्तिनं, वासुदेवस्य ज्येष्ठकम्। आरूढश्शोभते अधिकं, शिरसि चूडामणिर्यथा ॥ १० ॥ अथोच्छ्रितेन छत्रेण, चामराभ्यां च शोभितः। दशार्हचक्रेण ततस्सर्वतः परिवारितः ॥ ११ ॥ चतुरंगिण्या सेनया, रचितया यथाक्रमम्। तूर्याणां सन्निनादेन, दिव्येन गगनस्पृशा ॥ १२ ॥

एयारिसीए इड्ढीए, जुईए उत्तमाए य ।
णियगाओ भवणाओ, णिज्जाओ वण्हिपुंगवो ॥१३॥

अह सो तत्थ णिज्जंतो, दिस्स पाणे भयद्दुए ।
वाडेहिं पंजरेहिं च सण्णिरुद्धे सुदुक्खिए ॥१४॥

जीवियंतं तु संपत्ते, मंसट्ठा भक्खियव्वए ।
पासेत्ता से महापण्णे, सारहिं इणमब्बवी ॥१५॥

कस्स अट्ठा इमे पाणा, एए सव्वे सुहेसिणो ।
वाडेहिं पंजरेहि च सण्णिरुद्धा य अच्छाह ? ॥१६॥

अह सारही तओ भणइ, एए भद्दा उ पाणिणो ।
तुज्झं विवाहकज्जंमि, भोयावेउं बहुं जणं ॥१७॥

सोऊण तस्स वयणं, बहुपाणिविणासणं ।
चिंतेइ से महापण्णो, साणुक्कोसे जिएहि उ ॥१८॥

---

एतादृशर्ध्या द्युत्योत्तमया च, निजकाद्भवनान्निर्यातो वृष्णिपुङ्गवः ॥ १३ ॥ अथ स तत्र निर्यन्, दृष्ट्वा प्राणान् भयद्रुतान् । वाटकैः पञ्जरैश्च, सन्निरुद्धान्सुदुःखितान् ॥ १४ ॥ जीवितान्तं तु सम्प्राप्तान्मांसार्थं भक्षयितव्यान् । दृष्ट्वा स महाप्रज्ञस्स रथिमिदमब्रवीत् ॥१५॥ कस्यार्थमिमे प्राणा, एते सर्वे सुखैषिणः । वाटकैः पञ्जरैश्च, सन्निरुद्धाश्च आसते ॥ १६ ॥ अथ सारथिस्ततो भणत्येते भद्रास्तु प्राणिनः । तव विवाहकार्ये, भोजयितुं बहून् जनान ॥१७॥ श्रुत्वा तस्य वचनं, बहुप्राणिविनाशनम् । चिन्तयति स महाप्राज्ञस्सानुक्रोशो जीवेषु तु ॥ १८ ॥

जइ मज्झ कारणा एए, हम्मंति सुबहू जिया ।
ण मे एयं तु णिस्सेसं, परलोगे भविस्सई ॥१९॥

सो कुण्डलाण जुयलं, सुत्तगं च महायसो ।
आभरणाणि य सव्वाणि, सारहिस्स पणामए ॥२०॥

मणपरिणामो य कए, देवा य जहोइयं समोइण्णा ।
सव्वड्ढीए सपरिसा, णिक्खमणं तस्स काउं जे ॥२१॥

देवमणुस्सपरिवुडो, सिबियारयणं तओ समारूढो ।
णिक्खमिय बारगाओ, रेवयंमि ठिओ भयवं ॥२२॥

उज्जाणं संपत्तो, ओइण्णो उत्तमाओ सीयाओ ।
साहस्सीइ परिवुडो, अह णिक्खमई उ चित्ताहिं ॥२३॥

अह सो सुगन्धगन्धिए, तुरियं मउयकुंचिए ।
सयमेव लुंचई केसे, पंचमुट्ठीहिं समाहिओ ॥२४॥

---

यदि मम कारणादेते, हन्यन्ते सुबहवो जीवाः । न मे एतत्तु निःश्रेयसं, परलोके भविष्यति ॥ १९ ॥ स कुण्डलयोर्युगलं, सूत्रकं (कटिसूत्रं) च महायशाः । आभरणानि च सर्वाणि, सारथये अर्पयति ॥ २० ॥ मनःपरिणामश्च कृतः, देवाश्च यथोचितं समवतीर्णाः । सर्वर्द्धया सपरिषदः, निष्क्रमणं तस्य कर्तुं ॥ २१ ॥ देवमनुष्यपरिवृतः, शिबिकारत्नं ततस्समारूढः । निष्क्रम्य द्वारकातो, रैवतके स्थितः भगवान् ॥२२॥ उद्यानं संप्राप्तोऽवतीर्ण, उत्तमायाश्शिबिकायाः । सहस्रेण परिवृतोऽथ निष्क्रामति तु चित्रायाम् ॥ २३ ॥ अथ स सुगन्धगन्धिकान्त्वरितं मृदुककुञ्चितान् । स्वयमेव लुञ्चति केशान्पञ्चमुष्टिभिस्समाहितः ॥२४॥

वासुदेवो य णं भणइ, लुत्तकेसं जिइन्दियं ।
इच्छियमणोहरं तुरियं, पावसू तं दमीसरा! ।।२५।।

णाणेणं दंसणेणं च, चरित्तेणं तवेण य ।
खंतीए मुत्तीए, वड्ढमाणो भवाहि य ।।२६।।

एवं ते राम–केसवा, दसारा य बहू जणा ।
अरिट्ठणेमिं वंदित्ता, अइगया बारगापुरिं ।।२७।।

सोऊण रायवरकण्णा, पव्वज्जं सा जिणस्स उ ।
णीहासा य णिराणन्दा, सोगेण उ समुच्छिया ।।२८।।

राईमई विचिंतेइ, धिरत्थु मम जीवियं ।
जाहं तेण परिच्चता, सेयं पव्वइउं मम ।।२९।।

अह सा भमरसण्णिभे, कुच्च – फणगपसाहिए ।
सयमेव लुंचई केसे, धिइमन्ती ववस्सिया ।।३०।।

---

वासुदेवश्च भणति, लुप्तकेशं जितेन्द्रियम् । ईप्सितमनोरथं त्वरितं, प्राप्नुहि त्वं दमीश्वर! ।। २५ ।। ज्ञानेन दर्शनेन च, चारित्रेण तपसा च । क्षान्त्या मुक्त्या, वर्धमानो भव च ।। २६ ।। एवं तौ रामकेशवौ, दशार्हाश्च बहवो जनाः । अरिष्टनेमिं वन्दित्वाऽतिगता द्वारिकापुरीम् ।। २७ ।। श्रुत्वा राजवरकन्या, प्रव्रज्यां सा जिनस्य तु । निर्हासा च निरानन्दा, शोकेन तु समवसृता ।। २८ ।। राजीमती विचिन्तयति, धिगस्तु मम जीवितम् । याऽहं तेन परित्यक्ता, श्रेयः प्रव्रजितुं मम ।। २९ ।। अथ सा भ्रमरसंभिभान्कुर्चफणकप्रसाधितान् । स्वयमेव लुञ्चति केशान्धृतिमती व्यवसिता ।। ३० ।।

वासुदेवो य णं भणइ, लुत्तकेसिं जिइंदियं ।
संसारसागरं घोरं, तर कण्णे! लहुं लहुं ॥३१॥

सा पव्वइया संती, पव्वावेसी तहिं बहुं ।
सयणं परियणं चेव, सीलवंता बहुस्सुया ॥३२॥

गिरिं रेवतकं जंती, वासेणोल्ला उ अन्तरा ।
वासंते अन्धयारंमि, अंतो लयणस्स सा ठिया ॥३३॥

चीवराइं विसारंती, जहाजायत्ति पासिया ।
रहणेमी भग्गचित्तो, पच्छा दिट्ठो य तीइवि ॥३४॥

भीया य सा तहिं दट्ठुं, एगन्ते संजयं तयं ।
बाहाहिं काउ संगोफं, वेवमाणी णिसीयई ॥३५॥

अह सो वि रायपुत्तो, समुद्दविजयंगओ ।
भीयं पवेइयं दट्ठुं, इमं वक्कमुदाहरे ॥३६॥

---

वासुदेवश्च भणति, लुप्तकेशां जितेन्द्रियाम् । संसारसागरं घोरं, तर कन्ये! लघु लघु ॥ ३१ ॥ सा प्रव्रजिता सती, प्राविव्रजत्तत्र बहून् । स्वजनान्परिजनांश्चैव, शीलवती बहुश्रुता ॥ ३२ ॥ गिरिं रैवतकं यान्ती, वर्षेणार्द्रा त्वन्तरा । वर्षत्यन्धकारे अन्तर्लयनस्य सा स्थिता ॥ ३३ ॥ चीवराणि विस्तारयन्ती, यथाजातेति दृष्ट्वा । रथनेमिर्भग्नचित्तः, पश्चाद्दृष्टश्च तयाऽपि ॥ ३४ ॥ भीता च सा तत्र दृष्ट्वैकान्ते संयतं तकं । बाहुभ्याम् कृत्वा संगोपं, वेपमाना निषीदति ॥ ३५ ॥ अथ सोऽपि राजपुत्रस्समुद्रविजयाङ्गजः । भीतां प्रवेपितां दृष्ट्वेदं वाक्यमुदाहरत् ॥ ३६ ॥

रहनेमी अहं भद्दे! सुरूवे! चारुपेहिणी! ।
ममं भयाहि सुतणू!, ण ते पीला भविस्सइ ॥३७॥

एहि ता भुंजिमो भोए, माणुस्सं खु सुदुल्लहं ।
भुत्तभोगा पुणो पच्छा, जिणमग्गं चरिस्सिमो ॥३८॥

दट्ठूण रहणेमिं तं, भग्गुज्जोयपराजियं ।
राईमई असंभंता, अप्पाणं संवरे तहिं ॥३९॥

अह सा रायवरकण्णा, सुट्ठिया णियमव्वए ।
जाई कुलं च सीलं च, रक्खमाणी तयं वदे ॥४०॥

जइ सि रूवेण वेसमणो, ललिएण णलकूब्बरो ।
तहावि ते ण इच्छामि, जइसि सक्खं पुरंदरो ॥४१॥

धिरत्थु ते जसोकामी!, जो तं जीवियकारणा ।
वंतं इच्छसि आवेउं, सेयं ते मरणं भवे ॥४२॥

---

रथनेमिरहं भद्रे! सुरूपे! चारुप्रेक्षिके! । मां भजस्व सुतनो!, न ते पीडा भविष्यति ॥ ३७ ॥ एहि तावद्भुञ्जामहे भोगान्मानुष्यं खलु सुदुर्लभम् । भुक्तभोगाः पुनः पश्चाज्जिनमार्गं चरिष्यामः ॥ ३८ ॥ दृष्ट्वा रथनेमिं तं, भग्नोद्योगपराजितं । राजीमत्यसम्भ्रान्ताऽऽत्मानं समवारीत्तत्र ॥ ३९ ॥ अथ सा राजवरकन्या, सुस्थिता नियमव्रते । जातिं कुलं च शीलं च, रक्षन्ती तकमवादीत् ॥ ४० ॥ यद्यसि रूपेण वैश्रमणो, लालित्येन नलकूवरः । तथापि त्वां नेच्छामि यद्यसि साक्षात्पुरंदरः ॥ ४१ ॥ धिगस्तु ते अयशःकामिन्! यस्त्वं जीवितकारणात् । वान्तमिच्छस्यापातुं श्रेयस्ते मरणं भवेत् ॥ ४२ ॥

अहं च भोगरायस्स, तं च सि अंधगवण्हिणो ।
मा कुले गन्धणा होमो, संजमं णिहुओ चर ॥४३॥

जइ तं काहिसि भावं, जा जा दिच्छसि णारिओ ।
वायाविद्धो व्व हढो, अट्ठिअप्पा भविस्ससि ॥४४॥

गोवालो भंडवालो वा, जहा तद्दव्वऽणिस्सरो ।
एवं अणिस्सरो तं पि, सामण्णस्स भविस्ससि ॥४५॥

तीसे सो वयणं सोच्चा, संजयाए सुभासियं ।
अंकुसेण जहा णागो, धम्मे संपडिवाइओ ॥४६॥

मणगुत्तो वयगुत्तो, कायगुत्तो जिइन्दिओ ।
सामण्ण णिच्चलं फासे, जावज्जीवं दढव्वओ ॥४७॥

उग्गं तवं चरित्ताणं, जाया दोण्णि वि केवली ।
सव्वं कम्मं खवित्ताणं, सिद्धिं पत्ता अणुत्तरं ॥४८॥

---

अहं च भोगराजस्य, त्वं चास्यंधकवृष्णेः । मा कुले गन्धनाभूव, संयमं निभृतश्चर ॥ ४३ ॥ यदि त्वं करिष्यसि भावं, या या द्रक्ष्यसि नारीः । वाताविद्ध इव हटोऽस्थिरात्मा भविष्यसि ॥ ४४ ॥ गोपालो भाण्डपालो वा, यथा तद्द्रव्यस्यानीश्वरः । एवमनीश्वरस्त्वमपि, श्रामण्यस्य भविष्यसि ॥ ४५ ॥ तस्याः स वचनं श्रुत्वा, संयतायास्सुभाषितम् । अङ्कुशेन यथा नागो, धर्मे संप्रतिपातितः ॥ ४६ ॥ मनोगुप्तो वचोगुप्तः, कायगुप्तो जितेन्द्रियः । श्रामण्यं निश्चलं स्पृशति, यावज्जीवं दृढव्रतः ॥ ४७ ॥ उग्रं तपश्चरित्वा जातौ द्वावपि केवलिनौ । सर्वं कर्म क्षपयित्वा, सिद्धिं प्राप्तावनुत्तराम् ॥ ४८ ॥

एवं करेंति संबुद्धा, पण्डिया पवियक्खणा ।
विणियट्टंति भोगेसु, जहा से पुरिसोत्तमे ॥४९॥
त्ति बेमि

॥ बावीसइमं रहनेमिज्जं अज्झयणं समत्तं ॥

---

एवं कुर्वन्ति सम्बुद्धाः, पण्डिताः प्रविचक्षणाः । विनिवर्तन्ते भोगेभ्यः, यथा ते पुरुषोत्तमाः ॥ ४९ ॥ इति ब्रवीमि ।

॥ अह तेइसमं केसिगोयमज्झयणम् ॥

जिणे पासेत्ति णामेणं, अरहा लोगपूइए ।
संबुद्धप्पा य सव्वण्णू, धम्मतित्थयरे जिणे ॥ १ ॥

तस्स लोगप्पईवस्स, आसि सीसे महायसे ।
केसी कुमारसमणे, विज्जाचरणपारगे ॥ २ ॥

ओहिणाणसुए बुद्धे, सीससंघ समाउले ।
गामाणुगामं रीयन्ते, से वि सावत्थिमागए ॥ ३ ॥

तिंदुयं णाम उज्जाणं, तंमि णगरमंडले ।
फासुए सेज्जसंथारे, तत्थ वासमुवागए ॥ ४ ॥

अह तेणेव कालेणं, धम्मतित्थयरे जिणे ।
भगवं वद्धमाणे त्ति, सव्वलोगंमि विस्सुए ॥ ५ ॥

तस्स लोगप्पईवस्स, आसि सीसे महायसे ।
भगवं गोयमे णामं, विज्जाचरणपारए ॥ ६ ॥

---

॥ अथ त्रयोविंशं केशिगौतमीयमध्ययनम् ॥

जिनः पार्श्व इति नाम्नाऽर्हल्लोकपूजितः । सम्बुद्धात्मा च सर्वज्ञो, धर्मतीर्थकरो जिनः ॥ १ ॥ तस्य लोकप्रदीपस्यासीच्छिष्यो महायशाः । केशिकुमारः श्रमणो, विद्याचरणपारगः ॥ २ ॥ अवधिज्ञानश्रुताभ्यां बुद्धश्शिष्यसंगसमाकुलः । ग्रामानुग्रामं रीयमाणस्सोऽपि श्रावस्तीमागतः ॥ ३ ॥ तिन्दुकं नामोद्यानं, तस्मिन्नगरमण्डले । प्रासुके शय्यासंस्तारे, तत्र वासमुपागतः ॥ ४ ॥ अथ तस्मिन्नेव काले, धर्मतीर्थकरो जिनः । भगवान्वर्धमान इति, सर्वलोके विश्रुतः ॥ ५ ॥ तस्य लोकप्रदीपस्यासीच्छिष्यो महायशाः । भगवान् गौतमनामा, विद्याचरणपारगः ॥ ६ ॥

बारसंगविऊ बुद्धे, सीससंघसमाउले ।
गामाणुगामं रीयंते, से वि सावत्थिमागए ॥ ७ ॥

केट्ठगं णाम उज्जाणं, तंमि णगरमंडले ।
फासुए सेज्जसंथारे, तत्थ वासमुवागए ॥ ८ ॥

केसीकुमारसमणे, गोयमे य महायसे ।
उभओ वि तत्थ विहरिंसु, अल्लीणा सुसमाहिया ॥ ९ ॥

उभओ सीससंघाणं, संजयाण तवस्सिणं ।
तत्थ चिंता समुप्पन्ना, गुणवंताण ताइणं ॥१०॥

केरिसो वा इमो धम्मो !, इमो धम्मो व केरिसो ? ।
आयारधम्मप्पणिही, इमा वा सा व केरिसी ? ॥११॥

चाउज्जामो य जो धम्मो, जो इमो पंचसिक्खिओ ।
देसिओ वद्धमाणेणं, पासेण य महामुणी ॥१२॥

---

द्वादशाङ्गविद् बुद्धो, शिष्यसंघसमाकुलः । ग्रामानुग्रामं रीयमाणस्सोऽपि श्रावस्तीमागतः ॥ ७ ॥ क्रोष्टुकं नामोद्यानं, तस्मिन्नगरमण्डले । प्रासुके शय्यासंस्तारे, तत्र वासमुपागतः ॥ ८ ॥ केशिकुमारश्रमणः, गौतमश्च महायशाः । उभावपि तत्र व्यहार्ष्टामालीनौ सुसमाहितौ ॥ ९ ॥ उभयतश्शिष्यसंघानां तपस्विनां । तत्र चिन्ता समुत्पन्ना, गुणवतां त्रायिणाम् ( तायिनाम् ) ॥ १० ॥ कीदृशो वायं धर्मोऽयं वा कीदृशः ? । आचारधर्मप्रणिधिरियं वा सा वा कीदृशी ? ॥ ११ ॥ चातुर्यामश्च यो धर्मः, योऽयं पञ्चशिक्षितः । देशितो वर्धमानेन, पार्श्वेन च महामुनिना ॥ १२ ॥

अचेलओ य जो धम्मो, जो इमो संतरुत्तरो ।
एगकज्जपवण्णाणं, विसेसे किं णु कारणं ? ॥१३॥

अह ते तत्थ सीसाणं, विण्णाय पवितक्कियं ।
समागमे कयमती, उभओ केसि-गोयमा ॥१४॥

गोयमो पडिरूवण्णू, सीससंघसमाउले ।
जेट्ठं कुलमवेक्खंतो, तेंडुयं वणमागओ ॥१५॥

केसी कुमारसमणे, गोयमं दिस्स [1]मागयं ।
पडिरूवं पडिवत्तिं, सम्मं संपडिवज्जई ॥१६॥

पलालं फासुयं तत्थ, पंचमं कुसतणाणि य ।
गोयमस्स णिसिज्जाए, खिप्पं संपणामए ॥१७॥

केसीकुमारसमणे, गोयमे य महायसे ।
उभओ णिसण्णा सोहंति, चंद-सूरसमप्पभा ॥१८॥

---

अचेलकश्च यो धर्मो, योऽयं सान्तरोत्तरः । एककार्यप्रपन्नानां, विशेषे किं नु कारणम्? ॥१३॥ अथ तौ तत्र शिष्याणां, विज्ञाय प्रवितर्कितम् । समागमे कृतमती, उभौ केशिगौतमौ ॥१४॥ गौतमः प्रतिरूपज्ञश्शिष्यसंघसमाकुलः । ज्येष्ठं कुलमपेक्षमाणस्तिन्दुकं वनमागतः ॥१५॥ केशीकुमारश्रमणो, गौतमं दृष्ट्वाऽऽगतम् । प्रतिरूपां प्रतिपत्तिं, सम्यक् संप्रतिपद्यते ॥१६॥ पलालं प्रासुकं तत्र, पञ्चमानि कुशतृणानि च । गौतमस्य निषद्यायै, क्षिप्रं तु समर्पयति ॥१७॥ केशीकुमारश्रमणो, गौतमश्च महायशाः । उभौ निषण्णौ शोभेते, चन्द्रसूर्यसमप्रभौ ॥१८॥

---

१ मकारस्त्वलाक्षणिको ज्ञेयः सं.

समागया बहू तत्थ, पासंडा कोउगासिया ।
गिहत्थाण य णेगाओ, साहस्सीओ समागया ॥१९॥

देव–दाणव–गंधव्वा, जक्खरक्खस–किंनरा ।
अदिस्साणं य भूयाणं, आसि तत्थ समागमो ॥२०॥

पुच्छामि ते महाभाग !, केसी गोयममब्बवी ।
तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥२१॥

'पुच्छ भंते ! जहिच्छं ते', केसिं गोयममब्बवी ।
ततो केसी अणुण्णाए, गोयमं इणमब्बवी ॥२२॥

चाउज्जामो य जो धम्मो, जो इमो पंचसिक्खिओ ।
देसिओ वद्धमाणेणं, पासेण य महामुणी ॥२३॥

एगकज्जपवण्णाणं, विसेसे किं णु कारणं ।
धम्मे दुविहे मेहावी !, कहं विप्पच्चओ ण ते ॥२४॥

---

समागता बह्वस्तत्र, पापाण्डाः कौतुकाश्रिताः । गृहस्थानामनेकास्साहस्यः समागताः ॥१९॥ देवदानवगन्धर्वाः, यक्षराक्षसकिन्नराः । अदृश्यानां च भूतानामासीत्तत्र समागमः ॥२०॥ पृच्छामि त्वां महाभाग, केशिर्गौतममब्रवीत् । ततः केशिं ब्रुवन्तं तु, गौतम इदमब्रवीत् ॥२१॥ पृच्छ भन्दत यथेच्छं त्वं, केसिं गौतमोऽब्रवीत् । ततः केशिरनुज्ञातो, गौतममिदमब्रीत् ॥२२॥ चतुर्यामश्च यो धर्मो, योऽयम् पञ्चशिक्षितः । देशितो वर्द्धमानेन, पार्श्वेन च महामुनिना ॥२३॥ एककार्यं प्रपन्नानां विषेध किं नु कारणम् । मर्मे द्विविधे मेधाविन् ! कथं विप्रत्ययो न ते ॥२४॥

तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ।
पण्णा समिक्खिए धम्मं, तत्तं तत्तविणिच्छियं ॥२५॥

पुरिमा उज्जुजडा उ, वंकजडा य पच्छिमा ।
मज्झिमा उज्जुपण्णा उ, तेण धम्मो दुहा कओ ॥२६॥

पुरिमाणं दुव्विसोज्झो उ, चरिमाणं दुरणुपालओ ।
कप्पो मज्झिमगाणं तु, सुविसोज्झो सुपालओ ॥२७॥

'साहु गोयम! पण्णा ते', च्छिण्णो मे संसओ इमो ।
अण्णो वि संसओ मज्झ, तं मे कहसु गोयमा! ॥२८॥

अचेलगो य जो धम्मो, जो इमो संतरुत्तरो ।
देसिओ वद्धमाणेण, पासेण य महामुणी ॥२९॥

एगकज्जपवण्णाणं, विसेसे किं णु कारणं ।
लिंगे दुविहे मेहावी!, कहं विप्पच्चओ ण ते ॥३०॥

---

ततः केशिं ब्रुवन्तं तं तु, गौतम इदमब्रवीत् । प्रज्ञा समीक्षते धर्मतत्त्वं तत्वविनिश्चयम् ॥२५॥ पूर्वा ऋजुजडास्तु, वक्र जडाश्च पश्चिमाः । मध्यमा ऋजुप्रज्ञास्तु, तेन धर्मो द्विधा कृतः ॥२६॥ पूर्वेषां दुर्विशोध्यस्तु, चरमानां दुरनुपालकः । कल्पो मध्यमकानां तु, सुविशोध्यस्सुपालकः ॥२७॥ साधु गौतम प्रज्ञा ते, च्छिन्नो मे संशयोऽयम् । अन्योपि संशयो मम, तं मे कथय गौतम ॥२८॥ अचेलकश्च यो धर्मो योऽयं सान्तराणि (?)। देशितो वर्धमानेन, पार्श्वेन च महामुने ॥२९॥ एककार्यप्रपन्नानां, विशेषे किं नु कारणम् । लिङ्गे द्विविधे मेधाविन्कथं विप्रत्ययो न ते ॥३०॥

केसिमेवं बुवाणं तु, गोयमो इणमब्बवी ।
विण्णाणेण समागम्म, धम्मसाहणमिच्छियं ॥३१॥

पच्चयत्थं च लोगस्स, णाणाविहविगप्पणं ।
जत्तत्थं गहणत्थं च, लोगे लिंगपओयणं ॥३२॥

अह भवे पइण्णा उ, मोक्खसब्भूयसाहणा ।
णाणं च दंसणं चेव चरित्तं चेव णिच्छए ॥३३॥

साहु गोयम ! पण्णा ते, छिण्णो मे संसओ इमो ।
अण्णो वि संसओ मज्झं, तं मे कहसु गोयमा! ॥३४॥

अणेगाणं सहस्साणं, मज्झे चिट्ठसि गोयमा ! ।
ते य ते अहिगच्छंति, कहं ते णिज्जिया तुमे? ॥३५॥

एगे जिए जिया पंच, पंच जिए जिया दस ।
दसहा उ जिणित्ता णं, सव्वसत्तू जिणामहं ॥३६॥

---

केशिमेवं ब्रुवन्तं तु, गौतम इदमब्रवीत् । विज्ञानेन समागम्य, धर्मसाधनमिप्सितम् ॥३१॥ प्रत्ययार्थं च लोकस्य, नानाविधविकल्पनम् । यात्रार्थं ग्रहणार्थं च, लोके लिङ्गप्रयोजनम् ॥३२॥ अथ भवेत्प्रतिज्ञा तु, मोक्षसद्भूतसाधनानि । ज्ञानं च दर्शनं चैव, चारित्रं चैव निश्चये ॥३३॥ साधु गौतम प्रज्ञा ते, च्छिनो मे संशयोपिऽयम् । अन्योपि संशयो मम तं मे कथय गौतम! ॥३४॥ अनेकानां सहस्राणां, मध्ये तिष्ठसि गौतम ! । ते च त्वामभिगच्छन्ति, कथं ते निर्जितास्त्वया ॥३५॥ एकस्मिञ्जिते जिताः पंच पञ्चसु जितेषु जिता दश । दशधा तु जित्वा नु, सर्वशत्रून् जयाम्यहम् ॥३६॥

'सत्तू य इइ के वुत्ते ?,' केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥३७॥

एगऽप्पो अजिए सत्तू, कसाया इंदियाणि य ।
ते जिणित्तु जहाणायं, विहरामि अहं मुणी ॥३८॥

'साहु गोयम! पण्णा ते,' च्छिण्णो मे संसओ इमो ।
अण्णो वि संसओ मज्झं, तं मे कहसु गोयमा ! ॥३९॥

दीसंति बहवे लोए, पासबद्धा सरीरिणो ।
मुक्कपासो लहुब्भूओ, कहं तं विहरसी मुणी ? ॥४०॥

ते पासे सव्वसो च्छेत्ता, णिहंतूण उवायओ ।
मुक्कपासो लहुभूओ, विहरामि अहं मुणी ॥४१॥

पासा य इइ के वुत्ता ?, केसी गोयममब्बवी ।
केसिं एवं बुवंतं तु, गोयमो इणमब्बवी ॥४२॥

---

शत्रुः क उक्त केशिर्गौतममब्रवीत् । ततः केशिं ब्रुवन्तं तं, गौतम इदमब्रवीत् ॥३७॥ एक आत्माऽजितश्शत्रुकषाया इन्द्रियाणि च । तान्जित्वा यथान्यायं, विहराम्यहं मुने ! ॥३८॥ साधु गौतम! प्रज्ञा ते, छिन्नो मे संशयोऽयम् । अन्योऽपि संशयो मम, तं मे कथय गौतम ! ॥३९॥ दृश्यन्ते बहवो लोकाः पाशबद्धाश्शरीरिणः । मुक्तपाशो लघूभूतः कथं त्वं विहरसि मुने ? ॥४०॥ तान्पाशान्सर्वतश्छित्वा निहत्योपायतः । मुक्तपाशो लघूभूतो विहराम्यहं मुनिः ॥४१॥ पाशा इति क उक्ता केशिर्गौतममब्रवीत् । केशिमेवं ब्रुवन्तं तु गौतम इदमब्रवीत् ॥४२॥

राग-द्दोसादओ तिव्वा, णेहपासा भयंकरा ।
ते छिंदित्तु जहाणायं, विहरामि जहक्कम्मं ॥४३॥

साहु गोयम पण्णा ते, छिण्णो मे संसओ इमो ।
अण्णो वि संसओ मज्झं, तं मे कहसु गोयमा ! ॥४४॥

अंतोहिययसंभूया, लया चिट्ठइ गोयमा ! ।
फलेइ विसभक्खीणं, सा उ उद्धरिया कहं ॥४५॥

तं लयं सव्वसो छित्ता, उद्धरित्ता समूलियं ।
विहरामि जहाणायं, मुक्को मि विसभक्खणं ॥४६॥

'लया य इइ का वुत्ता ?', केसी गोयममब्बवी ।
केसीमेवं बुवंतं तु, गोयमो इणमब्बवी ॥४७॥

भवतण्हा लया वुत्ता, भीमा भीमफलोदया ।
तमुद्धिच्च जहाणायं, विहरामि महामुणी ! ॥४८॥

---

रागद्वेषादयस्तीव्राः स्नेहपाशभयंकराः । तान्छित्वा यथान्यायं, विहरामि यथाक्रमम् ॥४३॥ साधुर्गौतम ! प्रज्ञा ते, छिन्नो मे संशयोऽयम् । अन्योपि संशयो मम, तं मे कथय गौतम ! ॥४४॥ अन्तर्हृदयसम्भूता, लता तिष्ठति गौतम ! । फलति विषभक्ष्याणि, सातूद्धृता ! कथम् ॥४५॥ तां लतां सर्वतश्छित्वोद्धृत्य समूलिकाम् । विहरामि यथा न्यायं, मुक्तोस्मि विषभक्षणात् ॥४६॥ लता चेति काउक्ता, केशिगौतममब्रवीत् । केशिमेवं ब्रुवन्तं तु, गौतम इदमब्रवीत् ॥४७॥ भवतृष्णा लतोक्ता, भीमा भीमफलोदया । तामुद्धृत्य यथान्यायं, विहरामि महामुने ! ॥४८॥

'साहु गोयम! पण्णा ते, छिण्णो मे संसओ इमो ।
अण्णो वि संसओ मज्जं, तं मे कहसु गोयमा! ॥४९॥

संपज्जलिया घोरा, अग्गी चिट्ठइ गोयमा! ।
जे डहन्ति सरीरत्था, कह विज्झाविया तुमे? ॥५०॥

महामेहप्पसूयाओ, गिज्झ वारि जलुत्तमं ।
सिंचामि सययं तेउ(ऊ), सित्ता णो व डहंति मे ॥५१॥

'अग्गी य इइ के वुत्ते!,' केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥५२॥

कसाया अग्गिणो वुत्ता, सुय सील तवो जलं ।
सुयधाराभिहया संता, भिण्णा हु ण डहंति मे ॥५३॥

साहु गोयम! पण्णा ते, छिण्णो मे संसओ इमो ।
अण्णो वि संसओ मज्झं, तं मे कहसु गोयमा ॥५४॥

---

साधुर्गौतम! प्रज्ञा ते, छिन्नो मे संशयोऽयम् । अन्योपि संशयो मम तं मे कथय गौतम! ॥४९॥ संप्रज्वलिता घोरा, अग्नयस्तिष्ठन्ति गौतम! । ये दहन्ति शरीरस्थाः, कथं विध्यापितास्त्वया? ॥५०॥ महामेघप्रसूताद्, गृहीत्वा वारि जलोत्तमम् । सिञ्चामि सततं तान्तु (तेजः), सिक्ता नैव दहन्ति मे ॥५१॥ अग्नयश्चेति क उक्ताः, केशिः गौतममब्रवीत् । ततः केशि ब्रुवन्तं तु, गौतम इदमब्रवीत् ॥५२॥ कषाया अग्नयः उक्ता, श्रुतशीलतपो जलम् । श्रुतधाराभिहताः सन्तो, भिन्ना हु न दहन्ति माम् ॥५३॥ साधुर्गौतम! प्रज्ञा ते, छिन्नो मे संशयोऽयम् । अन्योपि संशयो मम, तं मे कथय गौतम! ॥५४॥

अयं साहसिओ भीमो, दुट्ठस्सो परिधावई ।
जंसि गोअम ! आरुढो, कहं तेण ण हीरसि ? ॥५५॥

पहावंतं णिगिण्हामि, सुयरस्सिसमाहियं ।
ण मे गच्छइ उम्मग्गं, मग्गं च पडिवज्जई ॥५६॥

'अस्से य इइ के वुत्ते!,' केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥५७॥

मणो साहसिओ भीमो, दुट्ठस्सो परिधावई ।
तं सम्मं तु णिगिण्हामि, धम्मसिक्खाए कन्थगं ॥५८॥

'साहु गोयम! पण्णा ते, छिण्णो मे संसओ इमो ।
अण्णो वि संसओ मज्जं, तं मे कहसु गोयमा ! ॥५९॥

कुप्पहा बहवो लोए, जेहिं नासंति जंतुणो ।
अद्धाणे कह वट्टंतो, तं ण णस्ससि गोयमा ! ॥६०॥

---

अयं साहसिको भीमो, दुष्टाश्वः परिधावति । यस्मिन्गौतम ! आरूढः, कथं तेन न ह्रियसे ? ॥५५॥ प्रधावन्तं निगृह्णामि, श्रुतरश्मिसमाहितम् । न मे गच्छत्युन्मार्गं, मार्गं च प्रतिपद्यते ॥५६॥ अश्वश्चेति क उक्तः, केशिः गौतममब्रवीत् । ततः केशिं ब्रुवन्तं तु, गौतम इदमब्रवीत् ॥ ॥५७॥ मनस्साहसिको भीमो, दुष्टाश्वः परिधावति । तं सम्यग्निगृह्णामि, धर्मशिक्षायै कन्थकम् ॥५८॥ साधुर्गौतम ! प्रज्ञा ते, छिन्नो मे संशयोऽयम् । अन्योपि संशयो मम, तं मे कथय गौतम ! ॥५९॥ कुपथा बहवो लोके, यैर्नश्यन्ति जन्तवः । अध्वनि कथं वर्तमानस्त्वं न नश्यसि गौतम ! ॥६०॥

जे य मग्गेण गच्छंति, जे य उम्मग्गपट्ठिया ।
ते सव्वे विदिया मज्झं, तो ण णस्सामहं मुणी ! ॥६१॥

'मग्गे य इइ के वुत्ते', केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥६२॥

कुप्पवयणपासंडी, सव्वे उम्मग्गपट्ठिया ।
सम्मग्गं तु जिणक्खायं, एस मग्गे हि उत्तमे ॥६३॥

'साहु गोयम ! पण्णा ते,' छिण्णो मे संसओ इमो ।
अण्णो वि संसओ मज्झं, तं कहसु गोयमा ! ॥६४॥

महाउदगवेगेणं, वुज्झमाणाण पाणीणं ।
सरणं गई पइट्ठा य, दीवं कं मण्णसी मुणी ! ॥६५॥

अत्थि एगो महादीवो, वारिमज्झे महालओ ।
महाउदगवेगस्स, गई तत्थ ण विज्जई ॥६६॥

---

ये च मार्गेण गच्छन्ति, ये चोन्मार्गप्रस्थिताः ते सर्वे विदिता मम, ततो न नश्याम्यहं मुने ! ॥६१॥ मार्गं इति क उक्तः, केशिर्गौतममब्रवीत् । ततः केशिं ब्रुवन्तं तु, गौतम इदमब्रवीत् ॥६२॥ कुप्रवचनपाखण्डिनस्सर्वे उन्मार्गप्रस्थिताः । सन्मार्गं तु जिनाख्यातं, एष मार्गो ह्युत्तमः ॥६३॥ साधुर्गौतम ! प्रज्ञा ते, छिन्नो मे संशयोऽयम् । अन्योऽपि संशयो मम, तं मे कथय गौतम ! ॥६४॥ महोदकवेगेनोह्यमानानां प्राणिनाम् । शरणं गतिं प्रतिष्ठां च, द्वीपं कं मन्यसे मुने ! ॥६५॥ अस्त्येको महाद्वीपो, वारि मध्ये महालयः । महोदकवेगस्य, गतिस्तत्र न विद्यते ॥६६॥

'दीवे य इइ के वुत्ते,' केसी गोयममब्बवी ।<br>
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥६७॥

'जरामरण वेगेणं, वुज्झमाणाण पाणिणं ।<br>
धम्मो दीवो पइट्ठा य, गई सरणमुत्तमं ॥६८॥

'साहु गोयम! पण्णा ते, छिण्णो मे संसओ इमो ।<br>
अण्णो वि संसओ मज्झ, तं मे कहसु गोयमा! ॥६९॥

अण्णवंसि महोहंसि, णावा विपरिधावइ ।<br>
जंसि गोयम आरूढो, कहं पारं गमिस्ससि? ॥७०॥

जा उ आसा-विणी[1] णावा, ण सा पारस्स गामिणी ।<br>
जा णिरस्साविणी णावा, सा उ पारस्स गामिणी ॥७१॥

'णावा य इइ का वुत्ता,' केसी गोयममब्बवी ।<br>
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥७२॥

---

द्वीपश्चेति क उक्तः, केशिर्गौतममब्रवीत् । ततः केशिं ब्रुवन्तं तु, गौतम इदमब्रवीत् ॥६७॥ जरामरणवेगेनोह्यमानानां प्राणिनाम् । धर्मो द्वीपः प्रतिष्ठा च, गतिश्शरणमुत्तमम् ॥६८॥ साधुर्गौतम! प्रज्ञा ते. छिन्नो मे संशयोऽयम्! अन्योऽपि संशयो मम, तं मे कथय गौतम! ॥६९॥ अर्णवे महौघे, नौः विपरिधावति। यस्यां गौतम आरूढो, कथं पारं गमिष्यसि? ॥७०॥ या त्वाश्राविणी नौर्न सा पारस्य गामिनी । या निराश्राविणी नौः, सा तु पारस्य गामिनी ॥७१॥ नौश्चेति कोक्ता, केशिर्गौतममब्रवीत् । ततः केशिं ब्रुवन्तं तु, गौतम इदमब्रवीत् ॥७२॥

१ आश्राविणी=जलसंग्राहिणी ।

सरीरमाहु णाव त्ति, जीवो वुच्चइ णाविओ ।
संसारो अण्णवो वुत्तो, जं तरंति महेसिणो ॥७३॥

'साहु गोयम ! पण्णा ते, छिण्णो मे संसओ इमो ।
अण्णो वि संसओ मज्झं, तं मे कहसु गोयमा ! ॥७४॥

अंधयारे तमे घोरे, चिट्ठंति पाणिणो बहू ।
को करिस्सइ उज्जोयं, सव्वलोगंमि पाणिणं ॥७५॥

उग्गओ विमलो भाणू, सव्वलोकपभंकरो ।
सो करिस्सइ उज्जोयं, सव्वलोयंमि पाणिणं ॥७६॥

'भाणू य इइ के वुत्ते,' केसी गोयमब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥७७॥

उग्गओ खीणसंसारो, सव्वण्णू जिणभक्खरो ।
सो करिस्सइ उज्जोयं, सव्वलोगम्मि पाणिणं ॥७८॥

---

शरीरमाहुर्नौरिति, जीव उच्यते नाविकः । संसारोऽर्णव उक्तोयं तरन्ति महर्षयः ॥७३॥ साधुर्गौतम ! प्रज्ञा ते, छिन्नो मे संशयोऽयम् । अन्योपि संशयो मम, तं मे कथय गौतम ! ॥७४॥ अंधकारे तमसि घोरे, तिष्ठन्ति प्राणिनो बहु । कः करिष्यत्युद्योतं, सर्वलोके प्राणिनां ॥७५॥ उद्गतो विमलो भानुस्सर्वलोकप्रभाकरः । स करिष्यत्युद्योतं, सर्वलोके प्राणिनाम् ॥७६॥ भानुश्चेति क उक्तः केशिर्गौतममब्रवीत् । ततः केशिं ब्रुवन्तं तु, गौतम इदमब्रवीत् ॥७७॥ उद्गतः क्षीणसंसारो, सर्वज्ञो जिनभास्करः । स करिष्यत्युद्योत, सर्वलोके प्राणिनाम् ॥७८॥

'साहु गोयम? पण्णा ते,' छिण्णो मे संसओ इमो ।
अण्णो वि संसओ मज्झ, तं मे कहसु गोयमा ! ॥७९॥

सारीर-माणसे दुक्खे, बज्झमाणाण पाणिणं ।
खेमं सिवं अणाबाहं, ठाणं किं मण्णसी मुणी ! ॥८०॥

अत्थि एगं धुवं ठाणं, लोगग्गंमि दुरारुहं ।
जत्थ णत्थि जरा मच्चू, वाहिणो वेयणा तहा ॥८१॥

'ठाणे य इइ के वुत्ते,' केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥८२॥

णिव्वाणं ति अबाहं ति, सिद्धी लोगग्गमेव य ।
खेमं सिवं अणाबाहं, जं तरंति महेसिणो ॥८३॥

तं ठाणं सासयं वासं, लोयग्गंमि दुरारुहं ।
जं संपत्ता ण सोयन्ति, भवोहंतकरा मुणी ॥८४॥

---

साधुः गौतम ! प्रज्ञा ते, छिन्नो मे संशयोऽयम् । अन्योऽपि संशयो मम, तं मे कथय गौतम ! ॥७९॥ शारीरमानसैर्दुःखैः, बाध्यमानानां प्राणिनाम् । क्षेमं शिवमनाबाधं, स्थानं किं मन्यसे मुने ? ८०॥ अस्त्येकं ध्रुवं स्थानं, लोकाग्रे दुरारोहम् । यत्र नास्ति जरामृत्यु--र्व्याधयो वेदनास्तथा ॥८१॥ स्थानमिति किमुक्तं, केशिर्गौतममब्रवीत् । ततः केशिं ब्रुवन्तं तु, गौतम इदमब्रवीत् ॥८२॥ निर्वाणमित्यबाधमिति, सिद्धिर्लोकाग्रमेव च । क्षेमं शिवमनाबाधं, यं तरन्ति महर्षयः ॥८३॥ तं स्थानं शाश्वतं वासं लोकाग्रे दुरारोहम् । यं सम्प्राप्ता न शोचन्ते, भवौघान्तकरा मुनयः ॥८४॥

'साहु गोयम पण्णा ते,' छिण्णो मे संसओ इमो ।
णमो ते संसयातीत! सव्वसुत्तमहोदही ॥८५॥

एवं तु संसए छिण्णे, केसी घोरपरक्कमे ।
अभिवंदित्ता सिरसा, गोयमं तु महायसं ॥८६॥

पंचमहव्वयधम्मं, पडिवज्जइ भावओ ।
पुरिमस्स पच्छिमम्मि, मग्गे तत्थ सुहावहे ॥८७॥

केसी गोयमओ णिच्चं, तम्मि आसि समागमे ।
सुय-सीलसमुक्करिसो, महत्थत्थविणिच्छओ ॥८८॥

तोसिया परिसा सव्वा, सम्मग्गं समुवट्ठिया ।
संथुया ते पसीयन्तु, भयवं केसि गोयम ॥८९॥

॥ त्ति बेमि ॥

॥ तेवीसइमं केसि-गोयमिज्जं अज्झयणं समत्तं ॥

---

साधुर्गौतम ! प्रज्ञा ते, छिन्नो मे संशयोऽयम् । नमस्ते संशयातीत !, सर्वसूत्रमहोदधे ! ॥८५॥ एवं तु संशये छिन्ने, केशिर्घोरपराक्रमः । अभिवन्द्य शिरसा, गौतमं तु महायशसं ॥८६॥ पञ्चमहाव्रतं धर्मं, प्रतिपद्यते भावतः । पूर्वस्य पश्चिमे, मार्गे तत्र शुभावहे ॥८७॥ केशि गौतमतो नित्यं, तस्मिन्नासीत्समागमे । श्रुतशीलसमुत्कर्षो, महार्थार्थविनिश्चयः ॥८८॥ तोषिता परिषत् सर्वा, सन्मार्गं समुपस्थिता । संस्तुतो तौ प्रसीदतां, भगवन्तौ केशिगौतमाविति ब्रवीमि ॥८९॥

प्रवचनमात्राख्यं चतुर्विंशं अध्ययनम्.

अट्ठ पवयणमायाओ, समिती गुत्ती तहेव य ।
पंचेव य समितीओ, तओ गुत्तीओ आहिया ॥१॥

इरियाभासेसणादाणे उच्चारे समिई इय ।
मणगुत्ती वयगुत्ती, कायगुत्ती, उ अट्ठमा ॥२॥

एयाओ अट्ठ समिओ, समासेण वियाहिया ।
दुवालसंग जिणक्खायं, मायं जत्थ उ पवयणं ॥३॥

आलम्बणेण कालेण, मग्गेण जयणाय य ।
चउकारणपरिसुद्धं, संजए इरियं रिए ॥४॥

तत्थ आलंबणं णाणं, दंसणं चरणं तहा ।
काले य दिवसे वुत्ते, मग्गे उप्पहवज्जिए ॥५॥

दव्वओ खित्तओ चेव, कालओ भावओ तहा ।
जयणा चउव्विहा वुत्ता, तं मे कित्तयओ सुण ॥६॥

---

अष्ट प्रवचनमातरस्समितयो गुप्तयस्तथैव च । पञ्चैव समितयस्त्रयो गुप्तय आहिताः ॥१॥ ईर्याभाषैषणादाने उच्चारे समितिरिति । मनोगुप्तिर्वचनगुप्तिः कायगुप्तिस्त्वष्टमा ॥२॥ एता अष्ट समितयस्समासेन व्याख्याताः । द्वादशाङ्ग जिनख्यातं, मातां यत्र तु प्रवचनम् ॥३॥ आलम्बनेन कालेन, मार्गेण यतनया च । चतुष्कारणपरिशुद्धां, संयत ईर्यां रीयते ॥४॥ तत्रालम्बनं ज्ञानं, दर्शनं चरणं तथा । कालश्च दिवस उक्तो, मार्ग उत्पथवर्जितः ॥५॥ द्रव्यतः क्षेतत्रश्चैव, कालतो भावतस्तथा । यतना चतुर्विधोक्ता, तं मे कीर्तयतः श्रुणु ॥६॥

दव्वओ चक्खुसा पेहे, जुगमत्तं च खेत्तओ ।
कालओ जाव रीइज्जा, उवउत्तो य भावओ ॥७॥

इंदियत्थे विवज्जेत्ता, सज्झायं चेव पंचहा ।
त[१]म्मुत्ती तप्पु[२]रक्कारे, उवउत्ते रियं [३]रिए (१) ॥८॥

[४]कोहे [५]माणे य [६]मायाए, लोभे य उवउत्तया ।
हासे [७]भए मोहरिए, [८]विकहासु तहेव य ॥९॥

एयाइं अट्ठ ठाणाइं, परिवज्जित्तु संजओ ।
असावज्जं मियं काले, भासं भासिज्ज पण्णवं (२) ॥१०॥

गवेसणाए गहणे य, परिभोगेसणा य जा ।
आहारोवहि सेज्जाए, एए तिण्णि विसोहए ॥११॥

उग्गमुप्पायणं पढमे, बीए सोहेज्ज एसणं ।
परिभोयंमि चउक्कं, विसोहेज्ज जयं जई (३) ॥१२॥

---

द्रव्यतश्चक्षुषा प्रेक्षेत, युगमात्रं च क्षेत्रतः । कालतो यावद्रीयेत, उपयुक्तश्च भावतः ॥७॥ इन्द्रियार्थान्विवर्ज्य, स्वाध्यायं चैव पञ्चधा । तन्मूर्तिस्तत्पुरस्कार, उपयुक्त ईर्यां रीयेत ॥८॥ क्रोधे माने च मायायां, लोभे चोपयुक्तता । हास्ये भये मौखर्ये, विकथासु तथैव च ॥९॥ एतान्यष्टौ स्थानानि, परिवर्ज्य संयतः । असावद्यां मितां काले, भाषां भाषेत प्रज्ञावान् ॥१०॥ गवेषणायां ग्रहणे च, परिभोगैषणा च या । आहारोपधिशय्यास्वेतास्तिस्रो विशोधयेत् ॥११॥ उद्गमोत्पादनं प्रथमायां, द्वितीयायां शोधयेदेषणाम् । परिभोगे चतुष्कं, विशोधये-यतमानो यतिः ॥१२॥

ओहोवहोवग्गहियं, भंडयं दुविहं मुणी ।
गिण्हंतो णिक्खिवंतो य, पउंजेज्ज इमं विहिं ॥१३॥

चक्खुसा पडिलेहित्ता, पमज्जेज्ज जयं जई ।
आदए णिक्खिवेज्जा वा, दुहओवि समिए सया (४) ॥१४॥

उच्चारं पासवणं, खेलं सिंघाण जल्लियं ।
आहारं उवहिं देहं, अण्णं वावि तहाविहं ॥१५॥

अणावायमसंलोए, अणावाए चेव होइ संलोए ।
आवायमसंलोए, आवाए चेव संलोए ॥१६॥

अणावायमसंलोए, परस्सऽणुवघाइए ।
समे अज्झुसिरे यावि, अचिरकालकयंमि य ॥१७॥

वित्थिण्णे दूरमोगाढे, णासण्णे बिलवज्जिए ।
तसपाण बीयरहिए, उच्चाराईणि वोसिरे (५) ॥१८॥

---

ओघोपध्यौपग्रहिकोपधिं च, भाण्डकं द्विविधं मुनिः । गृह्णन्निक्षिपंश्च, प्रयुंजीतेमं विधिम् ॥१३॥ चक्षुषा प्रत्युपेक्ष्य, प्रमार्जयेद्यतमानो यतिः । आददीत निक्षिपेद्वा, द्विधापि समितस्सदा ॥१४॥ उच्चारं प्रश्रवणं, खेलं श्लेष्माणं मलं । आहारमुपधिं देहमन्यं वापि तथाविधं ॥१५॥ आनापातमसंलोकं, अनापातं चैव भवति संलोकम् । आपातमसंलोकं, आपातं चैव संलोकम् ॥१६॥ अनापातासंलोके, परस्यानुपघातिके । समेऽशुषिरे वाप्यचिरकालकृते च ॥१७॥ विस्तीर्णे दूरमवगाढे, नासन्ने बिलवर्जिते । त्रसप्राणबीजरहित, उच्चारादीनि व्युत्सृजेत् ॥१८॥

एयाओ पंच समिईओ, समासेण वियाहिया ।
एत्तो उ तओ गुत्तीओ, वोच्छामि अणुपुव्वसो ॥१९॥

सच्चा तहेव मोसा य, सच्चामोसा तहेव य ।
चउत्थी असच्चमोसा य, मणगुत्तीओ चउव्विहा ॥२०॥

संरंभ-समारंभे, आरंभे य तहेव य ।
मणं पवत्तमाणं तु, णियत्तेज्ज जयं जई (६) ॥२१॥

सच्चा तहेव मोसा य, सच्चामोसा तहेव य ।
चउत्थी असच्चमोसा य, वइगुत्ती चउव्विहा ॥२२॥

संरंभसमारंभे आरंभे य तहेव य ।
वयं पवत्तमाणं तु, णियत्तेज्ज जयं जई ॥२३॥

ठाणे णिसीयणे चेव, तहेव य तुयट्टणे ।
उल्लंघण पल्लंघण, इंदियाण य जुंजणे ॥२४॥

---

एताः पञ्च समितयस्समासेन व्याख्याताः । इतस्तु त्रयो गुप्तयो, वक्ष्याम्यनुपूर्व्या ॥१९॥ सत्या तथैव मृषा च, सत्यामृषा तथैव च । चतुर्थ्यसत्यामृषा च, मनोगुप्तिश्चतुर्विधा ॥२०॥ संरम्भसमारम्भे, आरम्भे च तथैव च । मनो प्रवर्तमानं तु, निवर्तयेद्यतमानो यतिः ॥२१॥ सत्या तथैव मृषा च, सत्यामृषा तथैव च । चतुर्थ्यसत्यामृषा च, वचोगुप्तिश्चतुर्विधा ॥२२॥ संरम्भसमारम्भे, आरम्भे च तथैव च । वचो प्रवर्तमानं तु, निवर्तयेद्यतमानो यतिः ॥२३॥ स्थाने निषदने चैव, तथैव च त्वग्वर्तने । उल्लङ्घने प्रलङ्घने, इन्द्रियाणां च योजने ॥२४॥

संरंभसमारंभे, आरंभे य तहेव य ।
कायं पवत्तमाणं तु, णियत्तेज्ज जयं जई ॥२५॥

एयाओ पंच समिईओ, चरणस्स य पवत्तणे ।
गुत्ती णियत्तणे वुत्ता, असुभत्थेसु य सव्वसो ॥२६॥

एया पवयणमाया, जे सम्मं आयरे मुणी ।
सो खिप्पं सव्वसंसारा, विप्पमुच्चइ पंडिए ॥२७॥
त्ति बेमि ॥

॥ चउवीसइमं पवयणमायं अज्झयणं समत्तं ॥२४॥

---

संरम्भसमारम्भ, आरम्भे च तथैव च । कायं प्रवर्तमानं तु, निवर्तयेद्यमानो यतिः ॥२५॥ एताः पञ्च समितय–श्चरणस्य प्रवर्तने । गुप्तयो निवर्तने उक्ताऽशुभार्थेभ्यश्च सर्वतः ॥२६॥ एताः प्रवचनमातरो, यस्सम्यगाचरेन्मुनिः । स क्षिप्रं सर्वसंसाराद्विप्रमुच्यते पण्डित इति ब्रवीमि ॥२७॥

यज्ञीयाख्यं पञ्चविंशं अध्ययनम्.

माहणकुलसंभूओ, आसि विप्पो महायसो ।
जायाई जमजण्णंमि, जयघोस त्ति णामओ ॥१॥

इंदियग्गामणिग्गाही, मग्गगामी महामुणी ।
गामाणुगामं रीयन्तो, पत्ते वाणारसिं पुरिं ॥२॥

वाणारसीए बहिया, उज्जाणंमि मणोरमे ।
फासुए सेज्जसंथारे, तत्थ वासमुवाणए ॥३॥

अह तेणेव कालेणं, पुरीए तत्थ माहणे ।
विजयघोसे त्ति नामेण, जण्णं जयइ वेयवी ॥४॥

अह से तत्थ अणगारे, मासक्खमणपारणे ।
विजयघोसस्स जण्णंमि, भिक्खमट्ठा उवट्ठिए ॥५॥

समुवट्ठियं तहिं संतं, जायगो पडिसेहए ।
ण हु दाहामि ते भिक्खं !, भिक्खू जायाहि अण्णओ ॥६॥

---

माहनकुलसभूत, आसीद्विप्रो महयशा । यायाजी यमयज्ञे, जयघोष इति नाम्ना ॥१॥ इन्द्रियग्रामनिग्राही, मार्गगामी महामुनिः । ग्रामानुग्रामं रीयमाणः, प्राप्तो वाणारसीं पुरीम् ॥२॥ वाणारस्या बहिरुद्याने मनोरमे । प्रासुकशय्यासंस्तारे, तत्र वासमुपागतः ॥३॥ अथ तस्मिन्नेव काले, पुर्यां तत्र माहणः । विजयघोष इति नाम्ना, यज्ञं यजति वेदवित् ॥४॥ अथ स तत्रानगारो, मासक्षपणपारणे । विजयघोषस्य यज्ञे, भिक्षार्थमुपस्थितः ॥५॥ समुपस्थितं तत्र सन्तं, याजकः प्रतिषेधति । नैव दास्यामि ते भिक्षां, भिक्षो ! याचस्वान्य तः ॥६॥

जे य वेयविऊ विप्पा, जण्णमट्ठा य जे दिया ।
जोइसंगविऊ जे य, जे य धम्माण पारगा ॥७॥

जे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
तेसिमण्णमिणं देयं, भो भिक्खू ! सव्वकामियं ॥८॥

सो तत्थ एव पडिसिद्धो, जायगेण महामुणी ।
ण वि रुट्ठो णवि तुट्ठो, उत्तिमट्ठगवेसओ ॥९॥

णण्णट्ठं पाणहेउं वा, णवि णिव्वाहणाय वा ।
तेसिं विमोक्खणट्ठाए, इमं वयणमब्बवी ॥१०॥

णवि जाणसि वेयमुहं, णवि जण्णाण जं मुहं ।
णक्खत्ताण मुहं जं च, जं च धम्माण वा मुहं ॥११॥

जे समत्था समुद्धत्तुं, परमप्पाणमेव य ।
ण ते तुमं वियाणासि, अह जाणासि तो भण ॥१२॥

---

ये च वेदविदो विप्रा, यज्ञार्थश्च ये द्विजाः । ज्योतिषाङ्गविदो ये च, ये च धर्माणां पारगाः ॥७॥ ये समर्थाः समुद्धर्तुं, परमात्मानमेव च । तेभ्योऽन्नमिदं देयं, भो भिक्षो ! सर्वकामिकम् ॥८॥ स तत्रैव प्रतिषिद्धो, याजकेन महामुनिः । नापि रुष्टो नापि तुष्ट, उत्तमार्थगवेषकः ॥९॥ नान्नार्थं पानहेतुं वा, नापि निर्वाहणाय च । तेषां विमोक्षार्थमिदं वचनमब्रवीत् ॥१०॥ नापि जानासि वेदमुखं, नापि यज्ञानां यन्मुखम् । नक्षत्राणां मुखं यच्च, यच्च धर्माणां वा मुखम् ॥११॥ ये समर्थास्समुद्धर्तुं, परमात्मानमेव च । न तांस्त्वं विजानास्यथ जानासि ततो भण ॥१२॥

तस्सऽक्खेवप्पमोक्खं च, अचयंतो तहिं दिओ ।
सपरिसो पंजली होउं, पुच्छई तं महामुणिं ॥१३॥

वेयाणं च मुहं बूहि, बूहि जण्णाण जं मुहं ।
णक्खत्ताण मुहं बूहि, बूहि, धम्माण वा मुहं ॥१४॥

जे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
एयं मे संसयं सव्वं, साहू! कहसु पुच्छिओ ॥१५॥

अग्गिहोत्तमुहा वेया, जण्णट्ठी वेयसां मुहं ।
णक्खत्ताण मुहं चंदो, धम्माणं कासवो मुहं ॥१६॥

जहा चंदं गहाइया, चिट्ठंति पंजलीउडा ।
वंदमाणा णमंसंता, उत्तमं मणहारिणो ॥१७॥

अजाणगा जण्णवाई, विज्जामाहणसंपया ।
गूढा सज्झाय–तवसा, भासच्छण्णा इवऽग्गिणो ॥१८॥

---

तस्याक्षेपः प्रमोक्षं च, अशक्नुवन तस्मिन् द्विजः । सपर्षत्प्राञ्जलिर्भूत्वा, पृच्छति तं महामुनिम् ॥१३॥ वेदानां च मुखं ब्रूहि, ब्रूहि यज्ञानां च यन्मुखम् । नक्षत्राणां मुखं ब्रूहि, ब्रूहि धर्माणां वा मुखम् ॥१४॥ ये समर्थास्समुद्धर्तुं, परमात्मानमेव च । एतन्मे संशयं सर्वं, साधो ! कथय पृष्टः ॥१५॥ अग्निहोत्रमुखा वेदा, यज्ञार्थी वेदसां मुखम् । नक्षत्राणां मुखं चन्द्रो, धर्माणां काश्यपो मुखम् ॥१६॥ यथा चन्द्रं ग्रहादिकास्तिष्ठन्ति प्राञ्जलिपुटाः । वन्दमाना नमस्यन्त, उत्तमं मनोहारिणः ॥१७॥ अजानाना यज्ञवादिनो, विद्यामाहनसम्पदाम् । मूढास्स्वाध्यायतपःसु, भस्मछन्ना इवाग्नयः ॥१८॥

जो लोए बंभणा वुत्ता, अग्गी व महिओ जहा ।
सया कुसलसंदिट्ठं, तं वयं बूम माहणं ॥१९॥

जो ण सज्जइ आगन्तुं, पव्वयंतो ण सोयई ।
रमइ अज्जवयणंमि, तं वयं बूम माहणं ॥२०॥

जायरूवं जहा मट्ठं, णिद्धंतमलपावगं ।
राग-दोस-भयातीयं, तं वयं बूम माहणं ॥२१॥

(तवस्सियं किसं दन्तं, अवचियमंससोणियं ।
सुव्वयं पत्तणिव्वाणं, तं वयं बूम माहणं ॥२१॥

तसपाणे वियाणित्ता संगेहण य थावरे ।
जो ण हिंसइ तिविहेण, तं वयं बूम माहणं ॥२२॥

कोहा वा जइ वा हासा, लोहा वा जइ वा भया ।
मुसं ण वयई जो उ, तं वयं बूम माहणं ॥२३॥

---

